CC-0.In Public Domain. Digitization by eGangotri

राज्यराष्ट्रम्

ॐ स्वस्ति साम्राज्यं भौज्यं स्वाराज्यं
वैराज्यं पारमेष्ठ्यं राज्यं महाराज्यं
आधिपत्यमयं समन्तपर्यायी स्यात् ।
सार्वभौमः सार्वायुष आन्ताद् आ
परार्धात् पृथिव्यै समुद्रपर्यन्ताया एकराडिति ।
[ऐतरेयब्राह्मणम् ८/३/१५]

नेपालीमूलम्
डा. निर्मलमणि अधिकारी
डा. गोविन्दशरण उपाध्याय
सुशील गौतम

अनुवादः सम्पादनञ्च
रोहिणीराज तिमिल्सिना

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal.

डा. माधवप्रसाद-लामिछानेनामधेयस्य पुस्तकमिदम्
CC-0.In Public Domain. Digitization by eGangotri

राज्यराष्ट्रम्

नेपालीमूलम्

डा. निर्मलमणि अधिकारी
काठमाण्डु-विश्वविद्यालयः
भाषा-आमसञ्चारविभागः

डा. गोविन्दशरण उपाध्याय
त्रिभुवन-विश्वविद्यालयः
त्रिचन्द्रमहाविद्यालयः, मनोविज्ञान-दर्शनविभागः

सुशील गौतम
अनुसन्धाता

संस्कृतानुवादः सम्पादनञ्च

रोहिणीराज तिमिल्सिना
त्रिभुवन-विश्वविद्यालयः
संस्कृतकेन्द्रीयविभागः, कीर्तिपुरम्, नेपालः

प्रकाशकः

सहृदयता-समाज-नेपालः
भक्तपुरम्, नेपालः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

राज्यराष्ट्रम्

रचयितारः – डा. निर्मलमणि अधिकारी
डा. गोविन्दशरण उपाध्याय
सुशील गौतम

Authors – **Dr. Nirmalmaṇi Adhikārī** [Nirmala Mani Adhikary]
Dr. Govindaśaraṇ Upādhyāya
Suśīl Gautam

अनुसन्धानसहयोगी – बलराम प्रजापति (**Research Associate**)

अनुवादकः, सम्पादकश्च – रोहिणीराज तिमिल्सिना
त्रिभुवन-विश्वविद्यालयः, कीर्तिपुरम्, नेपालः

Translator, Editor – **Rohiṇīrāj Timilsinā, rrtimilsina@gmail. com**
Tribhuvan University, Kirtipur, Nepal

प्रकाशकः – सहृदयता-समाज-नेपालः, भक्तपुरम्, नेपालः

संस्करणम् – २०७९ श्रावणी पूर्णिमा, विश्वसंस्कृतदिवसः [2022]

सर्वाधिकारः © – निर्मलमण्यधिकारिणि

प्रतिकृतयः – १०००

अक्षरविन्यासः – यमुना न्यौपाने

सज्जा – सीतालक्ष्मी प्रजापति

मूल्यम् – २५० रूप्यकाणि [US$ 2. 00]

ISBN – 978 -9937-1-2524 -6

मुद्रकः – डिजिटल प्रिन्टलिङ्क, भक्तपुरम्
01 -6620555, digitalprintlink@gmail. com

RĀJYARĀṢTRAM
(Translated by Rohiṇīrāj Timilsinā)

All rights are reserved. No part of this publication can be reproduced in any form without our permission.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

प्राक्कथनम्

जनसमुदाये राज्यराष्ट्रसिद्धान्तविषयिण्या जिज्ञासायाः परिचर्चायाश्च आधिक्येन वर्धमानता एतस्य विविधभाषासंस्करणानां विवक्षां भावयति। अतो ग्रन्थस्यास्य नेपालभाषा (नेवारी), मैथिली, भोजपुरी चेति तिसृभिर्भाषाभिरनूदितानि संस्करणानि इतः पूर्वमेव प्रकाशितानि। साम्प्रतं यावद् एतस्य नेपालीमूलं तृतीयं संस्करणं प्रकाशितमस्ति। नवीनसंस्करणैः सहैव कतिपयानामधिकरणानां पुनर्लेखनेन कतिपयानाञ्च पूर्णतया पुनःसंरचनया ग्रन्थोऽयं परिष्कृतोऽस्ति।[1] राज्यराष्ट्र-सिद्धान्तस्य सङ्कथनस्य अग्रेसरणक्रमेऽस्य नवीनानि संस्करणानि च नूनं प्रकाशयिष्यन्ते।

वेदेषु भूमेर्मातृत्वमभिहितं वर्तते (ऋक् १०/१८/१०, यजु. ९/२२, अथर्व. १२/१/१०, १२/१/१२, १२/१/६२, १२/१/६३ ग)। राष्ट्रस्य राष्ट्रियताया राज्यस्य च विषये प्रत्यक्षतः परोक्षतो वा प्राचीनकालादेव चिन्तनं प्रवृत्तं वर्तते। चिन्तनस्यास्य परम्परायां विविधा वैचारिकदृष्टयश्च समागताः सन्ति। युरोपप्रतिमानानुसारेण भाषा-जाति-प्रजाति-समुदाय-सम्प्रदायादीन् राष्ट्रस्य परिभाषायां प्राथमिकतत्त्वरूपेण स्वीकृत्य विखण्डनं विधीयते। अत एतेनैव विखण्डनात्मकचिन्तनेन राष्ट्रराज्यम् (Nation

[1] पुस्तककृतिरूपेण 'राज्यराष्ट्र : अवधारणा र सिद्धान्त' २०७३ वैक्रमाब्दे प्रकाशितं तथापि राज्यराष्ट्रस्यावधारणा नेपाले तस्माद् ब्रहुभ्यो वर्षेभ्यः पूर्वं प्रस्तुतासीत्। यथा– अधिकारी निर्मलमणि (वैक्रमाब्दस्य २०६६) नेपाली राष्ट्रियता सुदृढीकरणको मार्गचित्र, स्टुडेण्टस् कन्सेप्ट्, वर्ष २, अङ्क ४, पृ. १८-२४।
एवञ्च द्रष्टव्यम्– अधिकारी (वैक्रमाब्दस्य २०५७, २०६३ ग)।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

State), द्विराष्ट्रियं राज्यम् (Two-Nation State), बहुराष्ट्रियं राज्यम् (Pluri-National State/Multi-Nation State) इत्याख्या अवधारणाः पुरतः समुपागताः परन्तु बौद्ध-जैन-बोन-वैदिकादिपरम्परासु राष्ट्रस्य यावधारणा वर्तते, सा युरोपकेन्द्रितप्रतिमानानुसारेण परिभाषार्हा नास्ति । राज्यराष्ट्रम् (State Nation) इति सिद्धान्तानुसारेण एकं निश्चितभौगोलिकसीमबद्धं राज्यमेव राष्ट्रमस्ति, यत् स्वतन्त्रं स्वाधीनं सार्वभौमसत्तासम्पन्नञ्च भवति । तत्र विविधानां भाषा-जाति-प्रजाति-संस्कृति-समुदाय-सम्प्रदाय-भौगोलिकक्षेत्रादीनां समन्वयेन समष्टिरूपा राष्ट्रियता निर्धारिता भवति । प्रस्तुतस्य ग्रन्थस्य माध्यमेन राज्यराष्ट्रम् (State Nation) इति सिद्धान्तोऽग्रेसारितोऽस्ति, यत्र राष्ट्रस्य राष्ट्रियताया राज्यस्य च विषये मौलिकी स्वस्थानमूलावधारणा प्रकाशिता वर्तते ।

युरोपमहाद्वीपीयपारम्पर्यावधारणानुकूलाया भू-राजनीतिक-वैधानिक-परिभाषाया अनुसारेण स्वतन्त्रः सार्वभौमसत्तावाँश्च यः कोऽपि देशो राष्ट्रराज्यम् (Nation State) अस्तीति सामान्यं प्रचलनम् । एवंरीत्या नेपालोऽपि एकं राष्ट्रराज्यमेव वर्तत इति कथने सर्वेषां स्वाभाविकी सम्मतिः आसीत् ।

स्वतन्त्रस्य स्वाधीनस्य सार्वभौमसत्तासम्पन्नस्य च देशस्य परिचयेन नेपालो राष्ट्रराज्यमस्तीति कथनस्य प्रचलनेन नेपालीयाया राष्ट्रियताया नवीनशैल्या परिभाषा व्याख्या विश्लेषणञ्च भवत्विति विवक्षायाः प्राबल्याभावेन पुरा काचनासहजता नोत्पद्यते स्म परन्तु नेपाले द्वि-राष्ट्रियताया बहु-राष्ट्रियतायाश्च कतिपयपक्षाणां विवक्षितत्वेन सम्प्रति राष्ट्रराज्यस्य बहुराष्ट्रियराज्यस्य राज्यराष्ट्रस्य च विषये प्रश्नोत्तराणि वादविवादः चिन्तनं मननं विमर्शश्च अपेक्षाविषयताङ्गताः सन्ति । नेपाले द्विराष्ट्रियराज्यस्य (Two-Nation State) बहुराष्ट्रियराज्यस्य (Pluri-National State/Multi-Nation State) च उद्घोषस्य परिवेशं वीक्ष्य तन्मूले स्थिताया दोषपूर्णाया मान्यतायाः तिरस्करणतानुभूता तथापि उचितं विमर्शं विनैव प्रकटितं मतं कथनञ्च पर्याप्ते न स्त इति नेपालस्य आधुनिकस्य परिवेशस्य समीक्षणेन ज्ञायते ।

सङ्कटानां सङ्क्रमणेन सह बहुकालो व्यतीतः । हिंसात्मकस्य द्वन्द्वस्य

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

जनप्रर्दशनात्मकस्य आन्दोलनस्य च समीकरणेन राजनीतिकशैल्या नवनेपालस्य अवधारणायां निर्मितायां राज्यस्य पुनःसंरचनायाः पक्षश्च प्रबलीकृतः । एतेन नेपालस्य राष्ट्रियतायाः परिभाषाया व्याख्याया विश्लेषणस्य च पारम्पर्यक्रमेण विधानं समुचितं न भवतीति तर्कः समुत्थितः । अथ एतदर्थं नवीना शैली अवलम्बनीयेति विवक्षा च अग्रेसारिता । तस्यां विवक्षायां समुचितापेक्षा कियती वर्तते, कियती च दोषपूर्णो दुराग्रहोऽस्तीति यथातथ्यं विवेचनीयम् ।

स्वपरिचयमूलया संस्कृत्या सम्पन्नायामस्मदीयसभ्यतायां स्वास्तित्वसाधिकाया राजनीतेः प्रविष्टौ कालव्यतिक्रमेण सहैव राष्ट्रियतायाः प्रश्न इतोऽपि जटिलताङ्गतो दृश्यते । सङ्कीर्णराष्ट्रियतावादिसिद्धान्तस्यानुयायिभिः घृणाभावेन द्विराष्ट्रियराज्यस्य बहुराष्ट्रियराज्यस्य वा उद्घोषमुत्थाप्य अन्त्यहीना विघटनशृङ्खला प्रारब्धास्ति । अस्मिन्नेव सन्दर्भे आन्तरिकाणां बाह्यानाञ्च नैकेषां पक्षाणां नेपालस्य द्वन्द्वे सक्रियता तां जटिलतां वर्धयन्ती वर्तते ।

उदारचरितानान्तु वसुधैव कुटुम्बकम् इति वैश्विक्या मान्यताया अनुयायिनां प्रभुत्वपूर्णया भूमिकयैव नेपालस्य राष्ट्रियताया अद्यावधिकसङ्कथनस्य कृते दिङ्निर्देशो भवितुं शक्नोति ।

सङ्कीर्णराष्ट्रियतावादिनः सिद्धान्तस्य विरुद्धो य उदारराष्ट्रियतावादी सिद्धान्तोऽस्ति, तत्सिद्धान्तस्य सङ्कथनस्य मूलप्रवाहीकरणेनैव समस्यानां मक्षिकाबन्धजालाद् वर्तमाननेपालस्य विमुक्तिः सम्भवति । नेपालीयाया राष्ट्रियताया अद्यावधिकपरिभाषाया अपेक्षावति समयेऽस्मिन् मौलिकसनातनपद्धत्या एतत्सम्बोधनमनिर्वायम्, नो चेत् परप्रतिमानस्य प्रभुत्वमितोऽपि प्रवर्धिष्यत इति सम्भावना संलक्ष्यते । यदि तु वर्तमानस्य विचारमन्थनावसरस्य सदुपयोगः कर्तुं शक्येत, तर्हि मौलिकं सनातनं प्रतिमानं परप्रतिमानस्योपरि नूनं विजयं लभेत । वर्तमानं युगं नेपालस्य पुनर्जागरणस्य युगं भावयितुमाधारोऽस्ति ।[2] मानवसभ्यतायां यादृशो महान् सङ्कट आपतति, तदृश एव महान् अवसरश्च समायातीति ऐतिहासिकं तथ्यमिह स्मृतिविषयतामधिगच्छति ।

---

2 अधिकपरिचर्चायै द्रष्टव्यम्– अधिकारी निर्मलमणि (वैक्रमाब्दस्य २०७५) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

नेपालो राष्ट्रराज्यं वर्तते आहोस्विद् द्विराष्ट्रियं राज्यम्, बहुराष्ट्रियं राज्यम्, राज्यराष्ट्रमित्येतेषु प्रश्नेषु सम्यक् संवादो वादविवादः चिन्तनं मननं विमर्शो वा अपेक्षाविषयः। एतस्माद् ऋते नेपालस्य नेपालित्वस्य च याथार्थ्येन बोधो न भवति। नेपालो नाम किमिति प्रश्नं भृशं विमृश्य असावेकं राज्यराष्ट्रं वर्तत इति निष्कर्षावाप्तिर्वर्तमानस्य नेपालस्य कृतेऽवधारणात्मको वैचारिकः सैद्धान्तिकश्च प्राथमिकविषयोऽस्ति। उपर्युक्तपृष्ठभूमौ राज्यराष्ट्रस्य वैदिकान् बौद्धान् अन्याँश्चोपयोगिनः सन्दर्भान् समुद्भाव्य निश्चयनकार्यममुना ग्रन्थेन विहितं वर्तते।

वैदेशिकमसान्दर्भिकं दार्शनिकं चिन्तनमाधृता राष्ट्रसंरचना नेपाले साफल्यं नाधिगच्छति। नेपालस्य प्रतिवेशिनि राज्ये भारते या सङ्घीयराज्यसंरचना सम्प्रति दृश्यते, तस्या भारतीये समाजे विद्यमानस्य वैदिकराज्यराष्ट्रस्य मूलकीलाश्रिततत्वेन साम्प्रतं यावद् विद्यमानता वर्तते। यदा तु तत्कालीनेन भारतीयनेतृत्वेन पाश्चात्त्यशैल्या राष्ट्रराज्यस्य विकसनप्रयत्नः साधित आसीत्, तदानीं भारतं विखण्डताङ्गतम्। अल्पीयसि काले हि पाकिस्तानराज्यञ्च विखण्डितम्। तदेवासाफल्यं द्विराष्ट्रियस्य राज्यस्य (Two-Natioon State) विभीषिकां प्राकाशयत्।

पाश्चात्त्येन एकल-सङ्कीर्ण-दार्शनिक-चिन्तनेन विकसिता राजनीतिकी व्यवस्था वैचारिकसम्मतिरहितान् सर्वान् ध्वंसयति। यथा सप्तशो दशकेभ्यः पूर्वतो नेपाले प्रचलितेषु राजनीतिकदलेषु प्राप्तेऽवसरे हि विपक्षध्वंसनस्य प्रवृत्तिर्वरीवर्ति। नेपालिनां मौलिकत्वेन सह तेषां कश्चन सम्बन्धो नास्ति। नेपालिनां मूलेन सहायुक्तत्वाद् नेपालस्य नेपालिनाञ्च कृते तानि दलानि लाभाय न भवन्ति। नेपालस्य कृते तु उदाराणि समावेशीनि समन्वयकारीणि च राजनीतिकदलानि अपेक्षितानि सन्ति।

नेपालोऽयं राज्यराष्ट्रमस्तीति सत्यतथ्यस्य जनमनःसु भावनमपि अस्मदीयमेव प्रमुखं दायित्वम्। किं नाम राष्ट्रराज्यम् (Nation State)? किं द्विराष्ट्रियराज्यम् (Two-Nation State)? किं बहुराष्ट्रियराज्यम् (Pluri-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

National State/Multi-Nation State) ? किञ्च राज्यराष्ट्रम् (State Nation) ? प्रश्नानमूनाधृत्य भृशमन्वेषणं विना नेपालीयाया राष्ट्रियताया अद्यावधिकं व्याख्यानमसम्भवं खलु ।

राज्यराष्ट्रस्य विमर्शो नेपालिजनानां हिताय अपेक्षितस्य सङ्कथनस्यावश्यकतां सम्बोधयति । भाषा-जाति-प्रजाति-संस्कृति-समुदाय-सम्प्रदाय-भौगोलिकक्षेत्रादीनां समन्वयेन संस्थानीकृतः स्वतन्त्रः स्वाधीनः सार्वभौमसत्तासम्पन्नश्च यो देशो (राज्यं) भवति, तस्य भू-राजनीतिक-वैधानिकमस्तित्वं सिद्धान्तेऽस्मिन् राष्ट्र-राष्ट्रियतयोः परिभाषायै प्राथमिकं तत्त्वं मतमस्ति । राज्यराष्ट्रस्य सैद्धान्तिकी आधारशिला नेपालीयाया राष्ट्रियताया अद्यावधिकव्याख्यायै नेपालस्य सुदृढीकरणाय च निर्णयात्मिकां भूमिकां निर्वहति । सङ्कटानां सङ्क्रमणकालेन सह प्रवर्तनशीले साम्प्रतिके नेपाले अस्या हि प्रभावेण समाधानमार्गश्च प्राप्स्यते । देशस्य प्रत्येकं सर्वप्रकारणाञ्च नागरिकाणां समन्वयेनैकत्वहेतुना राज्यराष्ट्रं जातीयं नास्ति । राजनीतिकमेतत् । एवञ्च राष्ट्रस्य नागरिकाणां संस्कृति-सभ्यता-सामाजिकपद्धत्यादिभिः समावेशिव्यवहारवत्त्वेन राज्यराष्ट्रं सभ्यतागत-राष्ट्रियतायाः चरित्रञ्च समुन्नयति ।

सिद्धान्ताः प्रारम्भकाले केषुचिद्देश-काल-परिस्थितिविशेषेषु अभिनिर्मीयन्ते । एवञ्च तस्माद् बृहत्तरस्य सामान्यीकरणस्य सम्भावनापि भवति । राज्यराष्ट्र-सिद्धान्तपक्षेऽपि बृहत्तरविस्तारस्य द्वारमुद्घाट्यमानं विलोक्यते । नेपाले सद्य एव समाजवादिनो दलस्य राष्ट्रियजनतादलस्य च मिथ एकीकरणेन जनता-समाजवादि दलं निर्मितमस्ति । दलस्यास्य गठनस्य प्रकरणे दलनेतृभिर्बहुराष्ट्रिय-राज्यस्योद्घोषे समुत्थापिते पक्षान्तरैरालोचनानन्तर-मस्माकमेव राज्यराष्ट्र-सिद्धान्तस्याश्रयणमस्माभिः सर्वैर्दृष्टमस्ति । तदानीं सत्तारूढं नेपाल-कम्युनिष्ट-दलम् (नेकपा), प्रमुखं प्रतिपक्षि नेपालिकाङ्ग्रेसदलम्, अन्यानि राजनीतिकदलानि, नैकेऽभियाननायकाः कार्यकर्तारश्च अस्माकं ग्रन्थं श्रव्यदृश्यानि च प्रयुज्य राजनीतिकं विमर्शमकुर्वन् । एतादृशीमवस्थां वीक्ष्य राज्यराष्ट्र-सिद्धान्तस्य सान्दर्भिकता श्रेष्ठता च एकं स्तरं यावत्

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

प्रमाणीभूतमस्ति। विश्वस्यैव मार्गदर्शकः सिद्धान्तो नेपालादागत इत्यभिदधानैः प्रतिवेशिदेशीयै-र्भारतीयै-र्विद्वद्भि-र्विचारकै-रध्येतृभिश्च राज्यराष्ट्र-सिद्धान्तोऽयं मुक्तकण्ठेन प्रशंसितः। तेषु विद्यावारिध्युपाधिकाः **प्रा.चन्द्रकान्तप्रसाद-सिंहः, प्रा.सुखनन्दनसिंहः, आदित्यकुमार-शुक्ला** च प्रमुखाः सन्ति। एवंरीत्या राज्यराष्ट्र-सिद्धान्तस्य सङ्कथनमग्रगतिं भावयद्वर्तते।

वैक्रमाब्दस्य २०७३ (ख्रीष्टाब्दस्य २०१६) संवत्सरे राज्यराष्ट्रस्य प्रथमस्य संस्करणस्य रचनावसरेऽस्माभी राज्यराष्ट्रस्यावधारणासिद्धान्ता अधो निर्दिष्टैः चतुर्भिः प्रश्नैर्विमृष्टा आसन्–

१. राष्ट्रनिर्माणारम्भाय मूलधारो जातीयता प्रजातीयता वा कः ?

२. एकस्मिन् राज्येऽनेका राष्ट्रियताः, समाना एकैव वा ?

३. राष्ट्रियतायाः परिचयपरिभाषयोः कृते निर्णायकं तत्त्वं किम् ?

४. परिचयमूला राजनीतिः संस्कृतिर्वा ? सांस्कृतिकाधिकारस्य नागरिक-राजनीतिकाधिकारयोश्च प्रश्ना राष्ट्रैः कथं समाधातुं शक्यन्ते ?

राज्यराष्ट्र-सिद्धान्त उपर्युल्लिखितान् प्रश्नान् समादधाति। तत्समाधानं राज्यराष्ट्र-सिद्धान्तानुसारेण एवं बोद्धव्यम्–

क) राष्ट्रनिर्माणारम्भाय मूलाधारो राज्यमेव। राज्यस्य कृते भूमिजनसहिता अन्ये च अवयवा अपेक्ष्यन्ते। तस्यां भूमौ निवसतां सर्वेषां जनानां समष्टी राज्येन स्वीकृता भवति। अतो राज्यनिर्माणारम्भाय काचनैका जातीयता, प्रजातीयता वा मूलधारो न मन्तव्यः।

ख) राज्यराष्ट्र-सिद्धान्तानुसारेण एकस्मिन् राज्ये समष्टिमूला केवलमेकैव राष्ट्रियता भवति। एत्ततात्पर्यमस्ति यद् राज्यराष्ट्र-सिद्धान्तोऽर्थहीनाया युरोपमहादेशीयमान्यताया राष्ट्रराज्य द्वि-राष्ट्रियता बहु-राष्ट्रियता चेत्यवधारणानामनौचित्यं निश्चित्य पूर्णतया समावेशात्मिकायाः सर्वसमानायाश्च राष्ट्रियताया मान्यतां पोषयति।

ग) राज्यराष्ट्र-सिद्धान्तानुसारेण राष्ट्रियतायाः परिचय-परिभाषयोः कृते निर्णायकं तत्त्वं राज्याधारेण परिभाषापन्नं राष्ट्रमस्ति। राष्ट्रियताया बहिष्कारवादिनौ

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

सङ्कीर्णौ परिभाषापरिचयावत्र व्यवहारतः सार्थकतां नहि भजेते ।

घ) राज्यराष्ट्र-सिद्धान्ते परिचयमूला संस्कृतिर्वाञ्छितास्ति चेत् परिचयमूला राजनीतिः तिरस्कृतास्ति । परिचयमूलया संस्कृत्या पद्धत्या तदनुकूलेन दर्शनेन सिद्धान्तेन च नियन्त्रिता राजनीतिरेव बौद्ध-जैन-बोन-वैदिकादिदर्शनैः तदात्म्यापन्ना मान्यता वर्तते । मान्यतायामस्यां सांस्कृतिकाधिकारो नागरिक-राजनीतिकाधिकारौ च मिथोऽमिश्रीकृत्य विशिष्टीकृताधिकाररूपेण तत्प्रत्याभूतिरपेक्ष्यते ।

राज्यराष्ट्रग्रन्थस्य प्रकाशनानन्तरं सर्वसाधारणैः, जिज्ञासुभिः, विद्वद्भिश्च प्रदर्शिताभिरुचिरस्मदपेक्षातोऽधिकतरा वर्तते । समाजस्य नैकविधक्षेत्रेभ्योऽस्माभिः प्रोत्साहनं लब्धमस्ति । सम्प्रति नेपालीभाषायां ग्रन्थोऽयं तृतीयं संस्करणं यावत् प्रकाशितोऽस्ति । इदानीं संस्कृतभाषया च अनूद्य पाठकानां समक्षं प्रस्तुतोऽस्ति । संस्कृतभाषया कृतेरस्याः प्रस्तुत्या राज्यराष्ट्र-सिद्धान्तस्य गरिमा वर्धितोऽस्ति । अमुना कार्येणास्माभिश्च महद्गौरवमनुभूयमानं वर्तते ।

राज्यराष्ट्रग्रन्थस्य सानुवादं सम्पादनं साधितवते महेश-संस्कृत-गुरुकुलस्य स्नातकाय एवञ्च त्रिभुवन-विश्वविद्यालयस्य संस्कृत-केन्द्रीय-विभागस्य उपप्राध्यापकाय **रोहिणीराज-तिमिल्सिनावर्याय** असीमः साधुवादोऽस्ति । युववयस्येव संस्कृतज्ञरूपेण लब्धप्रतिष्ठस्य तिमिल्सिनावर्यस्य श्रमेण संस्कृतवाङ्मयवाटिकायां कुसुममेकमुपचितमस्ति । राज्यराष्ट्रचिन्तनपरम्परायां नेपाली, नेपालभाषा (नेवारी), मैथिली, भोजपुरी चेति चतसृभिर्भाषाभिः सहैव संस्कृतस्याऽऽयामश्च समुपनिबद्धो वर्तते । ग्रन्थोऽयमन्याभिर्भाषाभिश्च अनुद्यमानोऽस्तीति वयं सूचिताः स्मः । राज्यराष्ट्रस्य अन्येषां संस्करणानामिव संस्कृतसंस्करणस्य च प्रकाशनार्थं सहृदयता-समाज-नेपालो धन्यवादार्हो वर्तते । राजनीतिः सैद्धान्तिकक्षेत्रेषु मौलिकीं विचारधारामग्रेसारयितुं भारतवर्षस्य हिमवत्खण्डस्य ज्ञानपरम्परया समुपचितस्य, आधुनिकेन सिद्धान्तीकरणविधिना संवर्धितस्य च राज्यराष्ट्र-सिद्धान्तस्य

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

इतोऽपि आधिक्येन प्रचारणमावश्यकम् । प्रस्तुतेन संस्कृतसंस्करणेन आवश्यकतेयं सम्बोद्धयत इत्यस्मदीयो विश्वासः । राज्यराष्ट्रस्य सङ्कथनस्य प्रवर्धनाय विशिष्टमवदानं विहितवद्भ्यः सर्वेभ्यः साधुवादाः ।

<u>रचयितृत्रयम्</u>
डा.निर्मलमणि अधिकारी
डा. गोविन्दशरण उपाध्याय
अनुसन्धाता सुशील गौतम

श्रावणः १५, पायसभोजनदिवसः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

अनुवादकीयं वचः

स्वस्त्यस्तु विश्वस्य खलः प्रसीदतां
ध्यायन्तु भूतानि शिवं मिथो धिया।
मनश्च भद्रं भजतादधोक्षजे,
आवेश्यतां नो मतिरप्यहैतुकी ॥[3]

अहो! सकृद्दीर्घं निःश्वसितं मया। कार्यसमापनसूचकोऽयं निःश्वासः। सम्पन्नमिदं कार्यं जगदीशकृपया, मातृपितृसहितानां गुरुजनानामाशिर्भिः प्रेरणया च। महान् सन्तोषोऽधुना। प्रमुदितं मे मानसम्। यदा तु स्वशिष्याद् राजीव-बछारसकाशाद् 'राज्यराष्ट्रमि'त्याख्योऽयं ग्रन्थोऽवाप्तः, ग्रन्थशीर्षकं वीक्ष्यैव सद्यः समुद्भूता नाना जिज्ञासा मे मनसि– किं नाम राज्यम्? राष्ट्रञ्च किम्? कथमनयोः समाहारः? लक्षणप्रमाणाभ्यां वस्तुसिद्धिर्न तु प्रतिज्ञामात्रेण। अतः पदयुग्मेऽस्मिन् राज्यस्य पूववर्तित्वे, राष्ट्रस्य परवर्तित्वे च किं मानम्? राज्यराष्ट्रस्यैव औचित्यम्, अन्यच्च अनुचितमिति कथं निरूपितं स्याद् ग्रन्थाभ्यन्तरे? इत्याद्याः। इत्येतासां जिज्ञासानां समाधानाय इह ग्रन्थप्रणेतृभिर्भृशं प्रयतितमनुभूयते। सकलाश्च इमा जिज्ञासा ग्रन्थस्याऽस्य मूलपाठस्याऽध्ययनेनैव सद्यः समाधास्यन्त एव। अत आसां जिज्ञासानामिह चर्चया पिष्टपेषणं नेच्छामि तथापि प्रकृतसन्दर्भे शास्त्रीयं चिन्तनं कथमस्तीति विषयेऽल्पीयान् चर्चायासस्तु अवश्यं विधीयते।

विधिज्ञानं वेदाधीनम्, व्यवहारश्च विध्यधीनः। **प्रमाणं परमं**

3 श्रीमद्भागवतम् ५/१८/९

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

श्रुतिरिति प्रथितं वचः ।[4] सकलेषु विधिव्यवहारेषु वेदशास्त्रस्य प्रामाण्यम् । विधिनिषेधपरं शास्त्रम् । सर्वान् शास्ति शास्त्रम् । प्रजाः शासकेन शास्यन्ते, शासकश्च शास्त्रेण पुरा । तस्माच्छासकानां यत् संविधानाधीनत्वं साम्प्रतं संलोक्यते, पुरा तेषां शास्त्राधीनत्वं विज्ञायते । वेदशास्त्रानुकूल्येन शासितेषु तदानीन्तनेषु राज्येषु विधिनिर्माणञ्च वेदानुकूलमेव भवति स्म । ऋषिप्रणीतानां वेदार्थमनुगच्छन्तीनां स्मृतीनामेव तदानीं विधिशास्त्रत्वं मन्तव्यम्, यासु कर्तव्याकर्तव्यकर्मणामिदमित्थं निर्णीय दण्डनीत्यादिविषयाणाञ्च सम्यक् प्रतिपादनं प्राप्यते । युगेऽस्मिन् संविधाननिर्माणं राजसंस्थया कार्यते परन्तु प्राचीने युगे ऋषिभिरेव संविधानप्रयोजनपराणि स्मृत्यादिशास्त्राणि रचितानि समुपलभ्यन्ते। तैश्च ऋषिप्रणीतैः स्मृत्यादिशास्त्रैः तदानीन्तन्या राज्यव्यवस्थाया नियमनं भवति स्म । शासको राजा स्वयं शास्त्रज्ञो भवति स्म । शास्त्रज्ञश्च स राज्यशासनं शास्त्रानुशासनेन संयोजयति स्म । अतः तदानीं शास्त्राणाम्, ऋषीणां वा प्रज्ञया राज्यशासनं सञ्चलति स्मेति स्पष्टम् ।

व्यवस्थापिकायां पूर्णतया ऋषिदृष्टिर्भवति स्म । यदि कश्चन शासकः शास्त्रविरुद्धमाचरेत्, तदानीं प्रजासु विद्रोहाधिकारश्च भवति स्म । ग्रन्थेऽस्मिन् समुपस्थापितः शास्त्रीयो वेनसन्दर्भोऽदः खलु तथ्यं प्रमाणीकरोति । तदानीं शास्त्रप्रातिकूल्येन शासननिरतस्य प्रजापीडकस्य वेनस्य ऋषिप्रमुखाभिः प्रजाभिः समूलमुन्मूलनं विधाय पृथुः शासकपदेऽभिषिक्तोऽवर्ततेति ऐतिह्यं प्रमाणम् ।[5]

एवञ्च धर्मब्रह्मप्रतिपादिकं वेदशास्त्रम् । **धर्मो विश्वस्य जगतः प्रतिष्ठा** ।[6] जगद्धारयति धर्मः । प्रजा धर्मं धारयन्ति, धर्मेण च प्रजा धार्यन्ते ।[7] सार्वभौमोऽस्ति

4 धर्मं जिज्ञासमानानां प्रमाणं परमं श्रुतिः । (मनुस्मृतिः २/१३)

5 इत्थं व्यवसिता हन्तुमृषयो रूढमन्यवः । निजघ्नुर्हुङ्कृतैर्वेनं हतमच्युतनिन्दया ॥
पृथुर्नाम महाराजो भविष्यति पृथुश्रवाः ॥ सोऽभिषिक्तो महाराजः सुवासाः साध्वलङ्कृतः ।
-श्रीमद्भागवतम् ४/१४/३४, ४/१५/४-१३

6 नारायणोपनिषद्

7 धारणाद्धर्ममित्याहुर्धर्मो धारयते प्रजाः ।
यः स्याद्धारणसंयुक्तः स धर्म इति निश्चयः ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

धर्मः । धर्मो जनान् कर्तव्यकर्मसु प्रेरयति । यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः,[8] धर्माचरणं खलु भौतिक्या आध्यात्मिक्याश्च समुन्नतेः कारणमस्तीत्यभिप्रायः । वेदोऽखिलो धर्ममूलम् ।[9] अतो वेदमूलको धर्मः । न केवलं ब्रह्मज्ञानाय, अपि तु धर्मज्ञानाय च वेदानां प्रयोजनं सिद्ध्यति ।

वेदप्रचोदितस्य धर्मस्याऽनुपालनेन हि लोका लोके सुखमेधन्ते । दण्डविधानस्य विधेर्वा मूलं (Basis of Law) धर्मः । धर्मेणैव दण्डव्यवस्था चलति ।[10] अतो धर्मसापेक्षा राज्यव्यवस्थैव शास्त्रानुकूला । वेन-पृथ्वोः सन्दर्भाज्ज्ञायते यद् राज्ये शासकचयनं यदि विद्वद्भिर्व्यधास्यत, तर्हि तु राज्यव्यवस्थापि समीचीना समपत्स्यत । वेदानुमोदितेयं शासनप्रणाली ।

वेदो ब्रूते– **त्वामग्ने वृणते ब्राह्मणा इमे शिवो अग्ने संवरणे भवा नः,**[11] हे तेजस्विन् राजन् ! धार्मिकैर्धीमद्भिर्यत्त्वद्वरणं विहितम्, तदस्माकं हितकरं भवेदिति भावः । गुणवद्भिर्विद्वद्भिश्चयनेन कश्चन राजपदे शासकपदे वा नियुज्येत इति युक्तं तत् । **योग्यं योग्याय दातव्यमिति** प्रसिद्धां सरणिं सुधियोऽवश्यं विदन्ति । अतो सुधिभिश्चितः शासको नूनं योग्यो भवति । विद्वत्प्रजाः स्वीयं शासकं चिन्वीरन्निति तु शोभना सरणिः ।

वेदेनोपदिष्टा पौराणिकग्रन्थैरनुसृता च सुधिभिर्जनैः स्वशासक-चयनात्मिका या सरणिरस्ति, सा च लोकतन्त्रात्मिका । सम्प्रति च बहुषु देशेषु लोकतन्त्रीया राज्यव्यवस्था वर्तते । पुरातने वैदिके लोकतन्त्रे शासकस्य राज्ञो वा चयनं विद्वज्जनाः शास्त्रोक्तविधिना कुर्वन्ति स्म परन्तु आधुनिके लोकतन्त्रे जनसम्मर्दः शासकं वृणीते । जनानां सम्मर्देन चीयते शासकः सम्प्रति, न तु गुणवतां विदुषां समवायेन । अतोऽराजकता राराजते बहुत्र लोके ।

वंशपरम्परयैव पुरा चलति स्म शासनतन्त्रम् । यथा रघ्वज-दशरथ-रामचन्द्रादयः सूर्यवंशीया राजानो वंशपरम्परया सञ्चालितस्य

---

8 वैशेषिकसूत्रम् १/१/२

9 मनुस्मृतिः २/६

10 सर्वो दण्डजितो लोकः । (मनुस्मृतिः ७/२२)

11 अथर्ववेदः २/६/३

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

शासनतन्त्रस्य संवाहकाः सन्ति चेच्चन्द्रवंशीया दुष्यन्त-भरतादयोऽपि तस्यैव शासनतन्त्रस्य दृष्टान्ताः । यद्यपि तदानीं राजवंशोत्पन्नो ज्येष्ठः कुमार एव राज्यशासनस्य उत्तराधिकारी भवति स्म तथापि राजपदासीनः स राजधर्माद्विच्युतश्चेद्विद्वद्भिः पदच्युतो दण्डितश्च भवति स्म । पूर्वनिर्दिष्टो वेनसन्दर्भोऽस्य दृष्टान्ताय अलम् ।

धर्मनियन्त्रिता मर्यादा राजानं प्रजाश्च स्वस्थाने स्थापयति । एवञ्च धर्मेणैव लोकसंस्थितिर्जायते । पुरा प्रजा राजा च सर्वेऽपि वर्णाश्रमधर्मं पालयन्ति स्म । जीवनस्य वार्धक्यावस्थायां राजानो राज्यसत्तायां युवराजमभिषिच्य वानप्रस्थं समाश्रित्य मुनिवृत्तिमङ्गीकुर्वन्ति स्म–

शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम् ।
वार्धक्ये मुनिवृत्तीनां योगेनान्ते तनुत्यजाम् ॥[12]

प्राणव्युत्क्रान्तिं यावद् राज्यसत्तां नाधिकृत्य योग्याय पुत्राय दत्त्वा अध्यात्मसाधनाश्रयणशीलानां शासकानां सत्प्रवृत्तिः सर्वजनहिताय आसीत् । इत्थं राज्ञः सत्तालौलुप्यराहित्यमनुभूय राजपुत्रः सकलाः प्रजाश्च महन्मोदं गच्छन्ति स्म ।

केवलं क्षत्रियाणामेव राज्यशासनेऽधिकारः, न तु अन्यवर्णीयानाम् । साम्प्रतिक्यां व्यवस्थायामिव तदानीं कश्चन ब्राह्मणोऽपि शासको (राजा) भवितुं नार्हति स्मेति स्मृतयोऽस्मान् शिक्षयन्ति । क्षत्रियाणां श्रैष्ठ्यं प्रतापेन, ब्रह्माणानाञ्च ज्ञानेनेति[13] मान्यतायाः तदा सम्यक् परिपालनमासीत् । सदुपदेशाय ज्ञानबलम्, राष्ट्ररक्षायै तु बाहुबलं प्रधानमिति नाविदितं सर्वलोकस्य । सैन्यसञ्चालनस्य, राज्यव्यवस्थायाः, दण्डविधानस्य, वेदस्य च वेत्ता क्षत्रियो लोकशासको राजा भवितुमर्हतीति मनुना प्रोक्तम् ।[14]

शासको (राजा) दण्डव्यवस्थां सञ्चालयति स्म परन्तु यदि

---

12 रघुवंशमहाकाव्यम् १/८

13 विप्राणां ज्ञानतो ज्यैष्ठ्यम् । (मनुस्मृतिः २/१५५)

14 सेनापत्यञ्च राज्यञ्च दण्डनेतृत्वमेव च ।
सर्वलोकाधिपत्यञ्च वेदशास्त्रविदर्हति ॥ (मनुस्मृतिः १२/१००)

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

राजापि दण्डभाग्भवेत्, तदानीं ज्ञानवन्त ऋषयः तस्मै दण्डं प्रयच्छन्ति स्म। सविधि वेदाध्ययनमासादितवान् अधीतविद्यः क्षत्रिय एव शासको (राजा) भवति। तादृशः कश्चन क्षत्रिय एव यथान्यायं राज्यशासनं सञ्चालयितुं क्षमत इति मान्यता तदानीमासीत्।[15] अतो प्रतापी सुशिक्षितश्च क्षत्रिय एव राज्यसिंहासनेऽभिषेकाय योग्यो मन्यते स्म। अशिक्षितोऽल्पशिक्षितः, केनापि प्रकारेणाऽयोग्यो वा क्षत्रियो यदि राजपुत्र एव स्यात्तथापि स राजपदे नाभिसिच्यते स्म। राजपरिवारस्य ज्येष्ठपुत्रः सन्नपि धृतराष्ट्रः तस्य दृष्टिविहीनत्वात् पितामहेन भीष्मेण राजपदाय न चितः, तदनुजः पाण्डुः तस्मिन् पदेऽभिषिक्त इति प्रकृतस्य सन्दर्भस्य प्रकृष्टमुदाहरणम्।

वैदिकी राजस्वव्यवस्था च तदानीन्तनी किञ्चित् सविशेषमनुभूयते। राजा राज्यस्य सुव्यवस्थाद्वारेण तेभ्य एव प्रत्यर्पयितुं प्रजाजनेभ्यः करं स्वीकुरुते स्म। यथादित्यः सहस्रगुणं प्रतिदातुं पृथिव्याः सकाशाद्रसमाददाति, तथैव राजा प्रजानामेव भूत्यै तत्सकाशात् करमादत्त इति महाकविना कालिदासेन स्वकीये महाकाव्ये सुस्पष्टं वर्णितमस्ति–

प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत्।
सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः॥[16]

कृषि-वाणिज्य-परिचर्यादिषु वित्तोपार्जनपरेषु कर्मसु निरतेभ्यो जनेभ्यः करग्रहणन्तु उचितमेव परं समुच्चं ज्ञानशिलोच्चयमारोहतो वेदाभ्यासिनः सकाशात् करसङ्ग्रहो नोचितः खलु। अतोऽत्यन्तं समस्यापन्नोऽपि शासकः श्रोत्रियाद्विदुषः करं नहि सङ्गृह्णीयादिति शास्त्रे समुपदिष्टम्।[17]

समेषां हितकामना खलु वैदिकराष्ट्रस्य चिन्तनमूलम्। अतो यजुःश्रुतिर्निगदति[18]–

---

15 ब्राह्मं प्राप्तेन संस्कारं क्षत्रियेण यथाविधि।
सर्वस्यास्य यथान्यायं कर्तव्यं परिरक्षणम्॥ (मनुस्मृतिः ७/२)

16 रघुवंशमहाकाव्यम् १/१८

17 म्रियमाणोऽप्याददीत न राजा श्रोत्रियात्करम्। (मनुस्मृतिः ७/१३३)

18 शुक्लयजुर्वेदः २२/२२

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

आ ब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायमा राष्ट्रे राजन्यः शूर इषव्योऽतिव्याधी महारथो जायतान्दोग्ध्री धेनुर्वोढानड्वा-नाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठाः सभेयो युवास्य यजमानस्य वीरो जायतान्निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यन्तां योगक्षेमो नः कल्पताम्।[19]

हे परमात्मन् ! राष्ट्रेऽस्मिन् ब्राह्मणोऽधिगतवेदविद्यः स्यात् । राजपुत्रः क्षत्रियो निर्भयः प्रतापी धनुर्धरो शत्रुजिद्भवतु । गावः पयस्विन्यः सन्तु । वृषभो भारवहनसमर्थोऽस्तु । घोटको तीव्रगतिर्जायेत । नार्यो व्यवहारकुशलाः सन्तु । युवा रिपुमर्दनः सभ्यो रथी भवतु । विद्वज्जनसम्मानशीले सुखदेऽस्मिन् राष्ट्रे वैरिनिवारको विद्वान् भवेत् । वारिवाहो यथापेक्षं वर्षतु । वनस्पतयो मधुरफलवत्यः स्युः । तानि च अस्मदर्थे पक्वानि सन्तु । अलब्धस्य लाभाय, लब्धस्य संरक्षणाय च अस्मासु सामर्थ्यं भवेदित्याशयः ।

प्रजासुखं सर्वोपरि मन्यमानं राज्यं खलु आदर्शराज्यमस्ति । तत्र प्रजानां हितं सुखं रञ्जनञ्च राज्यसञ्चालकस्य राज्ञः कर्तव्यं भवति । महाभारते प्रोक्तं यत्-

प्रजासुखे सुखं राज्ञः प्रजानान्तु हिते हितम् ।

---

19 तेजी ब्राह्मण वेदमा सब बनून् आ-राष्ट्रमा तेजिला
शूरा स्वस्थ महारथी धनुधरा रक्षाक्षम क्षत्रिय ।
गाई धेनुसमान दूध दुहुनी गोरु र साँढे बली
घोडा वायुसरी सुशील विदुषी नारी पुरन्ध्री भली ॥
योद्धा वीर रथस्थ शत्रुविजयी विद्वान् युवा सभ्य हून्
देवार्ची यजमानका सुत हऊन् वीराग्रणी सद्गुणी ।
हाम्रा खेती-किसानिका समयमा पर्जन्य बर्सून् जल
बाली-नालि फुलून् फलून् पजुरियून् पाकून् सबै औषधि ॥
योग क्षेम समान रूप सबको होस् कल्प-कल्पान्तमा
मेधावी धन-धान्य धर्मधृतिले सम्बद्ध सारा रहून् ।
शान्ति स्वस्ति र सङ्घशक्ति जनमा जागून् जगाऊन् जगत्
विश्व स्वस्थ रहोस् सदा जय हओस् कल्याण होस् लोकको ॥
(हस्तलिखित पुस्तिका, योगी नरहरिनाथ)

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

नात्मप्रियं हितं राज्ञः प्रजानान्तु प्रियं हितम् ॥[20]

लोके रामराज्यमादर्शराज्यत्वेन ख्यातिङ्गतं वर्तते, यत्र अयोध्याधिपतेः श्रीरामचन्द्रस्य प्रजारञ्जनमात्रमेकं कर्म आसीत्। प्रजानामानन्दाय स आत्मनः प्रेष्ठस्यापि वस्तुनः त्यागाय च तत्पर आसीत्। तादृशेऽवसरेऽपि स न किञ्चिद्विचलितो भवति स्म। नाट्यकविना भवभूतिना लोकसमाराधनपरायणस्य तस्य स्वभावस्य साधु वर्णनं विहितमस्ति।[21]

रावणेनापहृतायाः प्रियाया जानक्या विरहावस्थायां हृतसर्वस्व इव विलपन् विपिनेषु विभ्रमितः, पश्चाल्लङ्काविजयानन्तरं दत्ताग्निपरीक्षां जानकीमवाप्य भृशं प्रमुदितश्च स लोकाराधनाय आयोध्यकः शासकः सन् पुनस्तां त्यक्त्वापि निर्व्यथः प्रतिभाति। प्रजाः प्रति कियान् समर्पणभाव आसीत्तस्य। निर्विकल्पोऽयं दृष्टान्त आदर्शराज्ञः। न केवलं ब्रूते स्म, प्रदर्शितञ्च व्यवहारेण तेन। कृतो हि तेन तादृशः कठोरनिर्णयः। येन केनापि प्रकारेण प्रजाजनो रञ्जनीय इति कुलगुरोर्वशिष्ठस्य च सन्देश आसीत्तस्मै।[22] प्रजानुरञ्जनाय तन्निर्णीतां पुनर्जानकीविप्रयोगपरां कारुणिकीं स्थितिमनुभूय पाषाणोऽपि रोदिति, वज्रहृदयञ्च विदीर्णं भवतीति स्नेहभावञ्च न्यक्कृत्य राज्ञ आदर्शपालनस्य पराकाष्ठा वर्णितास्ति तत्र काव्ये।[23] यदा तु सत्तासीनः शासकः प्रजाहितमविगणय्य प्रजाः पीडयति, तत्सर्वनाशः सुनिश्चितः खलु।[24]

शास्त्रसन्दर्भाणां विमर्शेन समग्रतया राज्ञः चत्वारि कार्याणि कर्तव्यकर्मत्वेन संलोक्यन्ते–

- राज्यस्य सुरक्षाव्यवस्था
- राज्ये शान्तिस्थापनाय दण्डव्यवस्था

20 महाभारतम्, शान्तिपर्व ९/३/१

21 स्नेहं दयाञ्च सौख्यञ्च यदि वा जानकीमपि।
आराधनाय लोकस्य नास्ति मे मुञ्चतो व्यथा॥ (उत्तररामचरितम् १/१२)

22 युक्तः प्रजानामनुरञ्जने स्यास्तस्माद्यशो यत्परमं धनं वः। (उत्तररामचरितम् १।११)

23 अपि ग्रावा रोदित्यपि दलति वज्रस्य हृदयम्। (उत्तररामचरितम् १/२८)

24 प्रजापीडनसन्तापात् समुद्भूतो हुताशनः।
राज्ञः श्रियं कुलं प्राणान् नादग्ध्वा विनिवर्तते॥ (याज्ञवल्क्यस्मृतिः १३/१/३३९)

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

- करग्रहणपूर्वकं प्रजाहिताय सौविध्यपूर्णा राज्यव्यवस्था
- प्रजारञ्जनाय न्यायपूर्णा शासनव्यवस्था चेति।

राजानं (शासकं) विना लोकेऽराजकता वितन्यते। अराजकता प्रजा भयङ्गमयतीति धिया तद्रक्षायै भुवनेशः क्षितीशमकल्पयत्।[25] अतः प्रजारक्षणमेव राज्ञः प्रधानं कर्म। साधवो न्यायेन वित्तमर्थयन्त इति सत्यम्, परन्तु कामासक्तास्तु कामभोगार्थमधिकं वित्तं कामयन्ते। ततस्तेषां भ्रष्टाचारे प्रवर्तनं भवति।[26] कामिनो जना हि लोकेऽराजकतां भावयन्ति। यद्यपि शास्त्रमन्यायोपार्जितस्य वित्तस्य स्थैर्याभावं समुपदिशति[27] तथापि भ्रष्टाचारिणां कृते शास्त्रेण कीदृक् प्रयोजनम्? अतः कामभोगासक्तता, कामराहित्यं वापि शास्त्रनिषिद्धे स्तः। एतद्द्वयं विहाय कामनियमनपूर्वकं कर्मयोगप्रवृत्तिर्हि शास्त्रसम्मतः स्वकल्याणोपायः।[28] **यद्यद्धि कुरुते जन्तुस्तत्तत् कामस्य चेष्टितम्।**[29] समग्रमपि कर्म कामचेष्टया सम्पद्यते। काममूलं सङ्कल्पः। अतो जयन्ति जनाः **कामं सङ्कल्पवर्जनात्**[30]। कामासक्तेभ्यो जनेभ्यः प्रजानां रक्षणञ्च राजधर्मः। शासकेन (राज्ञा) तु कामोऽवश्यं जेतव्यः। अविजितकामाच्छासकान्निश्छला राष्ट्रसेवा नहि सम्भवति।

वैदिकवाङ्मयस्य भाण्डागारे प्रकृतसन्दर्भान्तर्गताः चर्चासामग्र्योऽनल्पाः खलु। इह ग्रन्थाभ्यन्तरे च ग्रन्थप्रणेतृभिः सन्दर्भोऽयं सुविशदं वर्णितः। ग्रन्थप्रतिपाद्यविषये इतोऽप्यधिकतरा शास्त्रीया चर्चावश्यकीति मन्मातृसंस्थायाः

---

25 अराजके हि लोकेऽस्मिन् सर्वतो विद्रुते भयात्।
रक्षार्थमस्य सर्वस्य राजानमसृजत् प्रभुः॥ (मनुस्मृतिः ७/३)

26 आशापाशशतैर्बद्धाः कामक्रोधपरायणाः।
ईहन्ते कामभोगार्थमन्यायेनार्थसञ्चयान्॥ (भगवद्गीता १६/१२)

27 अन्यायोपार्जितं वित्तं दश वर्षाणि तिष्ठति।
प्राप्ते चैकादशे वर्षे समूलञ्च विनश्यति॥ (चाणक्यनीतिः १५/०६)

28 कामात्मता न प्रशस्ता न चैवेहास्त्यकामता।
काम्यो हि वेदाधिगमः कर्मयोगश्च वैदिकः॥ (मनुस्मृतिः २/२)

29 मनुस्मृतिः २/४

30 महाभारतम्, राजधर्मपर्व २३२/५

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

पीठाधीशेन श्रद्धेयेन स्वामिना रमणानन्द-गिरिवर्येण सङ्केतितमासीत् । अतोऽनुवादकीये प्रास्ताविकेऽत्र तत्प्रेरणया लघीयान् चर्चायासो विहितः । एवंविधेन कार्येण चेतःप्रसादनशीलाय श्रद्धेयाय तस्मै हार्दिकीं कृतज्ञतामर्पयामि।

शिष्य-राजीवमाध्यमेन ग्रन्थे हस्तगते हि सपदि ग्रन्थाध्ययनमारब्धम्। ग्रन्थसन्दर्भाः सहसा बोधविषयतां नाध्यगच्छन् । गुरुवाणी स्मृता । श्रद्धेयो गुरुवर्यो स्वामी रामानन्दः समुपदिशति स्म– **बोधं विनैव पठनं वातरोगोद्भूतं पीनत्वमिव व्यर्थम्**, इति। तदनु बोधायासश्च साधितः। शीर्षकवीक्षणेन मनसि समुद्गता जिज्ञासाः शनैः शनैः समाधानोन्मुखताङ्गताः ।

केवलं नेपालिवाङ्मयग्रन्थागारे ग्रन्थसङ्ख्यावर्धनाय प्रणेतृभिर्ग्रन्थस्यास्य रचनायै यत्नो न विहित इत्यवगतम् । स्वराष्ट्रस्य, सकलस्य संसारस्य च कृतेऽस्योपयोगितापि विदिता । यदा तु राष्ट्रस्य कृते कस्मिँश्चित् कर्मणि प्रवर्तनस्य सन्दर्भः समुपतिष्ठते, तदानीं श्रद्धेयो योगी नरहरिनाथः स्मर्यते, यः सदैव वदति स्म– **'वयं राष्ट्रे जागृयाम पुरोहिताः'**[31] इति ।[32] लोके सद्भाव-शान्तिस्थापनाय विचारप्रसारकोऽयं ग्रन्थः सुरगिरानूदितश्चेत् सर्वजनहिताय सर्वजनसुखाय च किञ्चिदवदानं सम्पत्स्यत इति विचार्यमाण एव आसम्, एकदा श्रद्धेयेन निर्मलमणिगुरुणा राजीवमाध्यमेन प्रतिष्ठानकार्यालयेऽहं निमन्त्रितः । तत्राऽधिगतं कार्यञ्च सम्प्रति पूर्णताङ्गतम्। प्रथमं तावदेतत्कार्यदूताय राजीवाय साधुवादान् यच्छामि ।

अमरवाण्या ग्रन्थानुवादव्याजेन मयात्र शारदा समुपासिता । नमो वागधिष्ठात्र्यै शारदायै । आङ्ग्लभाषायाः सरलतमो लेख्यप्रयोगः कथं भवतीति अनुभवितुं *विल ड्युराँ* 'Will Durant' इत्याख्यस्य पाश्चात्त्यदार्शनिकस्य *दर्शनशास्त्रस्य कथा* 'The Story of Philosophy' इति पुस्तकं पठनीयमिति यथा प्रसिद्धिर्वर्तते, तथैव संस्कृतस्य सरलतमभाषाप्रयोगायास इह मयापि साधितः । अतः संस्कृताध्ययनस्य प्रारम्भिके चरणेऽभ्यस्यमानाश्च संस्कृता-

---

31 यजुर्वेदः ९/२३

32 हामीहरू सदा जागौं राष्ट्रमा राष्ट्रभक्तिले ।
अगुवा हौं हित गरौं सबैको सङ्घशक्तिले ।। (हस्तलिखित पुस्तिका, योगी नरहरिनाथ)

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

नुरागिणोऽनूदितग्रन्थादस्माल्लाभान्विता भूयासुरित्याशासे । यत्कृपया संस्कृतवाङ्मयेन सह मदीयः कश्चन अध्येतर्ध्येयसम्बन्धः समजायत, नमस्तस्मै श्रीगुरवे रामानन्दाय यतये । एतादृशेषु कार्येषु सदैव प्रेरयितॄन् प्रोत्साहदाँश्च आचार्यप्रवरं गुरुप्रसाद-सुवेदिवर्यम्, स्मृतिशेषं जनार्दन-घिमिरेवर्यम्, श्रद्धेयं स्वामिनं केशवानन्द-गिरिवर्यम्, अनुजं गणेशम्, सहचरीं यमुनाञ्च इह स्मरामि । तथैव त्रिभुवन-विश्वविद्यालयस्य संस्कृत-केन्द्रीय-विभागस्य नवनियुक्तं प्रमुखं संस्कृत-संस्कृतिकार्येषु मत्प्रेरकं श्रद्धेयं गुरुं माधवप्रसादो पाध्यायवर्यम्, '**जरो किलो प्रतिष्ठानमि**'ति संस्थायाः समादरणीयमध्यक्षं बलराम-प्रजापतिवर्यम्, **सहृदयता-समाज-नेपालस्य** अध्यक्षं तिलकप्रसाद-लुइटेलवर्यम्, अनूदितकृतेरस्याः सज्जासम्पादयित्रीं सीतालक्ष्मी-प्रजापतिवर्याञ्च प्रकृतसन्दर्भे संस्मर्तुमिच्छामि । अस्य ग्रन्थस्य संस्कृतसंस्करणस्य कृते रचयितृत्रयादनुमतिरेव नाधिगता, अपि तु निर्मलमणिगुरोः, गोविन्द-शरणगुरोश्च सकाशात् कार्यसम्पादनाय भृशं प्रोत्साहश्चासादितः । एतदर्थं सर्वेभ्यो ग्रन्थप्रणेतृभ्यो भूयशः कृतज्ञतावचांसि अर्पयामि ।

जानामि यद् ग्रन्थस्यास्य रचयितृणां प्रयत्नोऽयं लोकहितायैव । राज्यराष्ट्रसिद्धान्तस्य समाश्रयणं हि लोके सद्भावस्य, शान्तेः, समुन्नतेश्च कारणतां भजते । ग्रन्थस्यास्य संस्कृतसंस्करणीकरणाय मदीयेन अल्पीयसा यत्नेन यद्येतेषां ग्रन्थसन्देशस्य आसंसारं प्रसाराय यत्किञ्चिदवदानं भवेत्, तदानीं स्वात्मानं धन्यं मंस्ये ।

संस्कृतवाङ्मये, तत्रापि तदन्तर्गते वेदशास्त्रे यज्ज्ञानं राष्ट्रकल्याणाय, लोकहिताय, सर्वहिताय वा समुपदिष्टमस्ति, तन्न केवलमभ्युन्नतयेऽपि तु निःश्रेयसाय च सेत्स्यतीति निश्चप्रचम् । लोकः संस्कृतवाङ्मयेन सह च योक्तव्यः । इक्षुरसपानेन य आस्वादः, न तच्छर्कराचर्वणेन ।

मम देशस्य, संस्कृतेश्च संस्कृतवाङ्मयेन सह अत्यन्तं गभीरः सम्बन्धः । संस्कृतिः संस्कृताश्रिता । मदीयां संस्कृतिं सम्यग् बोद्धुं संस्कृतवाणी अनन्याश्रयः । संस्कृताद्विच्छिद्यमाना मद्बान्धवा '**वसुधैव**

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

कुटुम्बकमि'त्युदात्तभावाच्च वियुज्यमानाः प्रतिभान्ति। अस्मद्देशसन्ततयोऽस्माकं गौरवास्पदाभ्यामार्षसंस्कृति-सभ्यताभ्यां पराङ्मुखायमाणाः प्रतीयन्ते । तयो-राधारभूतस्य संस्कृतवाङ्मयस्याऽनवबोधः खलु तत्कारणम् । अस्मत्-सन्ततीनामेव न, अपि तु वाङ्मयमिदं सर्वलोकहिताय । अतो ग्रन्थानुवादेन, भाषाशिक्षणेन, वाङ्मयाध्यापनेन वा येन केनाप्युपायेन समाजः शिक्षणीयः । नोचेत्...

मालायाः सूत्रविच्छेदे शीर्यन्ते मणयो यथा।
तथा संस्कृतविच्छेदे राष्ट्रं शीर्येत खण्डशः ॥

२०७९ पुत्रदा एकादशी

संस्कृतोपासकः
रोहिणीराज तिमिल्सिना

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

राज्यराष्ट्रम्

विविधासु भाषासु

नेपाली (मूलम्)	-	डा. निर्मलमणि अधिकारी
	-	डा. गोविन्दशरण उपाध्याय
	-	अनुसन्धाता सुशील गौतम
नेपालभाषा	-	कृष्ण प्रजापति
मैथिली	-	जी.के. साह
भोजपुरी	-	धीरज गुप्ता
संस्कृतम्	-	रोहिणीराज तिमिल्सिना

(विश्वस्य अन्याभिर्भाषाभिरनुवादस्य कार्यं सततं प्रचलदेव वर्तते ।)

वयं राष्ट्रे जागृयाम पुरोहिताः

***

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

अनुक्रमणिका

१. अथातो राज्यराष्ट्रजिज्ञासा
२. उदारराष्ट्रियतालक्षणार्थं राज्यराष्ट्रम्
 २.१. उदारराष्ट्रियताया आधारः
 २.२. राष्ट्रस्य परिभाषा
 २.३. सिद्धान्तयुग्मयुताः चतस्रोऽवधारणाः
 २.४. नेपालकेन्द्रितप्रतिमानविरुद्धं युरोपकेन्द्रितं प्रतिमानम्
३. राष्ट्रराज्यम्
४. द्वि-राष्ट्रियता
५. बहु-राष्ट्रियता
६. राज्यराष्ट्रस्य सिद्धान्तीकरणम्
 ६.१. राज्यराष्ट्रस्य प्रमेयम्
 ६.२. राज्यराष्ट्रस्य प्रमाणम्
 ६.३. राज्यराष्ट्रस्य सिद्धान्तत्वं कथम् ?
 ६.४. राज्यराष्ट्रस्य बौद्ध- वैदिकादिसन्दर्भाः
  ६.४.१. प्राचीना राज्यशासनप्रणाल्यः
  ६.४.२. राजतन्त्रं गणतन्त्रं राजधर्मश्च
 ६.५. राज्यराष्ट्र-सिद्धान्तः
  ६.५.१. राज्यमेव राष्ट्रम्
  ६.५.२. भू-राजनीतिकवैधानिकतायाः सांस्कृतिसामाजिकैकता-याश्च समष्टिः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

६.५.३. राष्ट्रियतायाः परिचयाय परिभाषायै च राज्यमेव निर्णायकं तत्त्वम्

६.५.३.१. नागरिकतानीतिर्व्यवहारविधिश्च

६.५.३.२. प्राकृतिके संसाधनं सम्पच्च

६.५.३.३. अन्तरराष्ट्रियः प्रभावः

६.५.४. नागरिक-राजनीतिकाधिकारयोः सांस्कृतिकाधिकारस्य च विशिष्टीकृता प्रत्याभूतिः

परिशिष्ट-खण्डः

परिशिष्टम् १ वेदे नेतृत्वं शासनव्यवस्थाश्च : राज्यराष्ट्रदृष्टिः

क. राज्यम्, ऋतञ्च

ख. वेदे जातीयं राज्यं नास्ति

ग. भारतवर्षे राज्यराष्ट्रम्

घ. असफलानि राष्ट्रराज्यानि

ङ. राज्यराष्ट्रं मनुर्भव च

च. सदाचारो राष्ट्रञ्च

छ. राष्ट्रे परिवारः

ज. राज्यराष्ट्रस्य नेतृत्वम्

परिशिष्टम् २ नवीनराज्यस्य कृते सङ्घर्षरतानां सूची

सन्दर्भसूची

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

१. अथातो राज्यराष्ट्रजिज्ञासा

राज्यराष्ट्रजिज्ञासा प्रारभ्यते ।

राज्यराष्ट्रयोः समन्वयेन अभिनिर्मितस्य राज्यराष्ट्रस्य अवधारणात्मिकायाः परिचर्चायाः सिद्धान्तीकरणस्य च कृतेऽधस्तान् प्रश्नानाधृत्य विमर्शोऽपेक्ष्यते–

किं नाम राष्ट्रराज्यम् (Nation State) ?

द्विराष्ट्रियं राज्यम् (Two-Nation State) किम् ?

बहुराष्ट्रियं राज्यम् (Pluri-National State/Multi-Nation State) किम् ?

किञ्च राज्यराष्ट्रम् (State Nation) ?

राष्ट्रराज्य-द्विराष्ट्रियता-बहुराष्ट्रियता-राज्यराष्ट्राणां विषये विमृश्य राज्यराष्ट्रस्य सिद्धान्तीकरणं खलु ग्रन्थस्यास्य मूलमुद्देश्यम् ।

ग्रन्थमिदं राज्यराष्ट्रं (State Nation) किमस्तीति तथ्यं प्रकाश्य राष्ट्रियतायाः स्थितिगत्यात्मक्यै (Stat dynamic) परिभाषायै व्याख्यायै च आधारशिलां निर्मास्यति । एवञ्च राज्यराष्ट्रस्य अवधारणायाः सिद्धान्तस्य च आधारेण यस्य कस्यापि देशस्य राष्ट्रियता परिभाष्या व्याख्येया च सम्पत्स्यत इत्यतो ग्रन्थोऽयं तदर्थमपि अन्यतमा आधारशिला सेत्स्यतीति च

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

आशास्महे। बौद्ध-जैन-बोन-वैदिक-किरातादिपरम्पराभिः सम्बद्धं राष्ट्रचिन्तनं राज्य-राष्ट्र-राष्ट्रियता-राष्ट्रभक्ति-राष्ट्रवादादीनां विमर्शाय मौलिकं प्रतिमानं सृजति। अत एव अनुसन्धानस्यास्य अपेक्षा वर्तते।

समकालीने विश्वे स्वास्तित्वसाधिका राजनीतिः (Identity Politics) प्रायः समेषां देशानां कृते समस्यां समुत्थापितवती वर्तते। सन्दर्भेऽस्मिन् उदारराष्ट्रियताया वैचारिकधाराया बौद्ध-जैन-बोन-वैदिक-किरातादिपरम्पराणां वाङ्मयेषु तत्तत्सम्प्रदायवतां जनानां व्यवहारेषु वा विद्यमानत्वेन एतेषां राष्ट्रचिन्तनस्रोतसामन्वेषणस्य महत्त्वं प्रवृद्धं वर्तते। सम्प्रति राष्ट्रराज्यावधारणामाधृत्य विहितां राष्ट्रियतायाः परिभाषां व्याख्याञ्च अनङ्गीकृत्य क्वचिद् द्वि-राष्ट्रियतायाः क्वचिच्च बहु-राष्ट्रियताया उद्घोषस्य कोलाहलमाकर्ण्यते। वर्षाकालस्य छत्राकोत्पत्तिरिव निःसृता राष्ट्रियताया दर्पयुताः तुच्छा महत्त्वाकाङ्क्षा नहि राष्ट्रराज्यावधारणया सम्बोधयितुं शक्यन्ते, न च निराकर्तुमेव। तस्माद् **उदारचरितानान्तु वसुधैव कुटुम्बकमिति** वैश्विक्या मान्यतायाः परिपोषणेन सहैव राज्यस्य स्थिरतायै उदारराष्ट्रियतावादि-सिद्धान्तस्य आसंसारमपेक्षा दृश्यते। अत एव तु राष्ट्रराज्यस्य अवधारणायाः सिद्धान्तीकरणस्य अत्यावश्यकतानुभूतास्ति।

बहुसांस्कृतिक्या बहुभाषिक्या बहुजातीयाया बहुविधात्मिकाया बहुप्रतिमानात्मिकायाश्च अवधारणाया मूलप्रवाहीकरणयुते साम्प्रतिके विश्वे वैविध्ययोजकानि सूत्राणि प्रतिक्षेत्रं प्रतिविधि च इतोऽपि विवक्षितानि सन्ति। एतेन सहैव राष्ट्रस्तरे सर्वत्र व्याप्तानां वैविध्यानां योजकसूत्राणामपेक्षा मानवसभ्यताया इतिहासे सम्प्रति अभूतपूर्वरूपेण उपचिता वर्तते। कस्मिँश्चित् कालखण्डे युरोपमहाद्वीपस्य तदानीन्तनपरिस्थितौ अग्रेसारिता राष्ट्रराज्यं (Nation State) इति मान्यता सम्प्रति अर्थहीना, असान्दर्भिकी, अनपेक्षिता च प्रत्यपद्यत। अत एतस्या विस्थापनपुरःसरं युगीनावश्यकतानुसारेण वैविध्ययोजकोदारराष्ट्रियतावादिसिद्धान्तत्वेन राज्यराष्ट्रम् (State Nation) इति सङ्कथनं पुरस्कृतं वर्तते।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

राज्यराष्ट्रचिन्तनस्य अतिप्राचीनकालात् प्राप्तां विचारधारामाधृतत्वेन विषयेऽस्मिन् लक्षितस्य अनुसन्धानस्य, शोधस्य, विचारविमर्शस्य वा कृते विषयस्यास्य पृष्ठभूमिर्बोद्धव्या भवति।[1] राज्यराष्ट्रस्य जिज्ञासायाः प्रारम्भेऽधोनिर्दिष्टे आधारभूते सैद्धान्तिके विचारे स्पष्टतावश्यकी भवति-

(१) सर्वविधं प्रत्येकञ्च राज्यं नागरिकाणामभिभावको वर्तते। स्वस्य नागरिकाः संसारे यत्र कुत्रापि भवन्तु, तेषामभिभावकत्वेन प्रभावपूर्णं कार्यसम्पादनं राज्यस्यौचित्यस्य प्रमुखाधारोऽस्ति । स्वदेशस्य सीमान्तर्गतत्वेन निवसतां नागरिकाणामनागरिकाणाञ्च सुरक्षणम्, तथैव अराजकताया अनुद्भावनं राज्यस्य कर्तव्यमस्ति। सिद्धान्तेऽस्मिन् विविधानां भाषा-जाति-प्रजाति-संस्कृति-समुदाय-सम्प्रदाय-भौगोलिकक्षेत्रादीनां समन्वयेन संस्थानीकृतस्य स्वतन्त्रस्य स्वाधीनस्य सार्वभौमसत्तासम्पन्नस्य च देशस्य/राज्यस्य भू-राजनीतिक-वैधानिकमस्तित्वं खलु राष्ट्र-राष्ट्रियतयोराधारशिला मतास्ति । राज्यस्य वैधानिकताया अन्तरराष्ट्रियमान्यतादयोऽपरेऽपि आधारा भवन्ति परं नागरिकाणाभिभावकत्वेन प्रभावपूर्णं कार्यं सम्पाद्य संस्थानीकृतस्य राष्ट्रियस्वरूपस्याधारेण राज्यमेव नैतिकाधारं प्राप्नोति ।

(२) भूमिजनाः (नागरिकाः, प्रजाः, विशः, लोकाः, जनता) च राज्यस्योद्भवस्यास्तित्वस्य च कृते प्रथमाधारतत्त्वानि सन्ति। राज्यस्य पूर्णतायै अपेक्षितानामवयवानां विषये मतवैविध्यं भवितुं शक्नोति । अर्थशास्त्र-शुक्रनीति-मनुस्मृति-महाभारतादिग्रन्थेषु राज्यस्य सप्ताङ्गानि वर्णितानि सन्ति । राज्यस्य अन्यान्यङ्गानि च महत्त्वयुतानि सन्ति तथापि भूमिर्जनाश्च आधारभूतानि प्राथमिकतत्त्वानि। अधुना नागरिकसंज्ञया जनोऽभिधीयते ।

कतिपयैर्युरोपमहाद्वीपीयचिन्तकैः भूक्षेत्रम् (Territory), अन्यैश्च कतिपयैर्जातिः (Ethnicity), प्रजातिः (Race) इत्यादीनि तत्त्वानि खलु राष्ट्रियताया आधाररूपेण मतानि सन्ति। नागरिकराष्ट्रवादः (Civic Nationalism) राष्ट्रराज्यम् (Nation State) चेत्यनयोः पाश्चात्त्यावधारणा अर्थहीना (Outdated) जातास्ति।

1 अधिकारी (वैक्रमाब्दस्य २०६६), पृ. १९ ।
अधिकारी (वैक्रमाब्दस्य २०५७, २०६३ अपि) च द्रष्टव्यम्।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

बौद्ध-जैन-वैदिकसंहितानां चिन्तनपरम्परायां भूमिजनयोरुभयोरेव समन्वितं रूपं राजनीतिकी राजकीया शासकीया च संरचना वर्तते । अतो राज्यस्य राष्ट्रियस्वरूपस्य सन्दर्भे एव न, अपि तु ग्रामस्य जनपदस्य च संरचनायामपि भूमिर्जनश्चेति तत्त्वद्वयमनिवार्यमिति मान्यतेह दृश्यते । "**न ह्यजनो जनपदो राज्यमजनपदं वा भवतीति कौटिल्यः**" इति अर्थशास्त्रस्य त्रयोदशस्याधिकरणस्य चतुर्थाध्यायस्य साक्ष्यमत्र उल्लेख्यं वर्तते । शुक्रनीत्या च "**स्थावरं जङ्गमं चापि राष्ट्रशब्देन गीयते**" इत्याभिधानेन सैव मान्यतावलम्बिता वर्तते ।

जनता-तदाश्रयस्थल-राजकीयप्रणाल्यादीनां समष्टिरेव राज्यम् । जनसमुदायाद् भूमेश्च ऋते राज्यं न भवति, न च राष्ट्रमेव । वस्तुतो संस्थानीकृतस्य राष्ट्रियस्वरूपस्याधारं विनिर्माय राज्यमेव राष्ट्रसत्तां सम्पादयति । भूमिर्जनाः समन्वीय इतरैरपेक्षितैरवयवैश्च पूर्णतां प्राप्य निर्मितं राज्यमेव राष्ट्रं भवति । एतदेव राज्यं राष्ट्रियतायाः प्राथमिकी आधारशिलास्तीति कथनं बौद्ध-जैन-वैदिकादिमान्यतया च सम्मतं वर्तते । न तावदेव, शिख-बोन-किरात-कन्फ्युसियसचिन्तनानि च एतन्मान्यतासम्मतानि विलोक्यन्ते ।

(३) प्राचीने काले भूमेः सीमाङ्कनाय गणभावे समाविष्टानां जनानामावासाधिपत्ये निर्णायके मन्येते स्म । गणो राजनीतिकमैक्यमासीत्, न तु एकमेव कुलम्, एको वंशः कबिलो वासीत् । अद्यतनसन्दर्भे राष्ट्रियताया भावस्याधारशिलैव गणभाव इति कथनं युक्तिसङ्गतं भवति ।

युद्धप्राधान्ये युगे राज्यस्य सीमापि परिवर्तनशीला आसीत् परन्तु अन्तर्भागे आन्तरिके (Core) वा स्थले राजकीयस्य प्रभुत्वस्य भावकालं यावत् सार्वभौमसत्ताया मान्यता भवति स्म । साम्प्रतिके समये भू-राजनीतिक-वैधानिकतां निर्णेतुमन्तरराष्ट्रियो विधिरित्यादीनि संयन्त्राणि वर्तन्ते । एवमेव राज्यस्य स्वजनान् परजनाँश्च निर्णेतुं पुरा यादृशा आधारा आसन्, तेषाञ्च विचारेण राज्यैराधुनिके सन्दर्भे नागरिकताविधिर्निर्मितः परिपालितश्च वर्तते । अत एव भू-राजनीतिक-वैधानिकतामवाप्तस्य राज्यस्य विधिसम्मतानां नागरिकाणां राष्ट्रियतायाः परिचयस्य निर्धारके युगे वयं स्मः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

राज्यमेव राष्ट्रियतायाः प्राथमिकं निर्धारकमस्तीति मान्यताया इदानीं प्रायः सकले संसारे व्यवहारतः स्थापनावस्था वर्तते ।

(४) देशभक्ति-राष्ट्रवादौ पृथक् स्त इति बौद्ध-जैन-वैदिक-किरात-कन्फ्युसियसादिमान्यताभिः सह विरुद्धं चिन्तनं वर्तते। युरोपमहाद्वीपीयमान्यतायां देशभक्तिं (Patriotism) राष्ट्रियताञ्च मिथो विपरीततत्त्वरूपेण मत्वा क्रियमाणस्य बुद्धिविलासस्यानुकरणमात्रं वर्तते देशभक्ति-राष्ट्रवादयोः पृथक्तावादि चिन्तनम् । राज्यराष्ट्र-सिद्धान्ते देशभक्ति-राष्ट्रवादौ समानार्थकौ स्तः । सिद्धान्तेऽस्मिन् राष्ट्रस्य परिभाषायां सर्वविधानां भूमि-जनानां सहास्तित्वाज्जातीयराष्ट्रत्वं न मत्वा राजनीतिकराष्ट्रस्य मतत्वाच्च राष्ट्रवाद-देशभक्त्योरिह पृथक् पृथक् तात्पर्यं न भवति ।

(५) राज्यं साधनमस्ति । समान्यतो मत्स्यन्यायेन अराजकता मास्त्विति धिया राज्यं परिकल्पितमासीत् । यद्यपि मत्स्यन्यायस्य विकल्पा अपि सन्ति । आधुनिके काले विधेः शासनम् (Rule of Law) प्रवर्त्य (प्राचीनसन्दर्भे दण्डनीतेः कार्यान्वयनेन) सामाजिकीं सुव्यवस्थां सम्पाद्य शान्तेः समृद्धेः सुखस्य च सुनिश्चयनरूपं लक्ष्यमधिगन्तुं साधनत्वेनेह राज्यस्य प्रमुखा भूमिका भवति। मानवशरीर-जीवनलक्ष्ययोः तुलनया राज्यस्य साधनत्वपक्ष इतोऽपि सुस्पष्टं बोद्धुं शक्यते । बौद्ध-जैन-वैदिकादिपरम्परासु साधनत्वेनैव शरीरस्य महत्त्वं वर्तते, न तु साध्यत्वेन । वैदिकमान्यतानुसारेण च धर्मस्य धारणाय, अर्थकामयोर्भोगाय, मोक्षावाप्तये च शरीरमपेक्ष्यते । एतन्मान्यतानुसारेण साधनभूतं शरीरं विना पुरुषार्थचतुष्टस्य प्राप्तिरसम्भवी परन्तु साध्यं केवलं मोक्षरूपं परमं सुखमस्ति। बौद्धानां मान्यतानुसारेण साध्यं निर्वाणं वर्तते । शरीरस्य साध्यत्वनिषेधस्याशयो नहि शरीरस्य महत्त्वशून्यता । शरीरन्तु प्राथमिकी अवश्यकता । यतो हि, विना शरीरं मोक्षो निर्वाणं वा न लभ्यते । उक्तञ्च '**शरीरमाद्यं खलु धर्मसाधनम्**' इति । अत एव मोक्षार्थं निर्वाणार्थं वा शरीरस्य केवलं साधनत्वेन, अस्मिन् साध्यत्वं नास्ति । एवमेव राज्यं प्राथमिकं वर्तते परन्तु केवलं साधनत्वेन ।

निष्कर्षतया प्रोच्यमाने, संस्थारूपेण राज्यस्य सुदृढीकरणं

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

शक्तिमत्त्वसम्पादनञ्च अद्यतनी युगीनावश्यकता। एवञ्च राज्यानां सङ्कीर्ण-विखण्डनेन **वसुधैव कुटुम्बकमिति** आदर्शे हानिर्मास्तु। समेषां मानवानां मानवेतराणां प्राणिनाञ्च समानसदनरूपेण सकलाया वसुधायाः चिन्तनं व्यवहारश्च नितरामपेक्ष्येते। राज्यराष्ट्र-सिद्धान्ते एतत्सन्तोलनमस्ति। वैश्विकता-स्थानिकतयोः समन्वयरूपां वैश्वस्थानिकताम् (Glocal) आत्मसात्कृत्य प्रवर्ततेऽयं सिद्धान्तः। अत एव राज्यराष्ट्र-सिद्धान्तस्यानुयायिनो जना देशभक्ता नागरिकाः, **'वसुधैव कुटुम्बकम्'** इति मतस्यावलम्बिनो वैश्विकजनाश्च सन्ति।

(६) युरोपमहाद्वीपीयमान्यता राष्ट्रचिन्तनस्यारम्भे जाति-प्रजात्योः कबिल-देवास्थानां वा निश्चितविध्यनुरूपः परिचयो निर्मितोऽवलोक्यते परन्तु तत्र धर्मनिरपेक्षतायाः सिद्धान्ते प्रबलीभूते ईश्वरीयास्थाया विधिं राष्ट्रियताञ्च पृथक् परन्तु अविरुद्धे (तथ्याङ्कशास्त्रस्य शब्दावल्यां Mutually exclusive but not contradictory) मन्तुं शक्यावस्था यहुदीनां ख्रीष्टीयनानाञ्च समुदायस्य वर्तते। वैदिकसनातनिभिर्हिन्दुबौद्धादिभिश्च अतिप्राचीनकालाद् आत्मसात्कृतायाः मान्यतायाः[2] विलम्बेनापि तैरनुसरणं मानवसमाजस्य कृते हितकरं खलु। इस्लामधर्मानुयायिनां मध्ये साम्प्रतञ्च उम्मत (Umma) इत्यस्य खिलाफत (Capliphet) इत्यस्य च समुदायस्य मान्यता प्रबलास्ति। व्यवहारतो नैकेषु राज्येषु नैकेषां देशानां नागरिकत्वेन स्थितानामेतेषां समाजेऽपि उपर्युक्तव्यवहारस्य सिद्धान्ततः पालनाय वैचारिकी क्रान्तिरावश्यकी वर्तते। टर्कीदेशस्य कमाल-अतातुर्कवर्येण च अयमेव प्रयत्नो विहित आसीत्। विश्वस्य सर्वधर्माणां मानवसमुदायस्य ईश्वरास्थाविधिषु राज्येषु च भिन्नता भवतु परन्तु व्यवहारेऽविरोधित्वं वैश्विकशान्तयेऽनिवार्यमस्ति।

(७) निवासान्तरणं प्राकृतिकी स्वाभाविकी वाञ्छनीया च परिघटना वर्तते। प्रकृतेः पर्यावरणस्य परिस्थितेश्च प्रणाल्यां तादात्म्यसम्बन्धेन आधुनिकराज्यस्याधिकारक्षेत्रे कलहराहित्यानुकूल्येन च एतद् व्यवस्थापनीयम्। विश्वस्य सर्वेषां देशानां राज्यराष्ट्रस्य संरचनायामाबद्धता भवति चेदेव एतत्

2 अधिकारी (वैक्रमाब्दस्य २०७५ ख)

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

सम्भवति। निवासान्तरणं निरोद्धुं कोऽपि न शक्नोति। अतो बुद्धिमत्तया विवेकेन च एतस्य सुव्यवस्था सम्पादनीया। यावद् राष्ट्रराज्यस्य मान्यता स्थास्यति, शीघ्रं चिरेण वा संसारस्य प्रतिदेशं घृणावादस्य, परिचयमूलाया राजनीतेर्नाम्ना प्रवृत्तस्य सङ्कीर्णस्य विखण्डनस्य हिंसायाश्च वैचारिकं जालं स्थास्यत्येव । जातीयं प्रजातीयं साम्प्रदायिकं वैचारिकमन्यं वैविध्यञ्च समन्वीय व्यवस्थापनाय राज्यराष्ट्रस्य मान्यता सैद्धान्तिकमाधारं प्रयच्छति। द्वन्द्वव्यवस्थापनस्य, शान्तेः सुनिश्चयार्थञ्चेयं मान्यता प्रभावकरं साधनं भवितुं शक्नोति।

(८) इदानीं निवासान्तरणेन सहैव पर्यावरणीयपक्षः, प्रविधिः, अर्थतन्त्रञ्चेत्यादिषु सन्दर्भेषु वैश्विकस्तरे पारस्पारिकी निर्भरता प्रवर्धितास्ति। एतेनैव हेतुना वैश्विकशासन-प्रशासन-तन्त्रस्य अपेक्षा इतोऽपि प्रवर्धमानास्ति। अस्या अपेक्षायाः कारणेनैव राज्यैः स्वाधिकारस्य, स्वभूमिकायाः, स्वप्रकार्यस्य, स्वकर्तव्यस्य च स्थितिगत्यात्मकं (Stat dynamic) पुनरावलोकनं विधातुमवसरोऽधिगतोऽस्ति। राज्यस्य सार्वभौमसत्तायाः स्वतन्त्रतायाः स्वाधीनतायाश्च अक्षुण्णतायै एवञ्च नैकेषां राज्यानां नागरिकाणां वैश्वस्थानिकं (Glocal) साहचर्यं निर्बाधरूपेण पुरस्कर्तुं संस्थानीकृतं संयन्त्रम् (Institutionalized Mechanism) आवश्यकं वर्तते । जनप्रतिनिधित्वम्, नेतृत्वम्, साहचर्यम्, व्यवस्थापनम्, संसाधनस्य सर्वस्वामित्वं वितरणञ्चेत्यादिविषयकाः कठिनाः प्रश्नाः सन्ति परन्तु तत्समाधानं नासम्भवम् । समाधानस्य काठिन्यं कीदृशं कियत्प्रर्यन्तञ्चेति विषयो राज्य-राष्ट्रियतयोः चिन्तनाधृतो भवति। वैश्विकस्य संस्थानीकृतस्य संयन्त्रस्य निर्माणाधारो व्यावहारिकरूपेण सैद्धान्तिकरूपेण च परिपोषणीयः। सहृदयतादर्शनं[3] तादृशः सैद्धान्तिक आधारो भवितुं शक्नोति।

(९) राज्यराष्ट्रम् (State Nation) इत्यवधारणायां राज्यं (State) राष्ट्रं (Nation) चेति शब्दयुग्मं वर्तते । 'राज्यराष्ट्रम्' इति पदे राज्यपदस्य विशेषणस्थानीयत्वेन अग्रे, राष्ट्रपदस्य च विशेष्यस्थानीयत्वेन द्वितीयस्थाने सोद्देश्यं विन्यासो विहितोऽस्ति । एवं विशेषणविशेष्यसम्बन्धेन अस्या

3 अधिकारी (वैक्रमाब्दस्य २०७६ क)

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

अवधारणाया एकं विशिष्टं तात्पर्यं बुद्ध्यते । राष्ट्रियतायाः परिभाषायै परिचयार्थञ्च राज्यमेव निर्णायकं तत्त्वमस्तीति सैद्धान्तिक्या मान्यताया द्योतिकेयं राज्यराष्ट्रावधारणेति अभिप्रायः । राष्ट्रियतायाः परिभाषार्थं परिचयार्थञ्च राज्यस्यैव निर्णायकतत्त्वरूपत्वं मतं किम् ?

दण्डनीतेः, राज्यस्य, राज्ञः (शासकविशेषस्य) च अस्तित्वेन सहैव देश-राष्ट्रादिपदव्यवहार्याणि तत्त्वानि निर्मितानीति तथ्यं महाभारतस्य शान्तिपर्वणः समीक्षणेनावगम्यते–

राज्ञा विहीना न भवन्ति देशाः ।
देशैर्विहीना न नृपा भवन्ति ॥[4]

एवञ्च राज्यनाम्नैव नागरिकाणाञ्च नामकरणस्य पद्धतिः पुरा प्रचलितासीत् । मद्र-यौधेय-मालव-क्षुद्रकराज्येषु नागरिकाणां नामकरणं राज्यनाम्नैव कृतमासीत् ।[5] एवंरीत्या तदानीं राज्योद्भवेन सहैव राष्ट्रियतायाश्च जन्म दृश्यते । तत्पूर्वं सकला पृथिवी सर्वेषां समानं गृहमासीत्– **"माता भूमिः पुत्रोऽहं पृथिव्याः"** (भूमिसूक्तम्) ।[6] राज्यस्योद्भवेन सहैव पृथिव्यां नैकेषां देशानां राष्ट्राणां जनपदानां वा संरचनस्य स्थितिरुत्पन्ना । एतेनैव **'एकराडस्य भुवनस्य...'** एत्येवंरीत्या वेदेनाङ्गितीकृतस्य वैश्विकराष्ट्रस्य युगस्य समाप्तिर्बभूव । ततो राज्याधारेण राष्ट्रियतानिर्मापकाणि तत्त्वानि राज्यराष्ट्राणि (State Nation) वा प्रादुर्भूतानि । राज्यराष्ट्रपदे विशेषणस्थानीयस्य राज्यस्य साधनत्वेन, विशेष्यस्थानीयस्य राष्ट्रस्य साध्यत्वेन च सिद्धान्तोऽयं स्वाभाविकतया उदारराष्ट्रियतावादी सिद्धान्तोऽस्तीति तथ्यस्य परिचर्चा अग्रेऽधिकरणे करिष्यते ।

---

4 मान्यतेयं मनुस्मृतौ शुक्रनीतौ अर्थशास्त्रे च उल्लिखितेन राज्ञः सर्वोपरि केन्द्रीयं स्थानं भवतीति तथ्येन तोलनीयानुभूते । अर्थशास्त्रे राज्ञः कृते स्वामीति संज्ञा प्रयुक्तास्ति, या आधिपत्यस्यावस्थां सङ्केतयति । तत्र राजा राज्यसंस्थायाः प्रतीकरूपेण समीक्ष्यते, न तु तस्य व्यक्तिमात्रत्वम् ।

5 जायसवाल (ख्रीष्टाब्दस्य १९२४), पृ. १३३-१३४ ।

6 अथर्ववेदः १२/१/१२

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

२. उदारराष्ट्रियतालक्षणार्थं राज्यराष्ट्रम्

२.१. उदारराष्ट्रियताया आधारः

वेदेषु वेदसम्बद्धवाङ्मये बौद्ध-जैनवाङ्मययोश्च राष्ट्रचिन्तनस्य सुदीर्घा समृद्धा परम्परावाप्यते ।[7] १९२४ ख्रीष्टीयाब्दे प्रकाशिते स्वकीये प्रसिद्धे ग्रन्थे[8] काशीप्रसाद-जायसवालवर्येण वैदिककालस्य सभा-समित्योः सन्दर्भः परिचर्चितः खलु । सहैव तत्र सङ्घराज्य-गणतन्त्रयोः, राजतन्त्रस्य,

---

7 द्रष्टव्यम्– काशीप्रसाद-जायसवालकृतं 'हिन्दू पोलिटी' (ख्रीष्टाब्दस्य १९२४), रामशरण-शर्मकृतम् 'एस्पेक्टस अफ् पोलिटिकल अइडियाज् एण्ड इन्स्टिच्युशन्स इन् एन्सिएण्ट इण्डिया' (ख्रीष्टाब्दस्य १९५९), शिवदत्त-ज्ञानिकृतं 'भारतीय संस्कृति' (ख्रीष्टाब्दस्य १९४४), सत्यकेतु-विद्यालङ्कारकृतं 'प्राचीन भारत की शासनपद्धति और राजशास्त्र (ख्रीष्टाब्दस्य २००१), काशीप्रसाद-जायसवालस्य उपर्युक्तं पुस्तकं 'हिन्दू राज्यतन्त्र' इति शीर्षकेण, रामशरणशर्मणः पुस्तकं 'प्राचीन भारत मे राजनीतिक विचार एवं संस्थाएँ' इति शीर्षकेण हिन्दीभाषया अनूद्य प्रकाशिते स्तः, येऽस्मत्पार्श्वे च स्तः । तथैव महर्षि-दयानन्द-सरस्वतीकृतस्य सत्यार्थप्रकाशस्य षष्ठः समुल्लासः (ख्रीष्टाब्दस्य २०१४), 'रामकृष्ण मिसन इन्स्टिच्युट अफ् कल्चर' इति संस्थया प्रकाशितः 'द कल्चरल हेरिटेज अफ इण्डिया' द्वितीयः भागः (ख्रीष्टाब्दस्य १९९३) एतस्य सान्दर्भिका अध्यायाः, सातवलेकर (ख्रीष्टाब्दस्य १९५०) च द्रष्टव्यानि सन्ति । ख्रीष्टाब्दस्य १९३० पर्यन्तं प्रकाशितानां सान्दर्भिकसामग्रीणां परिचर्चायै द्रष्टव्यम्– 'रामशरण शर्मा (ख्रीष्टाब्दस्य १९९०) ।

8 जायसवाल (ख्रीष्टाब्दस्य १९२४) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

पौर-जनपदयोः, परिषदश्च विषये सविस्तरं वर्णितमस्ति । प्राचीनकालस्य करव्यवस्था-शुल्कप्रणाल्योर्विषयश्च तस्माद्ग्रन्थाज्ज्ञायते। हिन्दुसाम्राज्यतन्त्रस्य विविधा आयामा अपि तेन प्रकाशिताः सन्ति । तदनन्तरं नैकेषां जिज्ञासूनां शोधकर्तृणाञ्च अनेकशो ग्रन्थाः शोधपत्राण्यपि प्रकाशितानि सन्ति, येषामाधारेण हिमवत्खण्डस्य, समग्रस्य भारतवर्षस्य च मौलिकं राजनीतिकं चिन्तनमग्रेसारयितुं शक्यते । तदर्थं पुरातनसन्दर्भसामग्रीणां स्थितिगत्यात्मकं (Stat dynamic) विश्लेषणं नूनमावश्यकम् । युरोपमहाद्वीपीयस्य प्रतिमानस्य प्रभुत्वयुते कालखण्डे लिखितत्वेन तत्र दृष्टिदोषोऽपि सम्भवति, यः सर्वथा अस्वीकार्योऽस्ति । यत्किमपि भवतु, राजनीतिकस्य चिन्तनस्य कृते तासां सन्दर्भसामग्रीत्वमवश्यं सिद्ध्यति ।

आधुनिकस्य राजनीतिशास्त्रस्य मूले दण्डनीतिः, अर्थशास्त्रस्य राजधर्मशास्त्रस्य राजधर्मविद्याया वा समृद्धा परम्परा यदि न स्यात् "**सर्वा विद्या राजधर्मेषु चोक्ताः, सर्वे लोका राजधर्मे प्रतिष्ठाः**" उद्घोषोऽयं कथमुद्भवेत् ! दण्डनीतिः शासनसम्बद्धः सिद्धान्तः (Principles of Government) वर्तते, अर्थशास्त्रस्याभिप्रायञ्च जनपदसम्बद्धं शास्त्रम् (Code of Common-wealth) इत्यभिहितवान् अस्ति जायसवालवर्यः (ख्रीष्टीयाब्दस्य १९२४, पृ. ५) ।[9] पुरा उशनसा दण्डनीति-पदं प्रयुक्तम्, बृहस्पतिना अर्थशास्त्र-पदं प्रयुक्तम्, महाभारते प्रजापतिकृतः प्राचीनदण्डनीतिग्रन्थ उल्लिखितोऽस्ति, एतेषां चर्चा महाभारतस्यैव शान्तिपर्वणि राजधर्मरूपेण विहितास्तीति जायसवालवर्येण समुल्लिखितं वर्तते (पृ.५) । एतेन राजशास्त्र-राजधर्मौ समानार्थकावनुभूयेते । पुरा अर्थ-दण्ड-पदाभ्यां बोधितस्य तत्त्वस्य बोधनाय कालान्तरे नीति-नयादिपदानि प्रचलिनानि (पृ.६) ।

राष्ट्रचिन्तनस्य सन्दर्भे समाजिक-राजनीतिकसंस्थानां क्रमिकविकासबोधकं साक्ष्यं वेदेषु लभ्यते । राजनीतिकरूपेण सङ्गठितानां

9 अत्र कोष्ठकस्था आङ्गलपदावली जायसवालपुस्तकात् (ख्रीष्टाब्दस्य २९२४) गृहीता वर्तते चेद् भाषायाः पदावली तु हिन्दीभाषयानूदितात् तस्मादेव जायसवालपुस्तकात् प्रयुक्ता वर्तते (ख्रीष्टाब्दस्य १९२४) । एकादशस्य पृष्ठस्य तत्रत्या पादटिप्पणी च द्रष्टव्या ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

जनानां विशस्य वा बोधिका संज्ञा राष्ट्रमिति वैदिकवाङ्मयेऽवाप्यते ।[10] राज्यविषयकः सिद्धान्तः, राज्यसंस्थायाः स्वरूपम्, राज्यावयवाः, शासकीयं स्वरूपमित्यादिविषयेषु चिन्तनाय वेदसंहितासु सान्दर्भिका मन्त्राः सन्ति ।[11] सभा-सैन्य-राज्य-विदथ-समिति-परिषदादीनामुल्लेखनं वैदिकवाङ्मये वर्तते । प्रथमायामृग्वेद-संहितायामेव सभा-समिति-विदथादिसंस्थानां प्रासङ्गिकः समुल्लेखोऽधिगम्यते, यत्र सभाशब्दस्य अष्टकृत्वः, समितिशब्दस्य नवकृत्वो विदथशब्दस्य च द्वाविंशत्यधिकशतकृत्वः समुल्लेखो वर्तते ।[12] यजुरथर्वयोश्च सभासमित्योरुल्लेखो बहुत्र लभ्यते ।[13] ऐतरेय-शतपथादिब्राह्मणग्रन्थेषु तु वर्तमानसन्दर्भे राजनीतिकवस्तुरूपेण स्वीक्रियमाणानि अन्तर्वस्तून्यपि बहूनि विद्यन्ते । एवं सभा-सैन्य-समिति-परिषद्भी राज्ञो गणमुख्यस्य वा चयनेन राज्याभिषेकेण च सम्बद्धा बह्व्यः सामग्र्यो वेदसंहितासु ब्राह्मणग्रन्थेषु च समुपलभ्यन्ते । उपनिषद्ग्रन्थानां मूलमुद्देश्यमध्यात्मदर्शनं मतम्, तथापि तत्कालीनस्य समाजस्य राज्यव्यवस्थायाश्च बोधप्रसङ्गाः कासुचिदुपनिषत्सु

10 विद्यालङ्कार (ख्रीष्टाब्दस्य २००१), पृ. ३४ ।

11 यथा– ऋक्- १/२४/१३, २/२६/३, ४/२१/२, ६/२८/६, ६/३७/८, ८/४/९, ९/९२/६, १०/१७३/६, १०/१९१/२-४, यजुः - ९/४०, १२/८०, २०/१७, ३०/६, अथर्वः - १/४/६, ३/३/५, ३/४/२, ३/४/४, ३/४/७, ३/५/२, ३/५/६-७, ३/२९/१-२, ४/७/४-५, ५/१९/१५, ६/१२/२, ६/८७/१-२, ६/८८/१-३, ७/१/२, ७/१/६३, ७/१२/१-४, ८/१०/१, १५/९/१-२, १०/३७/२, १९/५५/६ इत्यादयः ।

ऐतरेयम्– ८/३/३, ८/१२, ८/१५, ८/१८, शतपथब्राह्मणम्- ५/१/१/१२, ५/१/२/१३, ५/२/१/२५, ५/२/५/१, ५/४/४/७, बृहदारण्योकपनिषद्– १/४/१४ इत्यादयश्च द्रष्टव्याः ।

इतोऽप्याधिकपरिचर्चायै काशीप्रसाद-जायसवाल (ख्रीष्टाब्दस्य १९२४), सत्यकेतु– विद्यालङ्कार (ख्रीष्टाब्दस्य २००१), शिवदत्त ज्ञानी (ख्रीष्टाब्दस्य १९४४), रामशरण शर्मा (ख्रीष्टाब्दस्य १९९०) च द्रष्टव्याः ।

12 रामशरण शर्मा (ख्रीष्टाब्दस्य १९९०, पृ. ९१), ऋक्-१/२४/१३, ६/२८/६, ८/४/९, ९२/६, १०/१९१/२-४ इत्यादयो द्रष्टव्याः ।

13 सभा-समित्यादीनां सन्दर्भेऽधिकपरिचर्चायै द्रष्टव्यानि– काशीप्रसाद जायसवाल (ख्रीष्टाब्दस्य १९२४), रामशरण शर्मा (ख्रीष्टाब्दस्य १९९०) सत्यकेतु विद्यालङ्कार (ख्रीष्टाब्दस्य २००१)

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

समुपलभ्यन्त एव ।[14]

आधुनिकेन राजनीतिशास्त्रेण सम्बद्धानि विषयवस्तूनि वैदिकवाङ्मये पर्याप्तानि सन्ति । अर्थशास्त्र-शुक्रनीति-महाभारतादिग्रन्थास्तु एतत्सम्बद्धानां विषयवस्तूनां भाण्डागारमेव । साम्प्रतं यावदपि हिमवत्खण्डस्य, समग्रस्य भारतवर्षस्य च ज्ञानस्य परम्परा वैदिकवाङ्मयतः सततं प्रवाहिता वर्तते । वस्तुतो राजनीति-राज्यतन्त्र-राष्ट्रनीति-सुशासनेत्यादितत्त्वानामनुशीलनाय अद्यापि पुरातना बह्व्यः सामग्र्यः समुपलब्धाः सन्ति ।

राज्य-राष्ट्रियतयोः सान्दर्भिकाः प्रसङ्गा बौद्धवाङ्मये जैनवाङ्मये च विद्यन्ते।[15] एकस्मिन्नेव समाजे सहास्तित्ववतां बौद्ध-जैन-वैदिकादिनां दृष्टिगतमैक्यञ्च दृश्यते। एषां समाजिकस्य राजनीतिकस्य च चिन्तनस्य समाना विशेषता साहज्येन दृग्गोचरीभवति । अस्याः खलु समानविशेषताया आधारेण राजनीतिशास्त्रस्य मौलिकस्रोतसोऽनुशीलनं क्रियते चेद् उदारराष्ट्रियतावादिसिद्धान्तस्य सैद्धान्तिक आधारः स्पष्टो भवति ।

अथर्ववेदे (८/१०/१) समुल्लिखितमस्ति– मानवसमाजो नैकाः संस्थाश्च क्रमशो विकसिताः सन्ति । सर्वप्रथमं सृष्टा संस्था परिवारः । अयं गार्हपत्यः प्रोक्तः । गार्हपत्ये पारिवारिकसङ्गठने वा उत्क्रान्तिकारणेन आहवनीयावस्था समागता । आह्वानकाले एकत्रीभवनशीलानां सङ्गठनमेव आहवनीयशब्दस्याशयः । ग्रामसङ्गठनसदृशी संस्थैव आहवनीयपदबोध्या आसीदिति अनुमीयते । आहवनीयसंस्थाया अनन्तरं दक्षिणाग्निसंस्था विकासिता । संस्थेयं जनपदस्तरीया संलक्ष्यते, यत्र ग्रामप्रतिनिधयो ग्रामण्यो वा एकत्रीभवन्ति स्म । अथ सभा-समितिनाम्न्यः संस्था विकसिताः । एवंरीत्या परिवारः,

---

14 यथा– बृहदारण्यकोपनिषद्, छान्दोग्योपनिषद् । एतञ्च द्रष्टव्यम्– दीक्षितार (ख्रीष्टाब्दस्य १९४९) ।

15 बौद्धसन्दर्भार्थं द्रष्टव्यम्– कस्मिकी (संवद् अनुल्लिखिता) गर्ड (ख्रीष्टाब्दस्य १०५६), जयसूर्या (ख्रीष्टाब्दस्य २००८), मुर (ख्रीष्टाब्दस्य २०१५, २०१६ । नीतिवाक्यामृतकारेण सोमदेवेन वैदिकपरम्पराया हिन्दुपरम्पराया वा नैकशः आचार्या समुल्लिखिताः परं सोमदेवस्तु जैन आसीदित्युच्यते ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

ग्रामः जनपदो भूत्वा सभा-समितिसदृशीनां राष्ट्रियसंस्थानां क्रमशः समुद्भवो विकासश्च दृश्यते ।[16]

ऋग्वेदे सर्वाधिकरूपेण समुल्लिखिता विदथाख्या संस्था पारिवारिकी संस्थासीदिति अनुमितमस्ति ।[17] इयं नरनारीणामुभयविधानां सहभागितायाः प्राचीनतमा जनसभासीदित्यपि कथितमस्ति ।[18] परिवारस्य कुलस्य वा सदस्यसङ्ख्याया आधिक्यदशायां सर्वे परिवारजना एकत्रीभूय नरनारीणां समानसहभागित्वेन पारिवारिके विषये विमर्शनम्, उपभोग्यानां वस्तूनां वितरणम्, क्रीडनम्, धार्मिकानुष्ठानम्, युद्धार्थं सज्जतासम्पादनमिति क्रियाकलापवती विदथ-संस्थासीद्[19] इति मन्यते चेत् संस्थेयं अथर्ववेदीयेन गार्हपत्येन आहवनीयेन च तोलनीया प्रतीयते । ऋग्वेदे (२/२६। ३) 'जन्मनः, विशः, जनः' एतेषामुल्लेखोऽस्ति । 'जन्मनः' एतस्य गोत्रत्वेन, परिवारस्य च गोष्ठीत्वेन ग्रहणं कर्तुं शक्यते । कतिपयानां जन्मनानां योगेन विशः संरच्यते स्म, तदुपरि च जनो भवति स्म ।[20] एतच्च क्रमगतविकासस्य द्योतकमस्ति ।

महाभारतस्य[21] शान्तिपर्वणोऽध्ययनेन बुद्ध्यते यद् अतिप्राचीनकाले राज्यं राजा दण्डः (विधिः) च नासन्-

न वै राज्यं न राजासीन्न दण्डो न च दाण्डिकः ।
धर्मेणैव प्रजाः सर्वा रक्षन्ति स्म परस्परम् ॥
पाल्यमानास्तथान्योन्यं नरा धर्मेण भारत ॥

भावार्थः – पुरा नहि राज्यमासीत्, न राजा, न दण्डः, न च दण्डविधाता । सर्वाः

---

16 विद्यालङ्कार (ख्रीष्टाब्दस्य २००१), पृ. ४२, पृ. २७७ च ।

17 रामशरण शर्मा (ख्रीष्टाब्दस्य १९९०), पृ. ९३ ।

18 रामशरण शर्मा (ख्रीष्टाब्दस्य १९९०), पृ. १०४ ।

19 रामशरण शर्मा (ख्रीष्टाब्दस्य १९९०), द्रष्टव्यम् ।

20 दीक्षित (वैक्रमाब्दस्य २०४६) पृ. १८७ ।
एतस्यैव पुस्तकस्य पृ. १८८ च द्रष्टव्यम् ।

21 प्रस्तुतस्य 'राज्यराष्ट्रम्' इति पुस्तकस्यानुसन्धानक्रमे परमहंस-स्वामि-जगदीश्वरानन्द-सरस्वती-महाराजेनानूदितं सम्पादितं कृतटिप्पणि च महाभारतं (१९९८ ख्रीष्टाब्द) पठितमासीत् । सन्दर्भेऽस्मिन् विद्यालङ्कार (ख्रीष्टाब्दस्य २००१) च द्रष्टव्यम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

प्रजा धर्मेणैव पारस्परिकीं सुरक्षाव्यवस्थां कुर्वन्ति स्म । धर्मेणैव च मानवा मिथः पाल्यन्ते स्म ।

राज्यस्योद्भवविकासौ किमर्थं कथञ्च बभूव ? यावदृतेन धर्मेण च मानवव्यवहारः चलति स्म, तावन्मानवस्य (नरस्य, जनस्य, प्रजायाः, विशस्य) कृते राज्यस्यावश्यकता नानुभूता । तत् सुखस्य युगमासीत्[22], यत्र दैन्यम् (अभावः), मोहः, लोभः, कामः (निजसम्पत्तेरेषणा), रागः, अराजकता (मत्स्यन्यायः) च नासन् । महाभारतस्य शान्तिपर्वणि, नारदस्मृति-बृहस्पतिस्मृत्यादिग्रन्थेषु, बौद्ध-परम्पराया दीर्घनिकाये च प्रारम्भिकशान्तेः, सदाचारिणः, साम्राज्यस्य च विशदं वर्णनं प्राप्यते ।[23] जैनपरम्परायाञ्च सन्दर्भेऽस्मिन् बौद्धवैदिकपरम्परानुगुणं वर्णनमस्ति[24], येन कल्पवृक्षस्य युगस्याभावे दैन्यावस्थागमनं सङ्केत्यते ।

यदा तु अराजकताया अवस्था समागता, तान्निराकरणाय सामाजिकीं सुव्यवस्थां सुनिश्चेतुं दण्डनीतिः, राज्यम्, राजा (शासकः), राज्यस्य नैके निकायाश्च अपेक्षिताः । महाभारतस्य शान्तिपर्वणि भीष्म-युधिष्ठिरसंवादमाध्यमेन राज्यस्य (संस्थायाः), राज्ञः (शासकस्य), दण्डनीतेः (विधेः) च उद्भवविषये भारतवर्षीया मान्यता प्रकाशिता वर्तते । अराजकताया अवस्थां निराकर्तुं राज्योद्भवस्य मान्यता तत्रावलोक्यते । दैन्यावस्थायाः समुत्पत्त्या सहैव मानवसमाजे समस्या समुत्पन्नेति प्रकृतसंवादाद्विज्ञायते । उपभोग्यानां पदार्थानां न्यूनता, दरिता, रोगः, क्षुधा, शोक इत्याद्या अवस्था दैन्यपदेन बोद्धुं शक्यन्ते । दैन्यकारणेनैव मोहस्य (व्यक्तिगतसम्पत्तेरासक्तेः) अवस्था समागता ।[25] मोहकारणेनैव मनुष्या अज्ञानिनो लुब्धाश्च अजायन्त ।

22 अतिप्राचीनकालस्यास्य सुखस्य विषयेऽधिकपरिचर्चायै द्रष्टव्यम्– अधिकारी निर्मलमणि (वैक्रमाब्दस्य २०७६) ।

वैज्ञानिक युगको आधारशिला (द्वि.संस्क.), काठमाण्डौ : युगनिर्माण महिला समाज नेपाल ।

23 ज्ञानी (ख्रीष्टाब्दस्य १९४४) पृ. १७६ । बौद्धग्रन्थानां सन्दर्भेऽधिकपरिचर्चायै द्रष्टव्यम्– मुर (ख्रीष्टाब्दस्य २०१५ - २०१६) ।

24 रामशरण शर्मा (ख्रीष्टाब्दस्य १९९०), पृ. ६५ ।

अनेन ब्राह्मणानां बौद्धानां जैनानां सन्दर्भश्च समुल्लिखितोऽस्ति ।

25 'बुभुक्षितः किं न करोति पापम्' बुभुक्षापीडितो जनः तच्छान्तये पापकर्म कर्तुञ्च शक्नोतीति

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

लोभात् (सम्पत्तौ स्वस्वामित्वकामनायाः) कामस्य, कामाद् रागस्य (सम्पत्तौ स्वस्वामित्वविचारस्य, ममत्व-परकीयत्वयोः सङ्घर्षस्य च) समुद्भवेन कर्तव्याकर्तव्ययोर्विवेको विनष्टः । एवंरीत्या मनुष्या अज्ञानिनोऽविवेकिनो भ्रष्टाचारिणश्च भूत्वा धर्मोऽपि प्रणष्टः । धर्मविनाशस्य सैवावस्था अराजकतायाः (मत्स्यन्यायस्य प्रभावस्य) अवस्था प्रोच्यते । एवंरीत्या अराजकताया अवस्थातः पारं गन्तुं दण्डनीतिरुत्पन्ना । तदनुसारेण राज्यसंस्था, राजा (शासकः), राज्यावयवाश्च संस्थानीकृताः । तथ्यमेतन्महाभारतीयाच्छान्ति-पर्वणोऽध्ययनेनावगम्यते । मदनमणि-दीक्षितेन स्वशैल्या तदेव स्रोत एवं प्रस्तुतमस्ति–

> ...पुरा सत्ययुगं वरुणस्य ऋतयुगं वावर्तत । तस्मिन् आदिमे युगे सम्पत्तिर्न्यूनतमाया अपेक्षायाः पूरयित्री एव आसीत्, अधिकमुत्पादनं न भवति स्म । यतः समाजे शोषणं नासीत् । तेनैव च शोषणत उत्पन्नानां सामाजिकव्याधिनां नियन्त्रिकाया व्यवस्थायाः, राज्यस्य चावश्यकतापि नासीत् । तेषां पार्श्वे यादृशी सम्पद् भवति स्म, तासां तज्जीवनानां तच्छरीराणाञ्च सम्मानं कुर्वन्ति स्म । परिभाषया अभिलेखीकरणेन च शून्याः तदानीन्तना मानवाः प्राकृतिकनियमसदृश्या प्राकृतिकन्यायाधारितमान्यतया स्वतः प्रेरिताः सन्त ऋतस्य विवेकस्य प्रकृतेर्नियमानां वा पालनं कुर्वन्ति स्म । तां प्रेरणां विना तदानीन्तनो मानवसमाजः स्वात्मानं रक्षितुं विकासयितुञ्च शक्नोति स्म ।
> तथाविधः समाजो लोभकारणेन, लोभाल्लभ्यानामधिकवस्तूनामुत्पादने पतितो बभूव । लोभस्यातृप्तौ मोह-क्रोध-घृणा-मात्सर्याणि स्वतः समुद्भूतानि । ततस्तानि सर्वाणि नियन्तुं दण्डविधानस्य राज्यस्य च समुद्भवोऽजायत । तदेव तु भीष्मो युधिष्ठिरं प्रोवाच ।[26] महाभारतस्य प्रसङ्गेऽस्मिन् भूतकालस्य निर्देशो वर्तते । अतोऽतीव प्राचीनकालात् कथ्यमानस्यास्य प्रसङ्गस्य पुनरुक्तिर्महाभारते दृश्यते ।

वचनमिह सान्दर्भिकं वर्तते ।

26 दीक्षित (वैक्रमाब्दस्य २०४६), पृ. १८९ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

वायुपुराणस्य सन्दर्भमुद्धान्याभिहितमवाप्यते यद् विविधानां वर्णानां पारस्परिकं सङ्घर्षं रोद्धुं राज्यस्य समुदयोऽभवत् । वर्गसङ्घर्षरोधनाय राज्योत्पत्तिर्जातेति आधुनिकमतस्य पूर्वाभासरूपेण चायं प्रसङ्गः कथितोऽस्ति ।[27]

राज्योत्पत्तिविषये नैके सिद्धान्ता विद्यन्ते । प्रथमं क्रमिकविकासेन राज्यस्य संस्थानीकरणपूर्वकं पश्चात् संस्थाप्रमुखत्वेन राजा गणपतिः सम्राड् वा चितः, आहोस्वित् प्रथमं राज्ञः चयनेन पश्चादेव राज्यावयवा निर्मिता इत्यस्मिन् विषये मतैक्यं नावलोक्यते । एवंरीत्या सन्दर्भेऽस्मिन् मतवैविध्यं दृश्यते । अनेन मतवैविध्येन राज्यस्योद्देश्ये, प्रकार्यविषयिण्यां दृष्टौ, मान्यतायाञ्च किञ्चिद् अन्तरमुत्पन्नं नास्ति । राज्यस्य संस्थानीकरणस्य, राज्यप्रमुखस्य (राज्ञः) वा तदानीं प्रथमं कस्यापि अस्तित्वं स्यात्, राज्यस्योद्देश्यस्य, प्रकार्यस्य च विषये समाना मान्यतावलोक्यते ।

ऋग्वेदस्य दशम-मण्डलान्तर्गतेन पुरुषसूक्तेन सामाजिकानुबन्ध-सिद्धान्तस्य विकासाय आद्य आधारः प्रस्तुतोऽस्तीति कतिपयेऽध्येतार आमनन्ति ।[28] अथर्ववेदात् (८/१०/१) क्रमिकविकासस्य सिद्धान्तोऽवगम्यते । अस्मादेव वेदाद्विशः (जनः, प्रजा) राज्ञो वरणं निर्वाचनं वा करोति स्मेति तदानीन्तनाया निर्वाचनपद्धतिविषयेऽपि ज्ञायते (अथर्व. ३/४/२, ६/८७/१-२) र अर्थशास्त्र-शुक्रनीति-रामायण-महाभारतादिग्रन्थानामध्ययनेन राज्यस्योत्पत्तिविषये सामाजिक-सन्धि-सिद्धान्तः (Theory of Social Contract) समयवादो वा मान्य आसीदिति ज्ञायते । महाभारतस्य शान्तिपर्वण्येव सन्दर्भोऽयं प्राप्यते ।[29] पुरा अन्यायावस्थायां तस्मादन्यायात् स्वात्मानं रक्षितुं प्रजाभिर्मिलित्वा विवस्वतः पुत्रो मनू राजा सम्पादित इत्युल्लेखोऽर्थशास्त्रस्य प्रथमेऽधिकरणे द्वादशेऽध्याये वर्तते ।[30] प्रजाभी राज्ञे करदानम्, राज्ञा च प्रजानां रक्षणं विधेयमिति सन्धिपूर्वकं राजा चितः । कालान्तरे च राज्यसंस्था

27 रामशरण शर्मा (ख्रीष्टाब्दस्य १९९०), पृ. ६७-६८ ।

28 यथा– दीक्षित (वैक्रमाब्दस्य २०४६), पृ. १८८ ।

29 विद्यालङ्कार (ख्रीष्टाब्दस्य २००१), पृ. २८३-२८४ ।

30 लुइटेल (ख्रीष्टाब्दस्य २०६८), पृ. २२ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

विकसितेति मान्यताया अस्तित्वमासीदीति तात्त्पर्यमस्माद्बुद्धयते।

क्रमिकविकास-सामाजिकसन्ध्योः सिद्धान्तयोः सामञ्जस्यं स्थापयितुं शक्यते। क्रमिकविकासस्य एकस्मिन् चरणे सामाजिकसन्धिपूर्वकं दण्डनीती राज्यञ्च सत्तामाप्नुतामिति कथनेन द्वयोरेव सिद्धान्तयोः समन्वयो जायते। राज्यस्य संस्थानीकरणस्योद्देश्यं मत्स्यन्यायस्य निराकरणमासीदिति तथ्ये तु स्पष्टतो मतैक्यं समीक्ष्यते।

स्वामिनः प्रपन्नाचार्यस्य प्रथिते 'वेदमा के छ ?' इव्याख्ये ग्रन्थे सन्दर्भेऽस्मिन् प्रस्तुतोऽनुच्छेद एवमस्ति–

> वैदिककालस्य अत्यन्तं सुबद्धस्य नियमस्य, धर्मकर्मणि रतानामार्यप्रजानां राष्ट्रियभावनायाश्च विषयो यजुर्वेदस्य नवमाध्यायस्य त्रयोविंशेन मन्त्रेण प्रस्तुतोऽस्ति। 'वयं राष्ट्रे जागृयाम पुरोहिताः'। यदि मानवा वन्या असभ्याश्च स्युस्तर्हि राष्ट्रनाम मन्त्रे किमर्थमायात् ? तच्च नहि साधारणमपि तु सचेतसः चिन्तनशीलस्य मानसव्यापारादभिहितमिति बुद्धयते। इह पुरोहित-जागृयामशब्दौ तत्कालीनेन विषयेण सह मननीयमस्ति। **अग्निमीडे पुरोहितमिति** ऋग्वेदस्यादिमन्त्रे यास्क-सायणाभ्यां प्रतिपादित उन्नायकं गतिशीलं राष्ट्रमग्रेसारयतीति अर्थश्चात्र स्पष्टतया वर्णितोऽस्ति। राष्ट्रनिर्माणं भवति चेत्तस्य राष्ट्रस्य स्वकीयस्य शासनस्य व्यवहारस्य नियमस्य विधानस्य च भावः स्वतःसिद्धो भवति। तस्मात् कारणाद् यजुर्वेदस्य द्वाविंशाध्यायस्य द्वाविंशेन मन्त्रेण राष्ट्रगीतं गीतं वर्तते। राष्ट्रगीतमिदं तदानीन्तनस्य राष्ट्रस्य सन्दर्भानुरूपाणां वस्तूनां वातावरणस्य च समुल्लेखनपूर्वकम् **'आब्रह्मन्'** इत्यत आरभ्य **राष्ट्रं गुपितं क्षत्रियस्य** (ऋ.मं.१०, सू. १०९ म. ३), अहं **राष्ट्री सङ्गमनी वसूनाम्** (ऋ.मं. १०, सू. १२५, म. ३), (ऋ.मं. १०, सू. १७३, म. १, २, ४, ५), (ऋ.मं १०, सू. २७४, म. १, ५) मन्त्रेषु विशेषतो राष्ट्रवर्णनमवाप्यते। **'आराष्ट्रे राजन्यः शूरः'** इत्यादिमन्त्रा ललितकलापूर्णं वासन्तिकं सुवर्णमयं

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

युगं स्मारयन्ति । अथर्ववेदे (५/१/७) **'ब्रह्मचर्येण तपसा राजा राष्ट्रं विरक्षति'** ब्रह्मचर्यतपोभ्यां सम्पन्नो राजा राष्ट्रं रक्षितुं प्रभवतीति स्पष्टतयाभिहितमस्ति ।[31]

बौद्ध-जैनवाङ्मयेऽपि राज्यस्योत्पत्तेर्विकासस्य च विषये क्रमिक-विकास एव समुल्लिखितोऽस्ति । एतेन सहैव सामाजिकसन्धेश्च विषये वैदिकहिन्दुमान्यतायामिव प्रायः समानमेव वर्णनमवाप्यत इति प्रोच्यते।[32] अग्गणसुत्ते क्रमिकविकासस्य सामाजिकसन्धेश्च सिद्धान्ते सामञ्जस्यं दृश्यत इति विवरणं लभ्यते ।[33] तस्य विवरणस्य विश्लेषणेनावगम्यते यद् मानवैरुपभोक्तृवादिन्याः प्रवृत्तेः कारणेन प्रकृत्या स्वतःप्रदत्ताशनेन सन्तुष्टिमनवाप्य कृषिकर्म प्रारब्धम् । तदर्थमपेक्षितः श्रमो विभाजितः । कालान्तरे सम्पत्तेर्निजस्वामित्वस्यावधारणाया मत्स्यन्यायावस्थायाश्च उद्भवो जात इति ज्ञायते । मत्स्यन्यायावस्थां निराकर्तुं तदानीं महासम्मताख्यो जनो राजा कल्पित इति प्रकरणं सामाजिकसन्धेः सिद्धान्तं सङ्केतयति ।[34] बौद्धजातकानुसारेण प्रारम्भिकीमराजकतामपाकर्तुं सुमेधो नृपो भावितः, यः सकलामराजकतां निराकृत्य मानवसमाजे पुनर्व्यवस्थां सङ्गठनञ्च संस्थापितवान् आसीत् ।[35] ईश्वरप्रदत्तायाः शासनसत्तायाः सङ्केतः शतपथब्राह्मणेऽवाप्यते ।[36] मनुस्मृतौ पुराणेषु च राज्यस्य दैव्या उत्पत्तेः सिद्धान्त उलभ्यते । अराजकस्थितेः त्राणार्थं राजा कल्पित इति मनुस्मृतेः सप्तमेऽध्याये समुल्लिखितमस्ति । इन्द्र-वायु-यम-सूर्याग्नि-वरुण-चन्द्र-कुबेराणामष्टानां देवानां सारभूतादंशाद् राजा समुद्भावित इति तत्र प्रोच्यते । अत एव मनुस्मृतौ राजा मानवरूपेण स्थिता 'महती देवता' वर्तत इत्यभिधीयते ।[37] एतन्मान्यतानुसारेण

31 स्वामी प्रपन्नाचार्य (वैक्रमाब्दस्य २०६०), पृ. ३५ ।

32 विद्यालङ्कार (ख्रीष्टाब्दस्य २००१), पृ. २८० ।

33 मुर (ख्रीष्टाब्दस्य २०१५, २०१६ अपि) द्रष्टव्यम् ।

34 मुर (ख्रीष्टाब्दस्य २०१५), पृ. ३८-३९, ४२-४३ ।

35 ज्ञानी (ख्रीष्टाब्दस्य १९९४), पृ. १७५ ।

36 ज्ञानी (ख्रीष्टाब्दस्य १९९४), पृ. १७७ ।

37 सोऽग्निर्भवति वायुश्च सोऽर्कः सोमः स धर्मराट् ।
स कुबेरः स वरुणः स महेन्द्रः प्रभावतः ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

राज्ञः प्रभुत्वस्य विस्तारितं संस्थानीकृतञ्च स्वरूपं राज्यरूपेण विकसितं दृश्यते ।[38] राज्यस्य संस्थानीकरणस्योद्देश्यं मत्स्यन्यायस्य निराकरणमासीदिति तथ्ये क्रमिकविकासस्य, सामाजिकसन्धेर्दैव्युत्पत्तेश्च सिद्धान्तानां मतैक्यं विलोक्यते ।

ऐतरेयब्राह्मणे राज्योत्पत्तेर्युद्धमूलकः सिद्धान्तश्च लभ्यते । पुरा असुराणामेव राजा परिकल्पित आसीत् । देवानां राजा आसीत् । समरेऽसुरेभ्यः परिजिताः सन्तः पराजयकारणस्य विश्लेषणेन राज्ञोऽभावस्यैव तत्कारणतां विनिश्चित्य देवैश्च राजा चित इत्यभिहितं वर्तते (ऐतरेयब्राह्मणम् १/१४) ।[39] युद्धे विजयार्थं सर्वाधिकारसम्पन्नं राजानं परिकल्प्य तेनैव राज्ञा शासन-संयन्त्रेषु विनिर्मितेषु राज्यस्य संस्थानीकरणमभूदिति तात्पर्यमस्य बोद्धुं शक्यते ।

एवंरीत्या प्रथमं क्रमिकविकासतो राज्यस्य संस्थानीकणपूर्वकं पश्चात् संस्थाप्रमुखः (राजा, गणपतिः, सम्राड् वा) चित इति तथ्यमथर्ववेदस्य साक्ष्येण समुद्घाट्यते चेद् ऐतरेयब्राह्मणम्, महाभारतम्, मनुस्मृतिः, अर्थशास्त्रमित्यादीनां ग्रन्थानामनुशीलनेन प्रथमं राज्ञः परिकल्पनपूर्वकमेव पश्चात्तेनैव शासनसंयन्त्रं निर्माय राज्यस्य संस्थानीकरणं जातमिति तथ्यमवगम्यते । अस्य तथ्यद्वयस्य सहविश्लेषणमावश्यकम् । एतत्तथ्यद्वयं सम्भवतः पृथक्कालिके पृथक्स्थानीये च परिघटने इङ्गितीकरोति । वैदिकग्रन्थेभ्यो ज्ञायते यत् प्राचीनकालेऽपि नैकानि राष्ट्राणि आसन् । पारस्परिकस्य युद्धस्य दौत्यसमबन्धस्य च प्रसङ्गा

बालोऽपि नावमन्तव्यो मनुष्य इति भूमिपः ।
महती देवता ह्येषा नररूपेण तिष्ठति ।। (मनुस्मृतिः ७/७-८) ।
एवं बनर्जी (ख्रीष्टाब्दस्य १९८०) च द्रष्टव्यम् ।

38 राज्ञः प्रभुत्वस्य सर्वोच्चत्वस्वीकारेऽधिकानां राज्यानां संस्थानीकरणे शोभनः प्रभावो जातोऽवलोक्यते चेत् कासुचिदवस्थासु राजसन्ततिभिः तन्मान्यताया दुरुपयोगेण राज्यमपि पैतृकसम्पतिरिव दायभागान् विभज्य भुक्तमिति विकृतिश्च दृश्यते । नेपालस्य भक्तपुरस्य राज्ञो रायमल्लस्य सन्ततयो लघुं भक्तपुरनगरं त्रिधा चतुर्धा वा विभज्य नगरखण्डशासकत्वेन शासनमकुर्वन्निति दृष्टान्तोऽत्र समुल्लेख्योऽस्ति । [नेपाल (वैक्रमाब्दस्य २०६६), पृ. २३]

39 रामशरणः शर्मा एतत्तथ्यमनुबन्धसिद्धान्तरूपेण प्रस्तुतवान् अस्ति । (ख्रीष्टाब्दस्य १९९०) पृ. ७८ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

अपि तत्र विद्यन्ते ।[40] राष्ट्रस्य प्रभुत्वविस्ताराय अश्वमेधयज्ञानुष्ठानस्य सन्दर्भः शतपथब्राह्मणात् विज्ञायते । एवञ्च परदेशान् विजित्य वशीकृत्य चक्रवर्तिसमाट्पदस्य लब्धारो विजिगीषवः तस्मिन् युगेऽपि आसन्निति संलक्ष्यते ।[41] अनेकेषां राष्ट्राणामस्तित्ववति तस्मिन् युगे समेषां राष्ट्राणामुद्भव एकेनैव हेतुना विधिना वा बभूवेति मननं तर्कसङ्गतं न भवति ।

विभिन्नेषु स्थानेषु विविधैः हेतुभी राज्यसंस्थानां प्रादुर्भूतिर्हि राज्योत्पत्तिसम्बन्धे नेकेषां सिद्धान्तानामवाप्तेः कारणं स्यात् । क्वचित् क्रमिकविकासस्य परिणामरूपेण, क्वचिद्दैव्या वैधानिकताया उद्घोषकारणेन, क्वचिच्च युद्धस्य, कस्याश्चन तत्कालीनाया अपेक्षाया हेतुना वा तदानीं राजकीयसंस्थाया राजकीयसंरचनाया आवश्यकता स्वीकृता स्यात् । कुत्रचिद् निश्चितस्य भूखण्डस्य निवासिनां सर्वसम्मतिमवाप्य सामाजिकसन्धेः (Social contract) कारणेन, कुत्रचिच्च बलवतो विजिगीषोर्वाञ्छया राज्यसंस्था प्रारब्धा भवेत् । राज्यस्योद्गमहेतुत्वेन राज्योद्भवाय तद्विकासाय च विविधा पारिस्थितिकी सम्भाव्यता (situation probability) भूमिकां निर्वहतीति निश्चेतुं शक्यते । आधुनिके युगे च विविधैः कारणैर्नैकेषां राज्यानां जनिर्दृश्यते । राज्यस्वरूपेण सिङ्गापुर, पाकिस्तान, साउदी अरब, संयुक्त अरब इमिरेट्स (यु.ए.इ) इत्येषां तुलना विधीयते चेदमीषां कारणेषु परिस्थितिषु च वैविध्यं विलोक्यते । आधुनिके युगे राज्यानामुद्भवस्य नैकानि कारणानि दृश्यन्ते चेत् प्राचीने युगेऽपि कारणमेकमात्रं भवितुं नार्हति । विविधानां पारिस्थितिकसम्भाव्यतायाः कारणेन राज्योत्पत्तिः सम्भवतीति मान्यतैव समीचीनानुभूयत इत्यभिप्रायः ।

राज्योद्भवविषये विविधानां सिद्धान्तानां सत्त्वेऽपि राज्यसंस्थया अराजकताया निराकरणेन सुव्यवस्था सम्पादितेति विषये सर्वेषां मतैक्यं वर्तते । राज्यस्यावधारणया सहैव तेन राज्येन गृहीतस्य भूभागस्य, तत्रत्यानां विशानां (जनानां प्रजानां लोकानां वा) च समष्टिरूपं राष्ट्रमित्यभिहितम् । राज्येनैव संस्थानीकृतस्य राष्ट्रियस्वरूपस्याधारं निर्माय राष्ट्रस्यास्तित्वं साधितमासीदित्यर्थः ।

40 स्वामी प्रपन्नाचार्य (वैक्रमाब्दस्य २०६०) पृ. ४१ ।

41 शर्मा रघुनन्दन (खीष्टाब्दस्य १९९०), पृ. ३०५-३०६ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

इह भूभाग-जनयोरुभयोरेव सहविद्यमानतायाः (Simultaneity) मापदण्डोऽत्यन्तं महत्त्वपूर्णोऽस्ति । अवस्थायामस्यां राज्यं राष्ट्रञ्च समानार्थके दृश्येते । वैदिकवाङ्मयबोध्ये जनपदे जनराज्ये राष्ट्रे चेयं विशेषतावर्तत । परिवर्तिनीतिहासेऽपि सहविद्यमानताया सैव मान्यता दृश्यते । **"न ह्यजनो जनपदो राज्यमजनपदं वा भवतीति कौटिल्यः"** इति अर्थशास्त्रस्य त्रयोदशस्याधिकरणस्य चतुर्थेऽध्याये, **"स्थावरं जङ्गमं चापि राष्ट्रशब्देन गीयते"** इति शुक्रनीतौ च सैव मान्यतावलम्बितेति पुनरुल्लेख्यमस्ति ।

अत्राविस्मरणीयं तथ्यमस्ति यद् भूमिजनाभ्यामुभयाभ्यां सहविद्यमानताया राष्ट्रस्य कृतेऽनिवार्यपूर्वाधारत्वेऽपि एतावेव नहि पर्याप्तौ । आङ्ग्लभाषायामवस्थेयम् (Necessary Condition but not Sufficient) इत्युक्तमवाप्यते । यतो हि, जनभूभागाभ्यां सहैव शासनस्य संरचना, वैधानिकता च राज्यमूलकस्य राष्ट्रस्यानिवार्यतत्त्वरूपेण गृह्येते । प्राचीने राजनीतिशास्त्रे सप्ताङ्गराज्यस्य चिन्तनमवाप्यते । राज्यस्य सप्ताङ्गसन्दर्भे महाभारतम् (शान्तिपर्व), शुक्रनीतिः, कौटिल्यीयमर्थशास्त्रमित्यादिषु ग्रन्थेषु समुल्लिखितमस्ति । प्राचीनानां साम्प्रतिकीनाञ्च मान्यतानां विश्लेषणेन राज्यसंरचनायै भूभागस्य जनानां शासकीयवैधानिकताया एवञ्च अन्तरराष्ट्रिय-मान्यतासहितानामवयवानामपेक्षा दृश्यते । केनापि देशेन विश्वसंस्थारूपस्य संयुक्त-राष्ट्रसङ्घस्य सदस्यताग्रहणाय पूरणीयो मापदण्डो विचार्यते चेद् आधुनिकसन्दर्भे राज्यस्य मान्यता कीदृशी वर्तत तथ्यमेतत् प्रकाश्यते ।[42]

अतिप्राचीनकालादेव हिमवत्खण्डे, सकले भारतवर्षे च जनपदे देशे राष्ट्रे वा समावेशीकरणं मूलचरित्रमासीत्, न तु बहिष्करणम् । तेषु जातीयं बहिष्करणमेकम् । ग्रामीणा नहि नागरिका इति ग्रीसीयानां रोमीयानाञ्च[43] मान्यता बहिष्करणवादिन्याः प्रवृत्तेरेव एकमुदाहरणम्, परन्तु भारतवर्षीयेषु राज्येषु कस्यचन जनरूपेण मान्यतायै, तन्निषेधाय वा जातीयं बहिष्करणं ग्रामविषयको हीनाग्रहो वा न दृश्यते । अतो राष्ट्रं स्वाभाविकरूपेण वैविध्यपूर्णं भवति स्म ।

42 https://www.un.org.en/sections/member-states/about-un-membership/index.html

43 पोखरेल (वैक्रमाब्दस्य २०५५), पृ. २९० ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri
बहुजातीयं बहुधार्मिकं बहुसांस्कृतिकं बहुभाषिकञ्च सदपि समाना राष्ट्रियता। राष्ट्रस्य एतच्चरित्रहेतुना उदारराष्ट्रियतावादिनी मान्यता समुद्भासिता दृश्यते। अत एव वैदिकमान्यतानुरूपे राष्ट्रे जातीयेन प्रजातीयेन सङ्कीर्णेनान्येन वाधारेण राष्ट्रियताया सीमनिर्धारणं नासीत्। राष्ट्रे जातीयं प्रजातीयमन्यहेतुकं वा वैविध्यं भवति स्म परन्तु वैभिन्न्यं नासीत्। यतो हि, राष्ट्रं समाने भूभागे निवसतां सर्वेषां विशानां (जनानां प्रजानां) समन्वये आधारितमासीत्।

वैदिकवाङ्मये यत्र तत्र राष्ट्रमुल्लिखितमस्ति। राष्ट्रे भूमिर्जनः (विशः, प्रजा, लोकः) चेति उभयोरेव अभेदेन समावेशोऽस्ति। राष्ट्रस्य जनाः समानजातयः समानप्रजातयः समानवर्णाश्च न भवन्ति स्म। तेषु वैविध्यं भवति स्म। क्वचिदपवादरूपेण एकजातीयस्य राज्यस्य तदानीं क्वचित् सत्त्वेऽपि राष्ट्रियताया आधार एक जैविकवंशीयता, एकजातीयता, एकप्रजातीयता, एकसाम्प्रदायिकतेत्यादयो मापदण्डा नासन्। राज्यस्तरे संस्थानीकरणात्पूर्वं राज्यस्तरे क्रमिकविकासस्य कस्मिँश्चिच्चरणे प्रारम्भिकसंस्थागतसंरचनायां कस्यचन एकस्यैव गोत्रस्य, कुलस्य, वर्णस्य वा उपस्थितिरवश्यं सञ्जाता स्यात्[44] परन्तु राज्यस्तरस्य संस्थानीकरणेन राष्ट्रत्वेरूपेण समन्वितपरिचयनिर्माणावस्थायां राजनीतिकानि राष्ट्राण्येव हिमवत्खण्डे, सकले भारतवर्षे च संरचितान्यासन्।

वैदिकवाङ्मये काव्याऽऽर्थशास्त्र-दण्डनीति-राजनीति-नीतिशास्त्र-राजधर्मशास्त्रान्तर्गतेषु नैकेषु ग्रन्थेषु राज्यस्य विविधानामवयवानां प्रकार्याणाञ्च विषये चिन्तनमवाप्यते। स्मृतिग्रन्थेषु पुराणेषु च राजधर्मस्य प्रासङ्गिकः समुल्लेखः परिचर्चा वा प्राप्यते। समाना जातीयता, प्रजातीयता, अन्य आधारो (यथा– कुलम्, संस्कृतिः, सम्प्रदायः, भौगोलिकता, भाषा इत्यादि) वेत्यनेन एकलपरिचयेन समूहेन वा राज्यं भाव्यमिति स्थितिः तेषां कस्मिँश्चिदपि ग्रन्थे निर्दिष्टा नाधिगम्यते। कस्मिँश्चिदपि राष्ट्रे निवसन्तो जनाः (विशाः, प्रजाः, नागरिका वा) किमपि कुलं कापि जातिः प्रजातिर्वा भवतु, वैदिकमान्यतानुसारेण सर्वे च ते सजाताः सनाभयश्च मान्यन्ते (अथर्व. १/९/४, १/३०/१,

44 जायसवाल (ख्रीष्टाब्दस्य १९२४), पृ. १३४ द्रष्टव्यम्।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

३/३/५, तैत्तिरीयब्राह्मणम् २/१/३/२ इत्यादि)। उपर्युक्तो सजात-सनाभि-सम्बन्धो जैविके आनुवंशिके गोत्रीये च सम्बन्धे सीमबद्धो नावर्तत। जननीरूपाया जन्मभूमेः सर्वेषां जनानां (प्रजानां विशानां लोकानां नागरिकाणां) सम्बन्धे तत्प्रोक्तमिति तथ्यं मननीयमस्ति। 'समानप्रसवात्मिका जाति'रिति सूत्रस्यानुसारेण संसारस्य सकलैर्नरनारीभिः परस्परं परिणयेन सन्ततेरुत्पादनसम्भवात् संसारस्य सर्वेऽपि मानवाः समानजातीयाः सन्तीति[45] कथनमिह समुल्लेखनीयमस्ति। अनया तादात्म्यापन्ना मान्यता किरातानां मुन्धुमपरम्परायाञ्च वर्तत इति कथ्यते–

विश्वस्य सकला मानवाः तागेरा-निङ्वा-भूमाङित्यस्य माङ्सा-हाङ्साख्यौ मेन्छाम्गेन-नाम्याप्मीसेति सन्ति। समग्रतो मुजिना-खेयङ्नातो जातः प्रथमो मानवो युक्पङ्गेन-सावान्केम्बा प्रथमो महापुरुष आसीत्। तस्यैव वंशजाः सहस्रशः सन्ततयो विश्वस्मिन् विश्वे प्रसृत्य न्युषिताः सन्ति। इयमेव अनुवंशीया मानवजातिर्मुन्धुमग्रन्थे सावायेत्हाङ्सेति प्रोच्यते। सावायेत्हाङ्साख्यो मनातेम्वे, मनाखाम्ना मिक्फुरा खाम्फुरादेन इति च मानवभूमेर्वितताां सकलां मानवजातिं सम्बोधयतः। अतो मुन्धुमग्रन्थेन विश्वस्य समेषां मानवानामेकमेव मानवजातित्वं प्रमाणीकृतमस्ति।[46]

अद्यतनी का कथा, अतिप्राचीनकालेऽपि राज्ये जातीया बहुलतासीत्। अतिविशाले साम्राज्ये तु भवत्येव, लघीयसि जनपदे नगरे ग्रामे च नैककुलानां जनाः (विशाः) भवन्ति स्म। ऋग्वेदम् (ऋक् २/२६/३) आधृत्य निश्चित्य वक्तुं शक्यते यत् कस्मिँश्चिदपि जनपदेऽनेकेषां गोत्र-कुलानां जना भवन्ति स्म। यजुर्वेदस्य तृतीयाध्यायस्य चतुश्चत्वारिंशस्य "यदग्रामे यदरण्ये यत्सभायाम्" इति मन्त्रस्यार्थाधारेण पुरा ग्रामसभाया व्यवस्थासीत्, अरण्ये च विचारगोष्ठी भवति स्म इत्यभिहितमवाप्यते।[47] अथर्ववेदानुशीलेन च राष्ट्रे

45 शर्मा रघुनन्दन (ख्रीष्टाब्दस्य १९९०), पृ. ६१५।
46 सेर्मा लिम्बू (वैक्रमाब्दस्य २०७१ ख), पृ. ५१।
47 स्वामी प्रपन्नाचार्य (वैक्रमाब्दस्य २०६०), पृ. ३६।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

पर्याप्तं बाहुल्यमासीदित्यनुमीयते । सर्वत्र सर्ववर्णजातीया जना भवन्तीति[48] महाभारतस्य कर्णपर्वणि प्रोक्तमस्ति । कुलाद् ग्रामो महानित्यस्य द्योतकः श्लोकः (**त्यजेत् कुलार्थे पुरुषं ग्रामस्यार्थे कुलं त्यजेत् । ग्रामं जनपदस्यार्थे, आत्मार्थे पृथिवीं त्यजेत् ॥**) इति महाभारतान्तर्गतायां विदुरनीतौ च वर्तते । चाणक्यनीतेः (**त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत् । ग्रामं जनपदस्यार्थे, आत्मार्थे पृथिवीं त्यजेत् ॥**) श्लोकोऽयं कुलाद् ग्रामस्य महनीयताम्, ग्रामे नैकेषां कुलानां विद्यमानताञ्च दर्शयति । उपर्युक्ताभ्यां द्वाभ्यामेव श्लोकाभ्यां ग्रामाज्जनपदस्य महत्तरता तु स्पष्टतः प्रकाशितैव । पाणिनेरष्टाध्याय्या विष्णुगुप्तस्य कौटिल्यीयाऽऽर्थशास्त्रस्यानुसारेण च जनपदस्य ग्रामग्रामत्वं हि ज्ञायते ।[49] लघीयसि ग्रामेऽपि नैकानि कुलानि भवन्ति स्म चेज्जनपदाद् बृहत्तरसाम्राज्यपर्यन्तं स्थितिः कियती वैविध्यपूर्णा स्यात्! विचारयाम । जनपदस्य स्थापनावासरे देशान्तरेभ्यश्च जनानामाह्वनीयताभिधायकस्य "भूतपूर्वमभूतपूर्वं वा जनपदं परदेशापवाहनेन स्वदेशाभिष्यन्दवमनेन वा निवेशयेत्" इति साक्ष्यञ्च राज्यस्य बहुजातीयता-बहुभाषिकता-बहुसांस्कृतिकतादिवैशिष्ट्यं तदानीमपि स्वाभाविकं मन्यते स्मेति तथ्यं पोषयति ।

अतिप्राचीनकाले राज्यस्य परिचायकस्य निर्णायकप्रभावस्य विषये एकं सान्दर्भिकमुद्धरणमिह प्रस्तूयते–

> जनपदान्तर्गतत्वेन लघूनि नगराणि ग्रामनिकरश्च भवन्ति स्म । तत्रत्याः प्रजा राजा च जनपद-नाम्नैव परिचीयन्ते स्म । आदौ कश्चन प्रभावशाली नायको राजा समूहो वा सर्ववर्ण-जातीयान् अवयवाँश्च समाहत्य एकं जनपदं (राज्यं) निर्माति स्म । पारस्पारिकेन साहाय्येन तस्य शक्तिमत्तां सम्पादयति स्म । ततोऽसौ जनपदः तस्यैव प्रमुखस्य वर्गस्य वा नाम्ना परिचयङ्गच्छति स्म । कालान्तरे जनपदसम्बद्धाः, तत्र वास्तव्याः, राजकुलम्, सम्प्रदायश्च जनपदनाम्नैव ख्यातिं

---

48 अधिकपरिचर्चायै द्रष्टव्यम्– आचार्य (वैक्रमाब्दस्य २०७४) पृ. २६-२८ ।

49 विद्यालङ्कार (ख्रीष्टाब्दस्य २००१) पृ. १२१ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

याति स्म । एवमादौ केषाञ्चन जनानां वर्गस्य वा नाम्नारब्धत्वेऽपि तन्नामपदैरेव समाजस्य सर्वेऽपि वर्णजातीया अवयवाश्च ज्ञाप्यन्ते स्म । कदाचित् स्थाननाम्नैव जनपदानाम्, जनपदनाम्नैव च तत्रत्या राजवंश-प्रजादयः परिचयं लभन्ते स्म । इत्थमेकः जनपद एको गणः (समुदायः) मन्यते स्म । एकस्मिन्नेव जनपदे गणे वा क्षेत्राद्याधारेण लघीयांसोऽपरे गणाश्च भवन्ति स्म ।[50]

गण-शब्दः शासनप्रणालीबोधिका संज्ञास्तीति तथ्यं जायसवालमहोदयेन प्रकाशितमस्ति ।[51] गणशब्दस्य आङ्ग्लानुवादनक्रमे बेलायतदेशेऽनुचितरीत्या ट्राइब (Tribe) एतेन योजितः सन्दर्भो जायसवालतोऽवगम्यते (पृ.२९) । तेनैवानुचितेनानुवादेन भ्रमः समुत्पन्नोऽवर्तत । वस्तुतो बौद्ध-जैन-वैदिकपरम्पराणां ग्रन्थेषु समुल्लिखिते गणशब्दे वर्ण-जाति-प्रजातिवाचकता नास्तीति विषये प्रबलं प्रमाणन्तेन प्रस्तुतं वर्तते । गणस्य यच्छुद्धं यथार्थञ्च स्वरूपं भवति स्म, तस्मिन् कश्चन वंशानुक्रमिकः सिद्धान्तः सम्मिलितो नासीदिति जायसवालवर्येण (पृ.८५) प्रोक्तम् । राज्यानां नामधेयाधारेणैव नागरिकाणां नामकरणस्यानल्पा दृष्टान्ता (मद्रः, यौधेयः, मालवः, क्षुद्रक इत्यादयः) भारतवर्षेऽवाप्यन्ते ।[52]

राज्यस्य प्रत्येकं सर्वाविधाँश्च जनान् (विशः, प्रजाः, लोकाः, गण इत्येतान्) राजनीतिकरूपेण समाहृत्य समानस्वामित्वेनाऽऽत्मीयत्वेन च युक्तं राष्ट्रं निर्मातुमुदारराष्ट्रियतावादी विचारो व्यवहारश्च अत्रत्यं वैशिष्ट्यमस्तीति उपर्युल्लिखितानां नैकेषां साक्ष्याणां तात्पर्यं वर्तते । एतन्नहि जातीयं राष्ट्रम्, अपि तु राजनीतिकं राष्ट्रं प्रमाणयति । तस्मात् कस्यचिदपि राज्यस्य सर्वेषां नागरिकाणामेकैव समाना राष्ट्रियता भवति । ते राष्ट्रमातुः समानवंशीया समानांशभाजश्च सन्तीति कथनं खलु वैदिक्या मान्यतया सह तादात्म्यात्पन्नो निष्कर्षो भवति । वैदिकमान्यतानुसारेण राष्ट्रे ग्रामः, नगरम्, जनपदः, प्रान्तो

---

50 आचार्य (वैक्रमाब्दस्य २०७४), पृ. २५-२६ ।

51 The term gana signifield the form of government. Samgha, on the other hand, signified the state. (jayswal, 1924, p. 28)

52 जायसवाल (खीष्टाब्दस्य १९२४), पृ. १३३-१३४ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

भवन्ति चेत्तत्रत्या नागरिकाः (विशाः, जनाः, प्रजाः, लोकाः) सर्वे च ते राष्ट्रिया भवन्ति । जातेः, प्रजातेः, वर्णस्य, नासाकृतेः, नयनप्रकारस्य, भू-सांस्कृतिकतायाः, स्थानीयपरिचयस्य, भाषाया इत्याद्याधारेण न कोऽपि अराष्ट्रियो भवति । अतिप्राचीनकालतः सहजीवित्वेन बौद्ध-जैन-वैदिक-किरातसहितस्य समुदायस्य मान्यतायामन्योन्यं तादात्म्यभावः स्वाभाविक एव।

२.२. राष्ट्रस्य परिभाषा

गतपरिचर्चात उदारराष्ट्रियताया अवधारणा-सैद्धान्तिकाधारौ निर्मितावेव। राज्योद्भवेन सहैव राज्याधिष्ठितस्य भूभागस्य तत्रत्यानां विशानां जनानां लोकानाञ्च समष्टिस्वरूपस्य राष्ट्रत्वाभिधानात्मकं तथ्यं प्रकाशितम्। राज्येन संस्थानीकृतस्य राष्ट्रियस्वरूपस्याधारं निर्माय राष्ट्रस्यास्तित्वं साधितमिति यथार्थपृष्ठभूमौ राज्यराष्ट्र-सिद्धान्तस्याधिनिर्माणसन्दर्भे राष्ट्रस्य परिभाषा इत्थं विहितास्ति–

> भू-राजनीतिक-वैधानिकतापन्नं निश्चित-भौगोलिक-सीमबद्धं राज्यमेव राष्ट्रं वर्तते, यत् स्वतन्त्रं स्वाधीनं सार्वभौमसत्तासम्पन्नञ्च भवति । एवञ्च यत्र विविधानां भाषा-जाति-प्रजाति-संस्कृति-समुदाय-सम्प्रदाय-भौगोलिकक्षेत्रादीनां समन्वयेन समष्टिगता राष्ट्रियता निर्धारिता भवति ।

अस्याः परिभाषाया अन्योन्याश्रितानि अन्तःसम्बद्धानि एवंविधानि अभिकथनानि विलसन्ति–

(क) राष्ट्रसंरचनायै भूमि-जनानां सहविद्यमानतावश्यकी । अतो भूमि-पदेन भू-राजनीतिक-वैधानिकतापन्ना निश्चितैका भौगोलिकसीमा बोद्धव्या। विविधानां भाषा-जाति-प्रजाति-संस्कृति-समुदाय-सम्प्रदाय-भौगोलिकक्षेत्राणां नागरिकाश्चेह जनपदेनाभिहिताः । देशस्य प्रत्येकं सर्वविधानाञ्च जनानां (नागरिकाणां) समन्वयेन समष्टिरूपताङ्गत्वेन राज्यराष्ट्रं नहि जातीयं राष्ट्रम्, अपि तु राजनीतिकं राष्ट्रं वर्तते ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

(ख) उपर्युक्तानां भूमि-जनानां सहविद्यमानतया संरचितस्य राज्यस्य आन्तरिकाणामङ्गानां (यथा– विधि-कार्यपालिका-व्यवस्थापिका-न्यायपालिकादिसंरचनासहितानां) वैधानिकता क्रियात्मकता प्रभुता प्रभावकारिता च अपेक्ष्यन्ते। सहैव अन्तरराष्ट्रिये समुदाये स्वत्रन्तस्य स्वाधीनस्य सार्वभौमसत्तासम्पन्नस्य च देशस्य रूपेण मान्यता विवक्षिता वर्तते।

(ग) नागरिकतायाः प्रमाणपत्रस्य माध्यमेन राष्ट्रियताया वैधानिकरूपेण प्रमाणीकरणस्याधिकारः क्षमता च राज्ये निहिते स्तः।

(घ) राज्यान्तर्गतेन भूभागेन नागरिकगतवैविध्यस्य समन्वयेन च समष्टिमवाप्य राष्ट्रियतायाः स्वरूपनिर्धारणं भवति।

राज्यराष्ट्र-सिद्धान्तेऽसौ राष्ट्रस्यावधारणा काश्यश्चिच्छताब्दीभ्यः पूर्वं युरोपमहाद्वीपीयसन्दर्भेऽभिनिर्मितस्य राष्ट्रस्य (Nation) तुलनायां भृशमुदारा वर्तते। उदार-सङ्कीर्णराष्ट्रियतयोः मान्यतायां प्रस्थानबिन्दुत एव पृथक्ता वर्तते। युरोपमहाद्वीपीयशैल्या राष्ट्रराज्ये (Nation State) जातिं (Ethnicity) प्रजातिं (Race) चाधृत्य राष्ट्रस्य परिभाषाया निर्माणहेतुना एकस्यैव राज्यस्यापि सर्वेषां नागरिकाणां समन्वयात्मिकाया राष्ट्रियतायाः तत्राभावेन बहिष्करण-समावेशीकरणरूपा अनिश्चयावस्था समापतति। अतोऽसौ सङ्कीर्णराष्ट्रियतावादिनी अवधारणा वर्तते। राज्यस्य प्रत्येकं सर्वप्रकारकाणाञ्च नागरिकाणामेकस्याः खलु समानराष्ट्रियताया मतस्यावलम्बिनी उदारराष्ट्रियतावादिनी मान्यतामाश्रित सिद्धान्त एव राज्यराष्ट्रम् (State Nation) इत्यभिधीयते।

२.३. सिद्धान्तयुग्मयुताः चतस्रोऽवधारणाः

राज्यराष्ट्रस्य अवधारणासिद्धान्तयोर्विमर्शसन्दर्भे राष्ट्रराज्यं द्विराष्ट्रियराज्यं बहुराष्ट्रियराज्यञ्चेति प्रतिस्पर्धिन्योऽवधारणाश्च परिचर्च्या भवन्ति। वस्तुतो वर्तमानसन्दर्भे राष्ट्रियताया अद्यावधिकव्याख्यायै सिद्धान्तद्वययुतानां चतसृणामवधारणानां सम्यग् बोधोऽनिवार्यः।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

राष्ट्रराज्यम्, द्विराष्ट्रियं राज्यम्, बहुराष्ट्रियं राज्यम्, राज्यराष्ट्रमिति च चतुर्णां मध्ये आद्यत्रयस्य अवधारणात्मको वैचारिकः सैद्धान्तिकश्च आधारः समानोऽस्ति परन्तु राज्यराष्ट्रस्याऽवधारणात्मको वैचारिकः सैद्धान्तिकश्च आधारः तेभ्यः पृथग् वर्तते ।

तस्माद् दार्शनिकवर्गीकरणेन राष्ट्रराज्यं द्विराष्ट्रियराज्यं बहुराष्ट्रियराज्यञ्चेति मान्यतात्रयमेकस्मिन् ध्रुवे, 'राज्यराष्ट्रम्' इति मान्यता च अपरध्रुवीया दृश्यते । अस्यां पृष्ठभूमौ 'राज्यराष्ट्रम्' इति एकः सिद्धान्तो राष्ट्रराज्यं द्विराष्ट्रियराज्यं बहुराष्ट्रियराज्यञ्चेति तिसृणां मान्यातानामपरः सिद्धान्त इति वक्तुं शक्यते । विमर्शस्य साहज्यप्रयोजनेन राष्ट्रराज्यं द्विराष्ट्रियराज्यं बहुराष्ट्रियराज्यञ्चेति अवधारणाः आधृतवान् सिद्धान्तः सङ्कीर्णराष्ट्रियतावादी सिद्धान्तोऽस्तीति वक्तुं शक्यते ।

राष्ट्रियताया उद्भवस्य राज्यसंरचनायाश्च क्रमे राष्ट्रराज्यं, द्वि-राष्ट्रियता, बहु-राष्ट्रियता चेति युरोपमहाद्वीपे स्थापिता मान्यता एकमीदृशं सिद्धान्तं प्रवर्धितवत्यः, यस्य आधारशिला राष्ट्रस्य सङ्कीर्णपरिभाषा वर्तते । एतादृशी सङ्कीर्णपरिभाषा समाजवादिभिः कम्युनिष्टपथानुयायिभिः पुञ्जवादिभिश्च अवलम्बिता वर्तते । अतः तेषां समानेयं मान्यता । लेनिनवादिन्या बहु-राष्ट्रियताया आधारशिला पुञ्जवादिनी राष्ट्रराज्यावधारणैव, यत्र एकस्यामेव भू-राजनीतिक-वैधानिकसंरचनायां नैकानि राष्ट्राणि कथं समावेश्यानीति प्रश्नस्य समाधानायासो वर्तते । राष्ट्रराज्यं द्विराष्ट्रियराज्यं बहुराष्ट्रियराज्यञ्चेति सिद्धान्तान् स्वान्तर्गतीकृतवत्याः समानमान्यताया विश्लेषणेन अस्यान्तः सङ्कीर्णः, पार्थक्यवादी, वैभिन्न्यवादी, अहङ्कारवादी, घृणावादी च विचारोऽस्तीति स्पष्टं भवति ।

राष्ट्रराज्यं द्विराष्ट्रियराज्यं बहुराष्ट्रियराज्याञ्चेति मान्यतायाः सङ्कीर्णराष्ट्रियतावादी सिद्धान्तः राष्ट्रस्य राष्ट्रियतायाश्च परिभाषायै जातिः (Ethnicity, Tribe, Clan), प्रजातिः (Race), भाषा (Language), क्षेत्रीयपरिचयः (Regional Identity), धर्मसम्प्रदायः (Religion), सांस्कृतिकपरिचयः (Cultural

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri
Identity) चेत्यादि प्राथमिकं तत्त्वं मनुते । एवंरीत्या सिद्धान्तोऽयं स्वाधीनं स्वतन्त्रं सार्वभौमसत्तासम्पन्नं देशं (राज्यं) राष्ट्रस्य राष्ट्रियतायाश्च परिभाषायै प्राथमिकं तत्त्वं न मनुते । प्राचीनयुरोपमहाद्वीपीयमान्यतानुसारेण राष्ट्रं (Nation) राज्यं (State) च पृथक् पृथक् तत्त्वम्, यत्र राष्ट्रं पूर्ववर्ति, राज्यञ्च परवर्ति मन्येते । राष्ट्र-राज्यसंज्ञयोः तत्र कदाचित् पर्यायत्वेन, कदाचिच्च विपर्यत्वेन प्रयोगो दृश्यते । इमे संज्ञे कदाचित् समानसंरचनां बोधयतश्चेत् कदाचिच्च पृथक् तत्त्वे सङ्केतयतः ।

युरोपमहाद्वीपकेन्द्रितं प्रतिमानं (Eurocentric Paradigm) भाषा, जातिः, प्रजातिः, धर्मसम्प्रदायः, संस्कृति-क्षेत्रगतः परिचयश्चेत्याद्याधारेण राष्ट्रस्य परिभाषां कुरुते । अत एव गतसमये युरोपमहाद्वीपीयदेशेषु एकाकिन्याः सत्तायाः स्थितिं यावत् प्रतिस्पर्धिराष्ट्रियतानां सङ्घर्षस्य अवस्था नायाति स्म । जाति-धर्म-संस्कृत्यादिवैविध्ययुतेषु नेपाल-भारतादिषु देशेषु तु प्रतिस्पर्धिराष्ट्रियतानां सङ्घर्षस्य कृते प्रोत्साहेन तेषां पृथक्तावादिदुरुत्साहवर्धनस्य अवस्था संलक्ष्यते । युरोपमहाद्वीपीया राष्ट्रराज्यमान्यता यदि स्वीक्रियेत, तर्हि तु पृथक् पृथग् जातयः, प्रजातयः, भाषाः, धर्मसम्प्रदायाः, सांस्कृतिकी क्षेत्रीया अस्तिता चेत्यादय एकस्मिन् देशे हि वर्तमाना सर्वेऽवयवा राष्ट्ररूपेण समुद्घोषयितुं सर्वे प्रभवन्तीति मन्तव्यम् । प्रत्येकं राष्ट्रं गच्छता कालेन राज्यस्य स्वरूपप्राप्तेर्महत्त्वाकाङ्क्षां कल्पयिष्यतीति हेतुना तस्यैव राष्ट्रस्य मान्यतामाधृत्य राज्यस्य संरचनार्थं प्रयतनं युरोपमहाद्वीपकेन्द्रितस्य प्रतिमानस्य प्राथमिकता वर्तते । अतो युरोपमहाद्वीपीयां मान्यतामाश्रिते राष्ट्रराज्ये देशस्य राज्यस्य वा भू-राजनीतिक-वैधानिकी अस्तिता गौणी भवति चेत् प्रतिस्पर्धिराष्ट्रियतानां सङ्घर्षश्च बीजत्वेन तत्र तिष्ठति । द्विराष्ट्रियराज्ये बहुराष्ट्रियराज्ये च प्रतिस्पर्धिराष्ट्रियतानामन्त्यहीनस्य सङ्घर्षस्यैव प्रबला सम्भावना भवति ।

राज्यस्योत्पत्त्या सहैव राष्ट्रियतायाश्च जनिर्भवतीति ऐतिहासिकं याथार्थ्यमस्ति । अस्यैव याथार्थ्यस्याऽऽत्मसात्कृतत्वेन राज्यराष्ट्र-सिद्धान्ते तस्यैव ऐतिहासिकसाक्ष्यस्याधारेण राष्ट्रस्य परिभाषा विहिता वर्तते । राज्यराष्ट्र-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

सिद्धान्त **उदारचरितानान्तु वसुधैव कुटुम्बकमिति** वैश्विकमान्यतामात्मसात्कृत्य प्रवर्तते । अतः सिद्धान्तोऽयं सङ्कीर्णतायां विद्वेषे घृणायाञ्च निहितं विखण्डनं राष्ट्रियतायाः परिभाषार्थं नहि स्वीकुरुते । सिद्धान्तोऽयं स्वतन्त्रस्य स्वाधीनस्य सार्वभौमसत्तासम्पन्नस्य देशस्य (राज्यस्य) भू-राजनीतिकं वैधानिकञ्च अस्तित्वं राष्ट्राराष्ट्रियतयोः परिभाषायै प्राथमिकं तत्त्वं मनुते । सिद्धान्तोऽयं स्वतन्त्रे स्वाधीने सार्वभौमसत्तासम्पन्ने च देशे (राज्ये) विद्यमानानि जातयः, प्रजातयः, भाषाः, धर्मसम्प्रदायाः, संस्कृति-क्षेत्रगतः परिचय इत्यादीनि तत्त्वानि समष्टिदृष्ट्या स्वस्मिन्नेव संयोजयति । अतो राज्यराष्ट्र-सिद्धान्तः परस्परं भिन्नान्यपि तानि तत्त्वानि मिथो विरुद्धानि, प्रतिस्पर्धीनि, राष्ट्रस्य स्वरूपेण विकासार्हाणि च न मनुते । तादृशानां विरोधानां शत्रुतायाश्च कृते किमपि कारणं न भवति । राज्यराष्ट्रे समष्टिगतस्य समन्वयात्मकस्य विचारस्य व्यवहारस्य च सत्त्वेन बहिष्करण-समावेशीकरणयोरनिश्चयावस्था, द्वन्द्वावस्था च न भवति ।

अतो राज्यराष्ट्रे राष्ट्रियतानां सङ्घर्षस्य कृते किञ्चित् स्थानं नावशिष्यते । भाषा-जाति-सम्प्रदायादिवैविध्ययुक्तस्य नेपालस्य, एतत्सदृशानामन्यदेशानाञ्च कृते सदैव स्वतन्त्रस्य स्वाधीनस्यसार्वभौमसत्तासम्पन्नस्य च राज्यस्य स्वरूपस्य च दार्ढ्यसम्पादकः सिद्धान्तोऽस्ति राज्यराष्ट्रम् (State Nation) । राज्यराष्ट्रमान्यतायाः स्थापनं कस्यापि देशस्य जातीयं प्रजातीयं भाषिकीं सांस्कृतिकीं साम्प्रदायिकीमन्याञ्च विविधतां योजयितुं सैद्धान्तिकाधारस्य लब्धिवर्तते । तदानीं राज्यस्य नागरिकाणां मौलिकवैविध्येन सह समष्टि-सहृदयतायाः सम्बन्धः सम्भवति । राष्ट्रराज्यं द्विराष्ट्रियराज्यं बहुराष्ट्रियं राज्यमिति तिसृणां मान्यतानां मूले यः सिद्धान्तोऽस्ति, स युरोपमहाद्वीपकेन्द्रितः (Eurocentric) सिद्धान्तोऽस्ति । 'राज्यराष्ट्रम्' इति सिद्धान्तस्तु नेपालकेन्द्रितः (Nepal Centric) वर्तते, यो बृहत्तरपरिधौ हिमवत्खण्डकेन्द्रितो भारतवर्षकेन्द्रितो वा सिद्धान्त इत्येवंरीत्या च व्याहर्तुं शक्यते । पृथक् परिवेशे समुद्भूतेन युरोपमहाद्वीपकेन्द्रितेन प्रतिमानेन (Eurocentric Paradigm) सह अस्माकं मौलिकस्य सनातनस्य नेपालकेन्द्रितस्य प्रतिमानस्य (Nepal centric paradigm) विरोधोऽद्यतनो यथार्थोऽस्ति ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

२.४. नेपालकेन्द्रितविरुद्धं युरोपमहाद्वीपकेन्द्रितं प्रतिमानम्

ब्रह्माण्डीयैकता-विश्वबन्धुत्वरूपयोर्महन्मान्यतयोः तथैव सुविशिष्टाया ग्रामसंरचनायाश्च सैद्धान्तिक आधार वैदिके वाङ्मये वैदिकसभ्यतायाञ्च प्राप्यते । वैदिक्या सहैव बौद्ध-जैन-बोन-किरातपरम्परासु च सिद्धान्तपक्षेषु मतैक्यं प्राप्यते । समग्रत उच्यते चेन्नेपालस्य मौलिकसनातनदृष्टौ राज्यं राष्ट्रञ्च परस्परं विरुद्धे तत्त्वे न मन्येते । अतः पृथक्त्वञ्च अनयोर्नास्ति । वस्तुतो राज्यं राष्ट्रञ्च स्वतन्त्रस्य स्वाधीनस्य सार्वभौमसत्तासम्पन्नस्य च देशस्य बोधके समानार्थकसंज्ञे स्तः । नेपालस्य मौलिकसनातनमतानुसारेण राज्यमेव राष्ट्रं वर्तते चेद् राष्ट्रियता राज्यान्निःसरति ।

युरोपमहाद्वीपीयसभ्यतायां तु राज्यनिर्माणसन्दर्भे नेपालाद् हिमवत्-खण्डाद् भारतवर्षाच्च भिन्नदृष्टिवरलम्बिता । तदानीन्तने युरोप-महाद्वीपीयसभ्यतायां वैचारिको मतभेदो नासीदिति न, तथापि तत्रत्येन प्रबलतमेन प्रतिमानेन (Dominant Paradigm) राज्य-राष्ट्रे पृथक्तत्त्वरूपेण अवमते । युरोपमहाद्वीपीयस्य प्रतिमानस्यानुसारेण भाषाः, जातिः, प्रजातिः, धर्मसम्प्रदायः संस्कृति-क्षेत्रगतः परिचयश्चेत्यादीनि तत्त्वानि राष्ट्रनिर्माणस्याऽऽधाररूपेण स्वीकृतानि । एवंरीत्या अस्तित्ववतो राष्ट्रस्यैव स्वतन्त्र-स्वाधीन-सार्वभौमसत्तासम्पन्न-राज्यत्वेन भू-राजनीतिकी वैधानिकी सत्ता विवाक्षिता आसीत् । युरोपमहाद्वीपक्षेत्रे राष्ट्रराज्यस्य (Nation State) अवधारणानुरूपं हि इटली-फ्रान्स-जर्मनी-ब्रिटेनादिदेशाः सत्तावन्तो बभूवुः ।

कदाचिद्विविधानामपि भाषाणां संस्कृतीनां प्रजातीनां धर्मसम्प्रदायानां क्षेत्राणाञ्च एकस्यामेव भू-राजनीतिक-वैधानिक-संरचनायां समावेशस्य रणनीतिकी व्यावहारिकी अवस्था आपतति । इमामेव अवस्थां सम्बोधयितुं युरोपमहाद्वीपीये प्रतिमाने द्विराष्ट्रियं राज्यम्, बहुराष्ट्रियं राज्यञ्चेति मान्यते पुरस्कृते दृश्येते । पूर्वतनः चेकोस्लोभाकियादेशो द्विराष्ट्रियं राज्यम्, स्वीजरल्याण्डदेशः, पुरातनः सोवियतसङ्घः, युगोस्लाभिया चेति बहुराष्ट्रियसंरचना एवमेव रीत्या निर्मिता आसन् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

राष्ट्रराज्यम्, द्विराष्ट्रियं राज्यम्, बहुराष्ट्रियं राज्यञ्चेति संरचनानां युरोपमहाद्वीपीये प्रतिमानेन स्वीकरणञ्च वस्तुत आवश्यकत्वेनैव जातमासीत्। तदानीन्तनस्य युरोपमहाद्वीपस्य भू-सांस्कृतिकं राजनीतिकञ्च याथार्थ्यं विचार्यैव राष्ट्रराज्यादिमान्यता अवलम्बितासन् । ताश्च मान्यता विभिन्नानां देशानां भू-राजनीतिक-वैधानिकताया निश्चयार्थं सहायाः बभूवुः परन्तु पुरातनोऽयं सिद्धान्तः सम्प्रति युरोपमहाद्वीपेऽपि असान्दर्भिकः सञ्जातोऽस्ति । राष्ट्रराज्यं द्वि-राष्ट्रियता बहु-राष्ट्रियता चेति मान्यतानां समावेशकेन युरोपमहाद्वीपकेन्द्रितेन प्रतिमानेन, तत्समानमान्यतया कपुतन्त्रेण च वर्तमाने नेपाले नेपालीयराष्ट्रियतायै महती समस्या समुद्भाविता वर्तते ।

युरोपमहादेशीयप्रतिमानानुसारेण कस्मिँश्चिद् एकस्मिन्नेव देशे विद्यमानानि विविधानि भाषाः, जातयः, प्रजातयः, धर्मसम्प्रदायाः, सांस्कृतिकी क्षेत्रीया च विविधता इत्यादीनि तत्त्वानि राष्ट्रस्वरूपेण विकासार्हाणि भवन्ति। अतो यस्मिन् कस्मिन्नपि काले द्वि-राष्ट्रियताया बहु-राष्ट्रियतायाश्च संरचनायाः विघटनं सम्भवति । एतादृशं विघटनं घृणां हिंसाञ्च प्रोत्साहयति । भाषिक-जातीय-भौगोलिक-साम्प्रदायिकविविधातायुक्तेन केनापि देशेन स्वस्मै असान्दर्भिकस्य युरोपमहाद्वीपीयस्य प्रतिमानस्य अवलम्बनं महती त्रुटिर्भवति, येन च प्रतिस्पर्धि-राष्ट्रियतानामन्त्यहीन-सङ्घर्षरूपः कदापि निराकरणाऽशक्य आमय आमन्त्र्यते । राज्यराष्ट्रे (State Nation) भाषाः, जातयः, प्रजातयः, धर्मसम्प्रदायाः, संस्कृति-क्षेत्रगतः परिचयश्चेत्यादीनि तत्त्वानि प्रतिस्पर्धिरूपेण न स्वीक्रियन्तेऽपि तु राज्यस्य विविधाऽवयवरूपेण स्वीकृत्य बृहतीमेकतामाधृत्य सुसंयोजनं समन्वयश्च विधीयेते । अतः सिद्धान्तेऽस्मिन् प्रतिस्पर्धिराष्ट्राणि प्रतिस्पर्धिराष्ट्रियताश्चेति न मन्यत एव । अस्मिँस्तु राज्यं केन्द्रेऽवधार्य राष्ट्रियतायाः परिभाषा व्यवहारश्च विधीयेते । राज्ये विद्यमानाः सर्वेऽपि जाति-समुदाय-भाषाभाषकादयो जना एकयैव समन्वयात्मिकया राजनीतिकया राष्ट्रियतया सह योज्यन्ते । युरोपमहाद्वीपीयं पुरातनं प्रतिमानं परिचयमूलां राजनीतिं मनुते परन्तु राज्यराष्ट्रेण परिचयात्मिका संस्कृतिर्मतास्ति ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

३. राज्यराष्ट्रम्

युरोपमहाद्वीपमुदाहृत्य चर्चां प्रारभामहे । यदा तु युरोपमहाद्वीपे राष्ट्रियता आकृतिं गृह्णन्ती आसीत्, तदानीन्तनं प्रबलतमं युरोपमहाद्वीपीयं प्रतिमानं राष्ट्रस्य पूर्ववर्तित्वम्, राज्यस्य च परवर्तित्वं स्वीचकार । परिणामतो युरोपमहाद्वीपे राष्ट्रियतायाः परिभाषा राष्ट्रराज्यस्य (Nation State) अवधारणया विहिता । जातिं (Ethnicity) च प्रारम्भिकं मानकं मत्वा राष्ट्रस्य (Nation) परिभाषां राज्यस्य पृथक्करणञ्च युरोपमहाद्वीपीयं प्रतिमानं चकार । तदेव युरोपमहाद्वीपीयं प्रतिमानं राष्ट्रराज्यस्य (Nation State) आधारशिला वर्तते । युरोपमहाद्वीपीयशैल्या राष्ट्रराज्ये (Nation State) जातिं (Ethnicity) प्रजातिं (Race) चेत्यादिकमाधृत्य राष्ट्रं (Nation) परिभाषीक्रियते । अतः सिद्धान्तेऽस्मिन् राज्यस्य सर्वेषां नागरिकाणां संयोजनशक्यायाः समानराष्ट्रियताया अभावो भवति । एतेन समावेशीकरणस्य बहिष्करणस्य च अनिश्चयवस्था समुत्पद्यते । अत एव अवधारणेयं सङ्कीर्णराष्ट्रियतावादिनी वर्तते ।

राज्यराष्ट्रे (State Nation) इव राष्ट्रराज्ये (Nation State) राज्यं (State) राष्ट्रं (Nation) च पदद्वयमेव अस्ति परन्तु पदक्रमे भिन्नता वर्तते । राज्यराष्ट्रे राज्यपदं विशेषणस्थानीयम्, राष्ट्रपदं परवर्ति विशेष्यस्थानीयमासीच्चेद् अत्र राष्ट्रराज्ये तद्विपरीतः क्रमोऽस्ति । राज्यराष्ट्रे राष्ट्रियतायाः परिभाषायै

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

परिचयार्थञ्च राज्यमेव निर्णायकं तत्त्वं वर्तते चेद् राष्ट्रराज्ये मानवजन्मन आधारेण निर्धार्याणि प्रजातिः, जातिरित्यादीनि तत्त्वानि राष्ट्र-राष्ट्रियतयोः परिभाषायै परिचयार्थञ्च निर्णायकानि मतानि सन्ति । युरोपमहाद्वीपीयस्य प्रतिमानस्य (European Paradigm) एतन्मान्यतामाधृत्य भाषाः, जातयः, प्रजातयः, धर्मसम्प्रदायाः, सांस्कृतिकपरिचय इत्यादितत्त्वानामाधारेण नैकानि राष्ट्राणि परिचायितानि ।

तदानीन्तने परिवेशे तेषां कृते एतत् सहजमेव स्यात् । ब्रिटेनदेशः कस्य ? ब्रिटिसजानानाम् । फ्रान्सदेशः कस्य ? फ्रेञ्चजनानाम् । जर्मनीदेशः कस्य ? जर्मनजनानाम् । इटली, हल्याण्ड, डेनमार्क, फिनल्याण्ड, स्पेन, रसिया इत्येतेऽन्यान्यदेशाश्च विचार्यन्ते चेत्तत्रापि तेनैव प्रतिमानेन निर्णायकभूमिका निरूढास्ति ।

पुरातने युरोपमहाद्वीपीये प्रतिमाने स्वतन्त्रस्य स्वाधीनस्य सार्वभौमसत्तासम्पन्नस्य देशस्य/राज्यस्य भू-राजनीतिकं वैधानिकञ्च अस्तित्वं केन निर्धारितम् ? मूले सैव मान्यता अस्ति । भाषाः, जातयः, प्रजातयः, धर्मसम्प्रदायाः, सांस्कृतिकपरिचय इत्यादितत्त्वानां वैविध्येन तानि राष्ट्राणि च भिन्नानि सन्ति । तेन तेषां राष्ट्रियतायां भिन्नता वर्तते । अत एव तत्र राज्यानाञ्च नानात्वमभिमतमेव । ते परिचयमूलां राजनीतिम् (Identity Politics) आधृत्य सार्वभौमसत्ताविषयकं प्रश्नं समाधातुं प्रायतन्त ।

वेष्टफ्यालिया-सन्धौ (ख्रीष्टाब्दस्य १६४८) राष्ट्रस्य परिभाषायै यो राष्ट्रराज्य-सिद्धान्त आधृतः, तेन तत्कालीनानां युरोपमहाद्वीपीयानां पारस्परिकस्य कलहस्य समाधानं विहितमासीत् । युरोपमहाद्वीपे तदानीन्तन्यां परिस्थितौ निर्मितेयं राष्ट्रराज्यावधारणा सम्प्रति तत्रैव मूल्यहीना सञ्जातास्ति । राष्ट्रराज्यावधारणा वैश्विकस्तरे बहुषु भूभागेषु समस्यामुदभावयत्, साम्प्रतञ्च समस्या विद्यन्ते ।

विश्वस्याधुनिकानां राजनीतिकचिन्तनानामाविष्करणं ग्रीसदेशीयै-र्युरोपमहाद्वीपीयैरमेरिकादेशीयैश्च विहितमिति कतिपये विद्वांसो दम्भं प्रकटयन्ति

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri
परन्तु तेषां राजनीतिकचिन्तनानामनुशीलनक्रमे नैकेषु देशेषु समस्याः समुत्पन्ना इति तथ्यं प्रति उत्तरदायित्वबोधः तेषु नानुभूयते। राष्ट्रस्यावधारणाया महत्त्वस्य च पाश्चात्त्यानां बुद्धौ प्रविष्टस्यापि नहि बहुकालो व्यतीतः । अस्मात्पूर्वं ते कबिलवादादुन्नतिङ्गता नासन्। युरोपमहाद्वीपस्य तत्कालीना परिस्थितिर्यादृशी आसीत्, राष्ट्रराज्ये त तस्याः प्रभावो नह्यस्वाभाविकः ।

युरोपमहाद्वीपीया देशा वैविध्यस्य निर्णायकत्वं स्वीकृत्य निर्मिता व्यष्टिमूलकाः (Particularist) अंशा आसन् । प्रत्येकमंशेन सह परस्परमन्तर्मिश्रणशून्या नाना जनसमुदायाः, विविधा भाषाः, पृथक् सांस्कृतिकाः परिचया इत्यादिकारणैः तथैव भूखण्डानाञ्च पृथक्त्वेन तत्र पृथक् पृथक् राष्ट्राणि परिकल्पितान्यासन् । ब्रिटिसजनानां ब्रिटेनदेशः, फ्रेञ्चजनानां फ्रान्सदेशः, जर्मनीजनानां जर्मनीदेश इत्यादिरीत्या परिकल्प्य तदनुरूपमेव राज्यसंरचनायाः स्थितिः तदानीन्तने युरोपमहाद्वीपे तेनैव कारणेन विनिर्मिता आसीत् ।

यद्यपि ब्रिटेनसमाविष्टस्य संयुक्ताधिराज्यस्य निर्माणमपि राष्ट्रराज्यस्य मान्यतायां समाहितं न भवति । मान्यतेयं तेषां देशे तदानीमेव अर्थहीना (Outdated) सञ्जातासीत् तथापि बेलायदेशीयस्य साम्राज्यवादस्य विस्तारेण सहैव आसंसारं प्रभुत्वशालिनः प्रतिमानस्य (Dominant Paradigm) बलेन तस्या मान्यतायाः प्रतिष्ठापनार्थं तैर्भृशं प्रयत्नं संसाध्य साफल्यञ्च अधिगतम् । अन्यदेशेषु मिथो भेदस्य, विद्वेषस्य, घृणायाश्च प्रवर्धनाय एकं शास्त्रमासीत्– राष्ट्रराज्यम् (Nation State) इति मान्यता । युरोपमहाद्वीपीयानां तदानीन्तन्या अपेक्षाया अनुरूपं हि राष्ट्रराज्यमान्यता तेभ्यो लाभं दापितवती चेद् अन्येषु देशेषु अन्योन्यं भेदस्य विद्वेषस्य घृणायाश्च प्रवर्धनेन द्वन्द्वं वर्धापितवती ।

तदानीन्तने युरोपमहाद्वीपीये सन्दर्भे 'राष्ट्रराज्यम्' इति अवधारणा राष्ट्रियताधारेण विभिन्नानां भू-सांस्कृतिक-राजनीतिकानामवयवानामवबोधाय, सीमाङ्कनाय, भू-राजनीतिकवैधानिकताया निश्चयनाय च सहाया बभूव । तदानीन्तने युरोपमहाद्वीपे भाषायाः संस्कृतेश्च वैविध्ययुताः पृथक् पृथक् खण्डा

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

आसन् । एवञ्च तदानीं परस्परमन्तर्मेलनशून्यो जनसमुदाय आसीत् । अत एव 'राष्ट्रराज्यम्' इति अवधारणा तदानीं सत्यप्रयोजनवती समपद्यत, अन्यथा एकस्मिन्नेव देशे स्पर्धमानानां राष्ट्राणां राष्ट्रियतानाञ्च मिथः कलह आपद्येत। एवंरीत्या समीक्षणेन तथ्यमेतत् स्पष्टं भवति यत् तदानीन्तनस्य युरोपमहाद्वीपस्य कृतेऽवधारणेयं खलु वरदानमासीत् परन्तु वर्तमानस्य तस्य महाद्वीपस्य कृते राष्ट्रराज्यावधारणा असान्दर्भिकी प्रतिपन्नास्ति ।

आधुनिक्यां शक्तिसंरचनायां युरोपमहाद्वीपीयस्य अमेरिकादेशीयस्य प्रतिमानस्य प्रभुत्वप्रवर्धनेन सहैव अन्येषु च भूभागेषु 'राष्ट्रराज्यम्' इति अवधारणाया अनुसारेणैव राष्ट्रियताया व्याख्या विहिता । यदा तु प्रत्यक्षमौपनिवेशिकं शासनं (Direct Colonial Rule) समाप्तम्, ततो बेलायतदेशस्य, फ्रान्सदेशस्य, अन्येषाञ्च युरोपमहाद्वीपीयानां देशानामुपनिवेशाः स्वातन्त्र्यङ्गताः । स्वतन्त्रास्ते च देशा राष्ट्रराज्यम् (Nation State) इति नाम्ना सम्बोधिताः । कदापि पारतन्त्र्यमनधिगताश्च देशाः तदनुकरणेन राष्ट्रराज्यम् (Nation State) इति स्वयङ्घोषिताः । अभिनिर्मितस्य ऐतिह्यविश्लेषणस्य (Constructed Analysis), अर्थापनस्य (Interpretation) चाधारेण तदानीन्तन्याः सत्तारूढशक्तिसंरचनाया आनुकूल्येन प्रवर्धितानां सङ्कथनाञ्च समाश्रयणेन नेपालः, भारतम्, पाकिस्तानदेशः, अफगानिस्तानदेशः, दक्षिणाफ्रिका, संयुक्तराज्यामेरिका, क्यानडा इत्यादिदेशानां राष्ट्रराज्यम् (Nation State) इति नाम्ना सम्बोधनं मान्यता चेति अयथार्थपूर्णो व्यवहारोऽपि दृष्टः ।

नेपाल-भारतेत्यादीनां राष्ट्रराज्यमिति कथनमावश्यकं नासीत्, औचित्यपूर्णञ्च नास्ति । प्राचीनस्य भारतवर्षस्य नेपाल-भारतेत्यादीनामुत्तराधिकारिदेशानां सन्दर्भे राष्ट्रस्य निर्माणं भाषा-जाति-प्रजाति-सम्प्रदायधारेण विहितं नास्ति । वेदेषु भूमिर्माता निगदिता[53] एतस्य तात्पर्यं विचार्यते चेद्भूमेः पृथग्भूतस्यापि कस्यचन जातीय-समूहस्य राष्ट्रत्वमननं युरोपमहाद्वीपीया मान्यता वर्तते परन्तु मान्येतेयं नेपाल-भारतादिदेशानां

53 ऋक्. १०/१८/१०, यजुः ९/२२, अर्थर्वः १२/१/१०, १२/१/१२, १२/१/६२, १२/१/६३ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सन्दर्भेऽत्रत्येन ऐतिहासिकतथ्येन सर्वथा असङ्गतेति वक्तव्यम् । राष्ट्रशब्दस्य भूभागबोधकत्वं स्पष्टम् ।[54] अर्थशास्त्र-शुक्रनित्योः साक्ष्याधारेण च भूभागशून्यं राष्ट्रं भारतवर्षीये राजनीतिकचिन्तने मता नास्तीति कथनीयम् ।[55] इह तु भूमि-जनानां सहविद्यमानताऽनिवार्यैव । युरोपमहाद्वीपीयया दृष्ट्या राष्ट्रस्य या परिभाषा वर्तते, सा सङ्कीर्णास्ति । एवञ्च राष्ट्रस्य पूर्ववर्तित्वम्, राज्यस्य परवर्तित्वञ्चेति मतावलम्बिनी दृष्टिरस्माकं वैदिकमान्यताया विपरीता दृश्यते । यतो हि, राष्ट्रस्य प्रमेयत्वं मूलोपादेयत्वं वा स्वीकृत्य राष्ट्रस्य व्यावहारिकी अर्थपूर्णता राज्यादेव सुनिश्चितेति मान्यतां वेदः (विशेषतोऽथर्ववेदः) वैदिकशास्त्राणि च अङ्गीकुर्वन्ति । मान्येतेयं बौद्ध-जैन-बोन-किरातादिभिश्च आत्मासात्कृता दृश्यते । साध्यत्वेन राष्ट्रस्य साधनत्वेन राज्यस्य च मिथः सम्बन्धहेतुना राज्यमेव राष्ट्रस्य (State as Nation) स्वरूपमाप्नोतीति बौद्ध-जैन-बोन-किरातानाञ्च मान्यता वर्तते । अतो नेपालस्य, भारतस्य, अन्येषाञ्च कतिपयानां देशानां राज्यराष्ट्रम् (State Nation) इति मौलिकं सम्बोधनं युक्तिसङ्गतं भवति ।

येषां देशानां कदापि मौलिकं राष्ट्रराज्यत्वं नासीत्, तेषाञ्च राष्ट्रराज्यत्वं कथं व्याहृतम् ? राज्यराष्ट्रस्य अवधारणाया यथावश्यकं सिद्धान्तीकरणस्य अभावदशायां कथञ्चिदपि देशस्य एकीकरणं व्यावहारिकी अपेक्षा आसीत् । अत एव 'राष्ट्रराज्यम्' इति अवधारणायाः खलु विवेकशून्येन अर्थापनेन तादृशो व्यवहारः सञ्जात आसीदिति बोद्धुं शक्यते । सम्प्रति राज्यराष्ट्रम् (State Nation) इत्यस्य सिद्धान्तीकरणानन्तरं पूर्वतनस्य अविवेकपूर्णस्य व्यवहारस्य आवश्यकता नहि प्रतिभाति । यतो हि, राज्यराष्ट्र-सिद्धान्तस्य आलोकमाश्रित्य नेपालः, भारतम्, पाकिस्तानदेशः, अफगानिस्तानदेशः, दक्षिणाफ्रिका, अमेरिका, क्यानडा इत्यादिदेशानां राष्ट्रियताया विज्ञानसम्मतं व्याख्यानं साहज्येन सम्भवति । राष्ट्रियताया वैज्ञानिकव्याख्यायै अनुकूलस्य राज्यराष्ट्र-सिद्धान्तस्य आविष्करणानन्तरं सम्प्रति राष्ट्रराज्यस्य अवधारणाया आश्रयणं नावश्यकम् ।

---

54 रामशरण शर्मा (ख्रीष्टाब्दस्य १९९०) पृ. ५० ।

55 न ह्यजनो जनपदो राज्यमजनपदं वा भवतीति कौटिल्यः (अर्थशास्त्रम्) ।
स्थावरं जङ्गमं वापि राष्ट्रशब्देन गीयते (शुक्रनीतिः) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

तदानीं युरोपमहाद्वीपस्य कृते वररूपेयं राष्ट्रराज्यावधारणा परिवर्तितदशायामागामिनि काले शापरूपं भविष्यतीति प्रतीयते। निवासान्तरणहेतुना युरोपमहाद्वीपस्य तदानीन्तस्य राष्ट्रराज्यस्य (Nation State) सङ्घटनावस्था च क्षयङ्गता वर्तते। यथा इदानीन्तनो ब्रिटेनदेशः प्राचीनकालस्येव केवलं ब्रिटिसजनानां गृहं नास्ति, अपि तु नैकेषां जाति-धर्म-संस्कृतियुक्तानां समुदायानां सङ्गमस्थलं सम्पद्यमानमस्ति। आधुनिकस्य फ्रान्सदेशस्य अन्येषां युरोपमहाद्वीपीयानां देशानां वा स्थितिश्च समानैव। इतःपरं युरोपमहाद्वीपीयेन पारम्पर्यप्रतिमानेन परिभाषितया राष्ट्रराज्यम् (Nation State) इत्यवधारणया अद्यतान् बेलायतदेशं फ्रान्सदेशं युरोपमहाद्वीपीयान् अन्यदेशाँश्च नहि आलम्ब्यन्ते। अथ जातेः, प्रजातेः, भाषायाः, धर्मसम्प्रदायस्य, सांस्कृतिकपरिचयस्य च वैभिन्न्येन राष्ट्रियताया नैकत्वम्, राज्यानाञ्च तदनुरूपं नैकत्वमेव भवति। पुरातनं युरोपमहाद्वीपीयं प्रतिमानमपि तत्र आधापितुं न शक्यते। यतो हि, पुरातनकालस्येव मिथोऽमिलितेन जनसमुदायेन, भाषावैविध्येन, सांस्कृतिकवैभिन्न्येन च युक्तैर्भूखण्डैः सहिता व्यष्टिरूपा (Particularist) अवयवा राष्ट्रराज्यानि वा सम्प्रति न वर्तन्ते, निकटभविष्यति च नहि वर्तिष्यन्ते।

जातेः, प्रजातेः, भाषायाः, धर्मसम्प्रदायस्य, सांस्कृतिकपरिचयस्य च पृथक्त्वेन राष्ट्रस्यैव पृथक्त्वं यदि स्वीक्रियेत, तर्हि तु लण्डन-पेरिसस्थैर्यवनैः स्वतन्त्रस्य यवनराज्ययाचनस्य स्थितिरायास्यति परन्तु तत्र तत्र इसाइधर्मिणां यवनानामन्येषां वा निवासानां मिश्रितत्वेन तदीयाः पृथग् भूखण्डास्तु न वर्तन्ते। एतादृश्यां स्थितौ पुरातनं युरोपमहाद्वीपीयं प्रतिमानमाधृत्य राष्ट्रस्य पूर्ववर्तित्वम्, राज्यस्य परिवर्तित्वञ्च अभिहितुं मन्तुञ्च नहि बेलायतदेशः शक्नोति, न फ्रान्सदेशः, न तु अन्ये देशाः। स्वास्तित्वस्यैव संशयदशायां न कोऽपि देशः स्वस्मिन् प्रतिस्पर्धिराष्ट्रियताभ्य आश्रयं दातुमिच्छति। न च दातुं शक्नोति। जातेः, प्रजातेः, भाषायाः, धर्मसम्प्रदायस्य, सांस्कृतिकपरिचयस्य च पृथक्त्वेन राष्ट्राणां राष्ट्रियतानां राज्यानाञ्च नानात्वं भवतीति यत् पुरातनं

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri
युरोपमहाद्वीपीयं प्रतिमानमासीत्, साम्प्रतिकः बेलायतदेशः फ्रान्सदेशो वा तद् अवलम्बितुं न शक्नोति । अतस्तत्र च राज्यराष्ट्रम् (State Nation) इति सिद्धान्त एव वर्तते । संयुक्तराज्येऽमेरिकादेशे तु पुरातनस्य युरोपमहाद्वीपीयस्य प्रतिमानस्य कार्यान्वयनस्य अवस्थाऽभावेन प्रारम्भत एव राज्यराष्ट्रम् (State Nation) इत्यवधारणानुरूपो देशो निर्मित आसीत् । युरोपमहाद्वीपात् स्थानान्तरणं विहितवतां गौराणां विविधतायाः समन्वयस्तु सम्पादितः, तथापि अमेरिकादेशीयेभ्य आदिवासिभ्योऽफ्रिकामूलेभ्यः श्यामसमुदायाय च न्यायप्रदानाशक्यत्वं तत्रत्ये इतिहासे नूनं कलङ्कविषयः ।

नवीनायां परिस्थितौ एकत्वबोधनाय राष्ट्रियता (Nationality) इति, वैविध्यस्य सङ्केताय सांस्कृतिकी राष्ट्रियता (Cultural Nationality) इति च अवधारणा युरोपमहाद्वीपीयेन प्रतिमानेन पुरस्कृता वर्तते परन्तु राष्ट्रराज्यम् (Nation State) इति अवधारणा मान्यता सिद्धान्तश्च भिन्नदशायां विनिर्मिता आसन् । एतद्विस्थापनेन राज्यराष्ट्र-सिद्धान्तस्य मूलतः प्रतिष्ठापनेन च विना सिद्धान्तमिममाधृत्य संरचिताः ते देशा विघटनभयात् कथञ्चन विमुक्तिं नाप्नुवन्ति । एतदर्थमवधारणात्मकेन वैचारिकेण सैद्धान्तिकेन चाधारेण पार्थक्ययुक्तायाः व्याष्टिप्रधानाया 'राष्ट्रराज्यम्' इति मान्यताया निर्मूलीकरणमनिवार्यम् । नोचेज्जातेः, प्रजातेः, भाषायाः, धर्मसम्प्रदायस्य, सांस्कृतिकपरिचयस्य, क्षेत्रीयपरिचयस्य च अहङ्कारेण नवीनानां राष्ट्राणां मध्ये या महत्त्वाकाङ्क्षा समुत्पत्स्यते, तथैव समुत्पादितः प्रतिस्पर्धिराष्ट्रियतानामन्त्यहीनः सङ्घर्षः कष्टप्रदं द्वन्द्वं भावयिष्यति । एतेन नेपालभारतादिदेशेषु तु ततोऽपि कठिनवस्था सम्भवति । यतो हि, अत्र जातिः, प्रजातिः, भाषा, धर्मसम्प्रदायः, सांस्कृतिकपरिचयः, क्षेत्रीयपरिचय एव न, अपि तु वर्णगोत्रौ (Caste) च राजनीतिक्या महत्त्वाकाङ्क्षायाः साधनाय कारणरूपौ भवितुं शक्नुतः ।

वस्तुतो राष्ट्रराज्यावधारणा विषवृक्षरूपेण प्रवर्धिता विलोक्यते, यस्य मूले पार्थक्यं व्याष्टिप्राधान्यञ्च वर्तेते, या च जन्माधारेण उत्पद्यमानं

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

जातीयमहङ्कारवादं घृणावादं हिंसात्मकं द्वन्द्वञ्च परिपोषयति। अवधारणेयमीदृशी वर्तते या जाति- रङ्ग-भाषादिमाधृत्य मिथो विभेदमुत्पादयति । पुरातन्या विगतमूल्याया युरोपमहाद्वीपीयाया मान्यताया राष्ट्रराज्यम् (Nation State) इति सिद्धान्ते राष्ट्रपदस्य विशेषणत्वम्, राज्यपदस्य विशेष्यत्वञ्च स्वीक्रियेते । अतः सिद्धान्तोऽयं सर्वसत्तावादिन्याः शासकीयमान्यतायाः पृष्ठपोषको भवति । युरोपमहाद्वीपे जातः फासिवादः (fascism), नाजिवादः (Nazism), दक्षिणाफ्रिकाक्षेत्रस्य रङ्गभेदि शासनञ्च राष्ट्रराज्यावधारणायाः खलु परिणतिरित्यभिव्यक्तिरत्युक्तिर्न स्यात्। याजिदीवर्गो येजिदीवर्गो वा, कुर्दसमुदायः, पाकिस्तानदेशीयोऽल्पसङ्ख्यावान् धार्मिकः समुदायश्च महत्कष्टमावहमाना वर्तन्ते । तेषामुत्पीडनस्य, नृशंसहिंसायाः, विभीषिकायाश्च अवस्थानां निराकरणाय अपेक्षितेषु तत्त्वेषु एकन्तु राष्ट्रराज्यमान्यताया विसर्जनपुरःसरं राज्यराष्ट्रमान्यतायाः स्थापनं खलु। इदानीन्तनानाम् अल कायदा, यवनराज्यम्, बोको हराम इत्यादीनां मूलं पार्थक्यवादि वैभिन्न्यवादि अहङ्कारवादि घृणावादि च सङ्कीर्णं चिन्तनं खलु । पुरातनेन युरोपमहाद्वीपीयेन प्रतिमानेन स्थापिता राष्ट्रराज्यमान्यता, सम्प्रति समुत्पन्नं अलकायदा-यवनराज्यसंदृशं पार्थक्यवादि अहङ्कारवादि घृणावादि सङ्कीर्णं चिन्तनञ्च प्रतिस्पर्धिराष्ट्रियतानामन्त्यहीनं सङ्घर्षं परिपोषयतः ।

पुरातनन्या युरोपमहाद्वीपीयप्रतिमानानुसारिण्या राष्ट्रराज्यावधारणया अराजकता सम्भवतीति तथ्यन्तु कथितस्य सागरद्वीपः (Sealand) इत्यस्य उदाहरणेन स्पष्टं खलु । बेलायतदेशस्य समुद्रतटात् किञ्चिद् (१२ किलोमिटरपरिमितं) दूरं स्तम्भद्वये निर्मितं वर्तते रफ्स टावर (HM Fort Roughs)। तत्र वास्तव्येन जनेन सागरद्वीप (Sealand) इति नाम कृत्वा स्वनिवासस्य तस्य स्वतन्त्रराष्ट्रत्वं समुद्घोषितम् । दिवङ्गते तस्मिन् तत्पुत्रः स्वात्मानं तत्रत्यं राष्ट्राध्यक्षं सर्वकारप्रमुखं वा मन्यमानोऽस्ति । समुद्रे स्तम्भयुग्मस्योपरि निर्मिताया जनस्यैकस्य स्वामित्वमापन्नायाः कृत्रिमसंरचनायाश्च एवं बलात् स्वतन्त्रराष्ट्रत्वं समुद्घोषितम् । अस्या मान्यताया आधारभूता पुरातनी

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0 In Public Domain. Digitization by eGangotri

युरोपमहाद्वीपीयराष्ट्रराज्यावधारणा कियान् हास्यास्पदोऽस्तीति तस्य समुत्कृष्टं प्रमाणमिदमेव ।

राष्ट्रं राज्यञ्च पृथक्संरचनात्वेन समीक्षमाणं युरोपमहाद्वीपीयं प्रतिमानं राष्ट्रवादस्य (Nationalism), देशभक्तेः (Patriotism) च पृथग्विषयत्वमुररीकृत्य परिभाषां प्रस्तौति । कतिपयैः पाश्चात्त्यैरध्येतृभिः तदनुयायिभिरन्यैश्च राष्ट्रवादस्य सङ्कीर्णत्वं विभेदकत्वञ्च मत्वा तद्विकल्परूपा राष्ट्रभक्ती राष्ट्रियं चरित्रं बिभर्तीति विश्लेषणं कृतमस्ति, येन विश्लेषणेन राष्ट्रराज्यावधारणायां निहिता विसङ्गतिः प्रकाश्यते ।

जातेः, प्रजातेः, भाषायाः, धर्मसम्प्रदायस्य, सांस्कृतिकपरिचयस्य, क्षेत्रीयपरिचयस्य च भिन्नत्वेन राष्ट्रस्य भिन्नत्वस्य मननशीलं पुरातनं युरोपमहाद्वीपीयं प्रतिमानं यदि इतोऽपि मन्यते चेद् अन्त्यहीना विघटनशृङ्खला समुत्पद्यते। वस्तुतः शीघ्रं विलम्बेन वा भवेत्, राष्ट्रराज्यस्य शक्तेः क्षीणताङ्गत्वात्तदेव द्विराष्ट्रियं राज्यं (Two-Nation State) बहुराष्ट्रियं राज्यं (Pluri-National State/Multi-Nation State) वेति नाम्ना हिंसामयस्य सङ्घर्षस्य हेतुः समुत्पत्स्यते ।

राष्ट्रराज्यावधारणायाः समुद्भूतां द्वि-राष्ट्रियतां बहु-राष्ट्रियताञ्च स्वीकृतवद्भिर्हेतुभूता पूर्ववर्तिनी राष्ट्रराज्यावधारणापि ऊर्णनाभशावकैराहाररूपेण तस्यैवोर्णनाभस्याशनमिव विनाशयिष्यते। एमाले-काङ्ग्रेसदले, पूर्वपञ्चदलानि च नेपालं राष्ट्रराज्यं मन्यते । अत एव द्वि-राष्ट्रियताया बहु-राष्ट्रियतायाश्च पक्षधरा जातीयरूपेण क्षेत्रीयरूपेण च सङ्कीर्णाः घृणावादिनो मातृदलानां तेषां समुच्छेदनं वाञ्छन्ति। माओवादिदलं नेपालं बहुराष्ट्रियं राज्यं मन्यते।[56] अत एव तु सङ्कीर्णैर्घृणावादिभिः सह माओवादिनां गणबन्धनं जातं स्यात्। माओवादिभिः कथञ्चिदपि स्वराजनीतिकदर्शनाग्रहः सम्बोधनीय एव, परन्तु एतेषां दर्शने घृणावादिनां स्थिरीभवनं नहि सम्भवति । एतेनैव हेतुना द्वि-राष्ट्रियताया बहु-राष्ट्रियतायाश्च पक्षधरैः सङ्कीर्णैर्घृणावादिभिश्च माओवादिनामपाकरणाय

56 माओवादिनां तत्कालीनाः कतिपये नेतारः बहुराष्ट्रियस्य राज्यस्यावधारणायां स्वेषां मतैक्याभावम्, स च मतैक्याभावो विद्यावारिध्युपाधिकस्य बाबुराम-भट्टराईवर्यस्य नेतृत्वान्तर्गतस्य दलस्य प्रस्ताव आसीदिति उद्घोषयन्ति ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

प्रयतनं विहितमिति सुस्पष्टं खलु। तत्राक्रमणेन निर्बलताङ्गतेन प्रचण्डनेतृत्ववता तत्कालीनेन माओवादिदलेन सत्तायां स्वभागरक्षणाय आयासरूपेण तत्कालीनेन एमालेदलेन सह ऐक्यं कृतम्। तादृशी एकता माओवादिदलस्य बाध्यात्मिका स्थितिरासीदिति अत्र स्मरणीयं वर्तते।

तत्कालीनैर्माओवादिभिः तथैव मधेशकेन्द्रितैः कथितजनवादिभिर्दलैश्च द्वि-राष्ट्रियताया अहितकरे घातके विषये समुत्थापिते एमालेदलीयजना नेपालस्य राष्ट्रराज्यत्वपक्षे विमर्शाय अग्रेसरा दृश्यन्ते स्म। नेपाले एकैव समाना राष्ट्रियता वर्तते वर्तताञ्चेति दृष्टिकोणगता स्पष्टता तत्कालीने एमालेदलेऽनुभूयते स्म परन्तु नेपालिराष्ट्रियतायाः सुदृढीकरणमेव तेषां विमर्शायासस्य प्रयोजनत्वेन मन्यते चेदपि तेषां सैद्धान्तिकं धरातलमतीव निर्बलमासीत्।

प्रथमतो राष्ट्रराज्यावधारणा स्वयं निर्बलं धरातलमाश्रितास्ति, तत्रापि अवधारणेयं प्रकारान्तरेण द्वि-राष्ट्रियतां बहुराष्ट्रताञ्च पोषयतीति विषये तेषामभिज्ञता नह्यदृश्यत। द्वितीये पक्षे कम्युनिष्टाख्यैः समाजवादिभिरासंसारं द्वि-राष्ट्रियता बहु-राष्ट्रियता च परिपोषिते आस्ताम्। एवञ्च लेनिनवादस्य उपोत्पादनरूपेण जाता बहु-राष्ट्रियता नेपाले विषवृक्षरूपेण वर्धमानास्तीति तथ्ये तैरुत्तरदायित्वं स्वीकृतं नासीत्। एवंरीत्या एमाले इत्यभिधेयं राजनीतिकदलं सैद्धान्तिकेऽनिश्चयेऽवर्तत इति तथ्यमाविष्कृतमासीत्। एतस्माद् दलादपि दुरवस्था आसीत्, सम्प्रति च दृश्यते काङ्ग्रेसदलस्य। यतो हि, एतद्दलीयाः प्रतिवर्गं प्रतिव्यक्ति च स्वच्छन्दधारणां प्रकटयन्तो भ्रमन्तोऽवलोक्यते।

तत्कालीनयोरेमाले-माओवादीदलयोरैक्येन निर्मितस्य नेपाल-कम्युनिष्ट-दलस्य सैद्धान्तिकी दृष्टिः कीदृशी भवतीति विषये प्रतिवर्गं पृथङ्मतावलम्बिन्योऽभिव्यक्तय आसन्निति अत्र समुल्लेख्यं वर्तते। समाजवादिदलस्य राष्ट्रियजनतादलस्य चैकीकरणेन प्रस्तावितं समाजवादि दलं स्वदलं बहु-राष्ट्रियतावादीति समुद्घोषितवद्वर्तते।

सहस्रशो वर्षाणामितिहासेन संवलितोऽयं नेपाल एकं चिरन्तनं

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0 In Public Domain. Digitization by eGangotri

राज्यमस्ति । अनेनैव हेतुना अत्र वास्तव्यानामेकस्मिन् राष्ट्रियताविशेषे सूत्रे समन्वितत्वेन सम्प्रति नेपाल एकं समष्टीकृतं राष्ट्रं सञ्जातमस्तीति तर्के नेपालीयराष्ट्रियतायाः सबलीकरणस्य सन्दर्भो वर्तत इति अभिधातुं शक्यते । अतो युरोपमहाद्वीपीयेन उपनेत्रेण वीक्ष्य नेपालस्य राष्ट्रराज्यरूपेण कृतं व्याख्यानन्तु याथार्थ्यसङ्गतं नास्त्येव । जातिं (Ethnicity) प्रजातिं (Race) कबिलं (Trible) च आरम्भमानकं मत्वा राष्ट्रस्य (Nation) परिभाषाप्रदानं राज्यस्य पृथक्करणञ्च राष्ट्रराज्यम् (Nation State) इति मान्यताया मूलं वर्तते । अतोऽस्यान्तो द्वि-राष्ट्रियताया बहु-राष्ट्रियतायाश्च बीजं वर्तते । एतस्मादेव कारणाद् नेपालीयराष्ट्रियताया याथार्थ्यसङ्गतं व्याख्यानं केवलं राज्यराष्ट्र-सिद्धान्तमाधृत्यैव कर्तुं पार्यते ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

४. द्वि-राष्ट्रियता

कस्यचन देशस्य भू-राजनीतिक-वैधानिकरूपेण स्वतन्त्रत्वेन स्वाधीनत्वेन सार्वभौमसत्तासम्पन्नत्वेन च राज्यत्वेऽपि तस्मिन् राज्ये राष्ट्रद्वयं वर्तत इति दृष्टिरेव द्वि-राष्ट्रियता वर्तते । उदाहरणार्थं नेपाले मधेशक्षेत्रीयं पर्वतक्षेत्रीयञ्च राष्ट्रद्वयमस्तीति बलाद् उद्घोषयन्तो जना द्वि-राष्ट्रियतावादिनः सन्ति। ब्रिटिस-इण्डिया, हिन्दुस्तानमिति, पाकिस्तानमिति चेति तत्कालीनस्य विभजनस्य आधारोऽपि द्वि-राष्ट्रियतावाद आसीत्। चेकोस्लोभाकीयाराज्यस्य 'चेक गणतन्त्र' 'स्लोभाकिया' चेति द्वैधीकरणस्य दृष्टान्तश्च वर्तते ।

कस्याञ्चन अवस्थायामवयवद्वयस्य समन्वयेन सहास्तित्वस्य सहकार्यस्य कृते च आधारप्रदानेन द्वि-राष्ट्रियतायाश्च शोभनमवदानं सम्भवति। पूर्वं पृथक् स्थितं प्रतिस्पर्धि अवयवद्वयं यदि बृहत्तराया एकताया कञ्चन आधारमन्विष्य एकस्यामेव भू-राजनीतिक-वैधानिकसंरचनायामेकीभवति चेत्तु एतद् द्विराष्ट्रियतया विहितं शोभनमवदानं खलु मन्तव्यम् परन्तु पूर्वत एव एकतामापन्ने देशे द्वि-राष्ट्रियतायाः घोषमुत्थाप्य प्रतिस्पर्धिराष्ट्राणि प्रतिस्पर्धिराष्ट्रियताश्च पुरस्कर्तुं प्रयत्यते चेत् कार्यमेतद् अहितमेव सम्पादयति। अभिलेखाधारेण अभिधीयते चेद् द्वि-राष्ट्रियताया मानवसमाजेऽहितसम्पादनस्य नैके दृष्टान्ताः सन्ति ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

यदा तु राज्यस्य जन्म पूर्ववर्तिनो बृहत्तरराज्यस्यान्तर्गतानां विविधावयवानां नैकराष्ट्रत्वस्वीकरणरूपामवधारणामाधृत्य भवति, तदानीं एवंरीत्या जाते राज्ये स्वस्य पुनर्विभाजनं रोद्धुमाधारश्च न भवति । यद्यपि सैन्यबलादिना व्यावहारिकेण आधारेण पृथक्तावादिसङ्घर्षस्य दमनपायो भवति तथापि एतादृशस्योपायस्य देशस्य कृते प्रत्युपादकत्वसम्भावना सर्वदैव अवतिष्ठते ।

बेलायतदेशस्य उपनिवेशीभूतस्य तदानीन्तनस्य भारतस्य दृष्टान्तेन चर्चां प्रारभामहै । १८८७ ख्रीष्टाब्दे 'थियोडोर बेक' इत्याख्यस्य आङ्ग्लनागरिकस्य, भारतस्य अलिगढक्षेत्रस्य 'सैयद अहमद खान' इत्याख्यस्य जनस्य च सहकार्येण तत्कालीने भारते यवनसमुदायद्वारा हिन्दुसमुदायविरोधि सङ्कीर्णं विखण्डनं प्रारब्धम् । तेन च तत्र द्वि-राष्ट्रियतारूपो विभाजको विषवृक्ष उप्तमिति अध्येतारो वदन्ति । कदापि अपरिसमाप्ये घृणावादिनि जाले निमज्जनधिया युरोपमहाद्वीपीयैरुपनिवेशवादिभिः प्रक्षिप्तः खर्जूरपदार्थ एव द्विराष्ट्रियतेति कथनेऽत्युक्तिर्न स्यात् । तदेवाधृत्य कालान्तरे 'मोहम्मद अलि जिन्ना' इत्यभिधेयस्य जनस्य नेतृत्वमादाय यवनवर्गेण घृणावादि विखण्डनं विस्तारितं दृश्यते ।

हिन्दुमहासभाया नेत्रा विनायक-दामोदर-सावरकरेण द्वि-राष्ट्रियतायाः सन्दर्भः समुत्थापितः । सन्दर्भोऽयं 'बेक, खान, जिन्ना' इत्याख्यानां विद्वेषरूपस्य क्रियाकलापस्य प्रतिक्रियासीत् । बेलायतदेशे शिक्षाग्रहणक्रमे गृहीता दोषपूर्णा भवतु दृष्टिः कारणं वेति अनुसन्धानविषयः । याकिमपि भवतु, जिन्ना-सावरकरयोर्द्विराष्ट्रियतावादिनि विखण्डने आङ्ग्लोपनिवेशवादिनो जवाहरलालनेहरूप्रभृतयः काङ्ग्रेसदलीयाश्च खेलनावसरं प्रापुः । तेन च भारत-पाकिस्तानरूपेण राज्यविभजनं जातम् ।

स्वात्मानं हिन्दुनेतारं मन्यमाने सावरकरे यवननेतारं मन्यमाने जिन्नाख्ये यवने च का समानता आसीत् ? प्रत्यक्षतः परोक्षतो वा द्वावेव धार्मिकपरिचयस्याधारेण राष्ट्रस्य परिभाषां प्रस्तुतः स्म । हिन्दूनां यवनानाञ्च पृथक् पृथक् राष्ट्रमिति द्वयोरेव समाना मान्यतासीत् । आम्, द्वावेव तौ द्वि-राष्ट्रियता-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

सिद्धान्तं मन्येते स्म । द्वयोर्मध्ये एतावानेव मतभेद आसीद् यद् भारतं हिन्दूनां स्वाभाविकं राज्यं भवत्त्विति सावरकरस्य मतमासीच्चेद् यवनबाहुल्ययुतानां स्थानानां संयोजनेन एकं पृथग् राज्यं कल्पनीयमिति जिन्नामतमासीत् । तदानीन्तनस्य भारतस्य विभजनेन वर्तमानस्य भारतस्य, बङ्गलादेशसहितस्य पाकिस्तानस्य च भिन्नराज्यत्वकल्पने मूलं कारणं द्वि-राष्ट्रियतावधारणैव । पाकिस्तानदेशाद् बङ्गलादेशस्य खण्डीकरणस्य च कारणं द्वि-राष्ट्रियता-सिद्धान्त एव आसीत् । तदानीन्तु भाषिकपरिचयस्य आधारेण राष्ट्रस्य परिभाषा विहिता । यदि धार्मिकः परिचय एव राष्ट्रस्य राष्ट्रियतायाश्च आधारो भवेत्, तर्हि पाकिस्तान-बङ्गलादेशयोः स्वतन्त्रराज्यत्वमेव असिद्धं स्यात् । तत्कालीनात् पाकिस्तानदेशाद् विभज्य बङ्गलादेशेऽस्तित्वङ्गतेऽनन्तरञ्च किमर्थं पाकिस्तानदेशे पृथक्तावादिनः सङ्घर्षा अवशिष्टाः सन्तीति विश्लेषणं विधीयते चेद् द्वि-राष्ट्रियतावधारणाया मूलमेव समस्यायुक्तमस्तीति तथ्यं प्रकटीभवति ।

तदानीन्तनाद् ब्रिटिससाम्रज्याधीनाद् भारताद्भारत-पाकिस्तान-देशयोर्जन्मनः सैद्धान्तिक आधारोऽतीव निर्बल आसीत् । विभजनकाले स्वीकृतो द्वि-राष्ट्रियताया आधारः तदानीमेव नहि परित्यक्तश्चेत्तेनैव बहु-राष्ट्रियताञ्च प्रवेश्य भारतस्य पुनर्विभजनं सुनिश्चितमासीदिति कथनस्याधारः कस्मिर-हैदराबाद-खालिस्तान-नागाल्याण्डादिदृष्टान्तैः प्रदर्शितोऽस्ति । वस्तुतः प्राचीनस्य भारतवर्षस्य सांस्कृतिकसम्पत्कारणेन भारतेन सैद्धान्तिक्याः स्पष्टताया अभावेऽपि राज्यराष्ट्रस्य अनुशीलनमल्पमात्रयापि कृतत्वात् स्वदेशस्य पुनर्विभजनं निरोधितमासीत् । अपरत्र स्वजन्मनः कारणभूताया द्वि-राष्ट्रियताया ऐतिहासिकतया सह स्वसम्बन्धच्छेदेऽशक्तत्वात्तदानीन्तनस्य पूर्वपाकिस्तानक्षेत्रस्य बङ्गलादेशरूपेण पृथग्देशकल्पनस्य परिस्थितिरापतिता । सम्प्रति च सिन्ध-गिल्गिट-बाल्तिस्तान-बलुचिस्तानादिषु क्षेत्रेषु पृथक्तावादस्य सम्यक् परिपोषणमालोक्यते ।

द्वि-राष्ट्रियताया ऐतिहासिकतायाः सकाशात् स्वं पृथक्कर्तुं न शक्नोति चेत् पाकिस्तानदेशस्य एकत्वस्य स्थिरीकरणं कठिनं प्रतीयते । यतो हि,

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

वर्तमानस्य पाकिस्तानदेशस्य [illegible] सम्प्रति बहु-राष्ट्रियताजन्यस्य सङ्घर्षस्य मूलस्फोटनं दृश्यते । आधिकारिक्या औपचारिक्या च रीत्या स्वन्तत्रताया बिन्दुतः खलु भारतेन द्वि-राष्ट्रियतायाः छायातः स्वस्य विमुक्तिः साधितास्ति तथापि वर्तमाने भारते द्वि-राष्ट्रियतावादिन्यः (यथा हिन्दुयवनानां विरोधः) बहु-राष्ट्रियतावादिन्यश्च अवधारणाः सङ्घर्षनिरताः सन्ति। एताः कस्मिँश्चिदपि समये प्रबलताङ्गन्तुं शक्नुवन्ति। प्राचीनस्य भारतवर्षस्य राज्यराष्ट्रमान्यतानुसारेण सञ्चलनं हि साम्प्रतिकस्य भारतस्य सुदृढीकरणाय अन्यतम उपायः ।

द्वि-राष्ट्रियता-सिद्धान्तः कियान् भयानकोऽस्तीति रुवाण्डादेशस्य भयावहा घटना अस्मान् दर्शयति। अफ्रिकीये रुवाण्डादेशे पृथग्जातीयपरिचयत्वेन भिन्नराष्ट्रयोः सङ्कीर्णचिन्तनस्य प्रवर्धनेन हुतुसमुदायस्य तुत्सीसमुदायत्स्य च मध्ये हिंसात्मकं गृहयुद्धं प्रवृत्तम् । त्रासदस्य नरसंहारस्य अवस्था च तत्र सञ्जाता । दोषपूर्णेन व्यवहारेण शीघ्रं विलम्बेन वा हिंसात्मको व्यवहारो निमन्त्र्यत इत्यस्य बलवत् प्रमाणं रुवाण्डातोऽवाप्यते। घृणावादिन्या हिंसाया अनन्तरञ्च हुतु-तुत्सीसमुदायौ मिलित्वा निवसनमेव अन्यतमो विकल्प इति तत्र रुवाण्डाराज्येन प्रमाणीकृतमस्ति।

श्रीलङ्कायाञ्च द्वि-राष्ट्रियता-सिद्धान्तमाधृत्यैव बहूनि वर्षाणि यावद् हिंसात्मको द्वन्द्वोऽजायत । सिंहालिसमुदायस्य तमिलसमुदायस्य च विविधतायामेकत्वमस्वीकृतवद्भिर्जाति-भाषाहङ्कारवादिनीं घृणास्पदां सङ्कीर्णां परिभाषां स्वीकृत्य कृतेन व्यवहारेण तत्रापि हिंसात्मकस्य गृहयुद्धस्य, त्रासदस्य नरसंहारस्य च अवस्था आपतिता। श्रीलङ्काया भविष्यं कीदृशं भविष्यतीति तथ्यं तत्रत्ययोः सिंहालि-तमिलसमुदाययोः सम्बन्धः, धार्मिक-परिचयस्य (Religious Identity) घटकानां हिन्दु-बौद्ध-यवन-क्रिश्चियनसमुदायानां मिथः सम्बन्धश्च कीदृग् रूपं विभ्रत इत्येवंविधायां जटिलतायामाबद्धं वर्तते । राज्यराष्ट्र-सिद्धान्तस्य प्रभुत्वावस्थायामेव तादृश्या जटिलतायाः सकाशाद् मुक्तिर्लभ्यते।

एतस्या एव द्वि-राष्ट्रियतायाः कारणेन इजरायलदेशस्य प्यालेस्टाइनदेशस्य

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

च मध्ये समस्या कालगत्या सहैव जटिलतामाप्नुवन्ती वर्तते । इजरायलदेशस्य प्यालेस्टाइनदेशस्य च यदि धार्मिकपरिचयं सांस्कृतिकाधिकारक्षेत्रान्तःपातिनं विनिश्चित्य राज्यराष्ट्र-सिद्धान्तानुसारेण समानैकराज्यस्य नागरिकत्वेन नागरिक-राजनीतिकाधिकारौ निश्चीयेते, तर्हि तत्रत्याया हिंसाया आतङ्कस्य च शृङ्खला समाप्स्यते परन्तु युरोपमहाद्वीपीयसन्दर्भे निर्मितस्य राष्ट्रराज्य-सिद्धान्तस्य वैचारिकप्रदूषणाज्जातेन द्वि-राष्ट्रियतावादिना चिन्तनेन इजरायल-प्यालेस्टाइनदेशीयाः प्रजा वैरव्यहारे चिरं निमग्नाः सन्ति । इजरायल-प्यालेस्टाइनदेशयोः सहमतेरभावापादकानि घृणावादि-विखण्डनरूपाणि ऐतिहासिककारणानि नैकानि विद्यन्ते । अतो द्वि-राष्ट्रियतामात्रस्य कारकत्वमननं नोचितमिति तर्कश्च सम्भवति तथापि विगतव्रणेषु औषधलेपादिकार्ये द्वि-राष्ट्रियतावादि चिन्तनं दृढं निःसरणमिव विद्यत इति धरातलीयं याथार्थ्यमस्ति ।

द्वि-राष्ट्रियताकारणेन पीडितानां सूचौ साइप्रसदेशश्च वर्तते । प्रतिवेशिनाञ्च सहभागितायां प्रवर्धिताया द्वि-राष्ट्रियताया विषाक्तप्रहारेण देशोऽयं खण्डद्वये विभाजितोऽस्ति । देशस्यास्य हितानुकूल्येन अविचिन्त्य टर्की-ग्रीसदेशयोर्जनहितदृष्ट्या विभजनस्य शस्त्रञ्च द्वि-राष्ट्रियता खलु । साइप्रसदेशस्य एकस्य भूभागस्य टर्कीदेशस्योपनिवेश इव स्थितेः, एवञ्च देशस्यास्य विभजनस्य चिकित्सान्वेषणं क्रियते चेद् द्वि-राष्ट्रियतावादिनः चिन्तनस्य त्यागमनिवार्यम् । एतत्कार्यादृते चिकित्सा न सम्भवति ।

युरोपमहाद्वीपीयं प्रतिमानं राष्ट्रं राज्यञ्च पृथक्परिघटनारूपेण समीक्षते । द्वि-राष्ट्रियता-सिद्धान्तानुयायिनश्च युरोपमहाद्वीपीयं प्रतिमानमेव अवलम्बते । अत एतस्यानुयायिनो राष्ट्रवादं (Nationalism) देशभक्तिं (Patriotism) च पृथग् मत्वा परिभाषां रचयन्ति । द्वि-राष्ट्रियतावधारणाया मूले राष्ट्रराज्ये इव पार्थक्यवादि अहङ्कारवादि घृणावादि सङ्कीर्णं चिन्तनं भवति । राष्ट्रराज्ययोः पृथक् परिभाषां स्वीकुर्वत्यां द्वि-राष्ट्रियतावधारणायाञ्च राष्ट्रस्य पूर्ववर्तित्वम्, राज्यस्य परवर्तित्वञ्च मन्यते, यत्र सङ्कीर्णपरिचयस्याधारेण राष्ट्रं राष्ट्रियताञ्च

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

समुद्घोष्य तदनु[illegible] अपेक्ष्यते । यस्मिन् कस्मिन्नपि समये तत्र पृथक्तावादिमहत्त्वाकाङ्क्षारूपेण परिवर्तनं सम्भवति । परिणामे च द्वि-राष्ट्रियता-सिद्धान्तस्य विघटनं भविष्यति । बहु-राष्ट्रियता-सिद्धान्तोऽस्य विस्थापनं कारयति ।

सङ्कीर्णस्य राष्ट्रियतावादिनः सिद्धान्तस्य राष्ट्रराज्यं द्वि-राष्ट्रियता बहु-राष्ट्रियता च सैद्धान्तिकदृष्ट्या व्यावहारिकदृष्ट्यापि निर्बला वर्तन्ते । एतद्विघटनस्यारब्धत्वेन द्रुतं विलम्बेन वा बहुराष्ट्रियतया द्वि-राष्ट्रियताया विस्थापनस्य बहवो दृष्टान्ता क्ष्यन्त एव ।

अभिनिर्मितस्य ऐतिहासिकविश्लेषणस्य (Constructed Analysis), अर्थापनस्य (Interpretation), समकालीनायाः सत्तारूढायाः शक्तिसंरचनाया अनूकुलानां प्रवर्धितसङ्कथनानां समर्थनं राष्ट्रराज्य-सिद्धान्तस्य पार्श्वे भवति । द्वि-राष्ट्रियता-सिद्धान्तेन तेषां तत्त्वानां निर्बलीकरणाद् राष्ट्रराज्यवादिन्याः सत्तारूढायाः शक्तिसंरचनाया द्वि-राष्ट्रियतावादिभिः सह युद्धाय प्रवर्तनमनिवार्यम् । द्वि-राष्ट्रियतावादिनां समक्षं ते पराजयं स्वीकुर्युः, द्वि-राष्ट्रियतावादिनो विजयेरन् वा, राष्ट्रराज्यवादिनां पार्श्वे केवलं विकल्पद्वयं वर्तते ।

एतादृशेषु युद्धेषु अगणनीया धनजनक्षतिर्भवतीति भारत-पाकिस्तानयोः तथैव पाकिस्तान-बङ्गलादेशयोर्विभजनस्य, रुवाण्डा-श्रीलङ्का-लेबनानादिदेशानां साक्ष्यैश्च साहज्येन अवगन्तुं शक्यते ।

परशक्तेर्निर्णायिकं हस्तक्षेपं विहाय अन्यासु अवस्थासु सत्तारूढया शक्तिसंरचनया स्वदेशस्य अखण्डत्वरक्षणाधिकारस्य वैधानिकत्वबलेन विहितस्य द्वि-राष्ट्रियतावादिनां विनाशस्य इतिहासोऽनेकेषां देशानामवाप्यते । द्वि-राष्ट्रियतावादिनः कदाचित् परोक्षतया प्रत्यक्षतया वा बाह्यशक्तेः साहाय्यं गृह्णन्ति । एतादृश्यां स्थितौ सर्वदैव परिस्थितिर्द्वि-राष्ट्रियतावादिनां प्रतिकूला भवतीति तथ्यं स्पष्टीकृतमस्ति भिण्डरावाले (खालिस्तान), प्रभाकरण (तमिलइलम), बुग्ती (बलुचिस्तान) चेत्यादीनां घटनाभिः ।

भाषायाः संस्कृतेर्भौगोलिकविशेषताया वा यस्या आधारेण

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

द्वि-राष्ट्रियतावादिभिः पृथग् राष्ट्रियता उद्घोष्यते, यदि तत्समः समुदायः प्रतिवेशिदेशेष्वपि यदि भवेत्तर्हि तु स्थितिः ततोऽपि जटिला भविष्यति । टर्कीदेशे इराकदेशे सिरियादेशे च विस्तीर्य निवसतः कुर्दसमुदायस्य नाम्ना 'कुर्दिस्तान' इत्याख्यस्य भूभागस्य याचनस्य सन्दर्भोऽत्र स्मरणीयोऽस्ति, यत्र कुर्दिस्तानीयपृथक्तायाः पक्षविपक्षयोः प्रारब्धाया हिंसाशृङ्खलाया विरामस्य नहि कश्चन सङ्केतो दृश्यते । बलुचिस्तानक्षेत्रस्य पृथक्तावादिना सङ्घर्षेण सह वर्तमानैरिरान-पाकिस्तानाऽफगानिस्तानदेशाश्च सम्बद्धाः सन्ति । अतः त्रयः खलु देशा बलुचिस्तानीयां पृथक्तां दमयितुं यथासम्भवं शक्तिं प्रयुञ्जत एव । द्वि-राष्ट्रियताया एव रन्ध्रात् प्रविश्य वैदेशिकैः साइप्रसदेशस्य विभजनं विहितमिति घटनातश्च बह्वी शिक्षा ग्रहीतुं शक्यते । मूलतो भारतस्य अन्तःक्षेत्रे सङ्घर्षरतैः कामतापुरस्य पृथक्तावादिभिः साम्प्रतिकयोः नेपाल-बङ्गलादेशयोरपि केषाञ्चन भूखण्डानाञ्च लक्ष्यीकृतत्वेन सङ्घर्षस्यास्य निराकरणे नेपाल-भारत-बङ्गलादेशानां त्रयाणामेव स्वार्थो दृश्यते ।

तमिल-इलमस्य याच्ञां पुरस्कृत्य प्रारब्धः पृथक्तावादिनां सङ्घर्षो येन प्रतिवेशिदेशेन परिपोषितः, पश्चात् श्रीलङ्कासर्वकारस्य पक्षे तेनैव प्रत्यक्षं सैन्यपरिचालनं कृतमिति ऐतिहासिकः पक्ष इह स्मरणीयो वर्तते । नेपाले द्वि-राष्ट्रियतावाददृष्ट्या मधेशखण्डस्य व्याख्या प्रचलन्ती वर्तते । एतेन प्रतिवेशिदेशस्य भारतस्य एतत्खण्डसंस्पृष्टे भूभागे च भाषा-संस्कृति-भौगोलिकवैशिष्ट्यादिमाधृत्य तथैव पृथक्तावादिनी दृष्टिर्वर्धिष्यते, तदनु भारतेन च पृथग् मधेशखण्डस्य विरोधाय दार्ढ्येन दण्डचेष्टां विधास्यतीति आकलयितुं विश्लेषयितुञ्च पर्याप्तो वस्तुनिष्ठ (Objective) आधारोऽवलोक्यते । नेपालस्य विखण्डनेन एकस्मिन् खण्डे मधेशाख्यः पृथग् देशो निर्मास्यत इत्युद्घोषपूर्वकं प्रारब्धस्य पृथक्तावादिनो गतिविधेः सहसा जनमतदलाख्यायां संरचनायावतरणस्यैकं कारणं भारतस्य सावधानीकरणमासीदिति चर्चा च श्रोत्रगोचरीकृतम् ।

केवलं द्वाभ्यां जातिभ्यां प्रजातिभ्यां धर्मसम्प्रदायाभ्यां

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0 In Public Domain. Digitization by eGangotri

भाषिकसमुदायाभ्यां च युक्तः पृथग् भूभागः क्वचिद् अपवादाद् ऋते न सम्भवति । अत एकस्माद् द्वयोः सन्दर्भे प्राप्ते हि सपदि विलम्बेन वा विघटनात्मकेन अर्थापनेन (Divisive Interpretation) उत्तरोत्तरा सङ्ख्यात्मिका वृद्धिर्निमन्त्र्यते । तात्पर्यमस्ति यत् कञ्चिद् आधारं स्वीकृत्य अपरेण केनचिद् द्वि-राष्ट्रियताया याच्ञा अग्रेसारिता चेत् किञ्चित्कालानन्तरं नूनं तमेव अन्यं वाधारं गृहीत्वा अपरेण केनचित् पृथक्, प्रतिस्पर्धिन्याः, वैरिण्या वा राष्ट्रियताया उद्घोष उत्थापयिष्यते । तस्माद् द्वि-राष्ट्रियता तु एकं सहद्वारमात्रं वर्तते, यतः प्रवेशानन्तरं कालान्तरे प्रतिस्पर्धिराष्ट्रियतानामन्त्यहीनस्य सङ्घर्षस्य स्थितिर्जनिष्यते । अफ्रिकामहादेशेऽवस्थितात् सुडानदेशाद् द्वि-राष्ट्रियतारूपस्य मानदण्डस्य कारणेन पृथक् सत्तामधिगम्य दक्षिणसुडानदेशस्य निर्माणानन्तरञ्च सुडान-दक्षिणसुडादेशयोर्विघटनशृङ्खला नावरुद्धेति तथ्यं किं सङ्केतयति ? एकस्माद् द्वयोर्देशयोः संरचनानन्तरञ्च तस्य भूभागस्य नैकेषां जातीयसमवायानामहङ्कारजन्यया परिचयमूलया राजनीत्या पुरस्कृतं विघटनकुचक्रं विरमत इति कश्चित् सङ्केतो नास्ति । तत्कालीनस्य ब्रिटिशभार तस्य विभाजेन भारत-पाकिस्तानयोर्यन्निर्माणं जातम्, तां घटना समीक्ष्य क्षणन्तु विजयोऽसौ जिन्ना-सावरकरयोर्द्विराष्ट्रियताया इति प्रतीयते तथापि पाकिस्तानस्य विघटनेन बङ्गलादेशस्य जन्म, एवञ्च वर्तमानयो भारत-पाकिस्तानयोः सीमरेखाया अन्तर्भागे सम्प्रति च नैकेषां पृथक्तावादिनां सङ्घर्षः चलतीति तथ्येन द्विराष्ट्रियतावधारणा कियती निर्बलास्तीति स्पष्टं भवति ।

नेपालस्य मधेशक्षेत्रे कोचिला, भोजपुरा, मिथिला, अवध, थरुहट, चुरे भावर इत्यादीन् पुरस्कृत्य अपरिसमाप्या विखण्डनस्थितिः समानीता वर्तते । एतच्च मधेशकेन्द्रितराजनीत्यै द्वि-राष्ट्रियताजन्यस्य विघटनात्मकस्य अर्थापनचक्रस्य प्रत्यक्षमुदाहरणम् । पृथङ्मधेशप्रदेशस्य उद्घोषमाश्रित्य पृथक्तावादि सङ्गठनं कुर्वाण एक वर्गो निर्वाचनकाले तराइप्रदेशे मधेशप्रदेशस्य दरभङ्गप्रदेशस्य च नामभ्यां पुनर्विखण्डनकरमुद्घोषमसृजत् । तादृशं विभजनकरं विखण्डनं कीदृशेषु लघ्वावयवेषु भवतीति काचन सीमा नास्ति । सीमरहितस्य

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

विघटनस्य हेतुः तत्र दृश्यत इत्यर्थः । केभ्यश्चिद्वर्षेभ्यः पूर्वं नेपालगञ्जक्षेत्रे केनचिद्वर्गेण लघुपाकिस्ताननाम्ना कृतायाः स्वामित्वघोषणाया घटना च विस्मर्तुं न शक्यते ।

समुद्रे स्तम्भद्वयोपरि निर्मितस्य एकस्य जनस्य स्वामित्वापन्नायाः कृत्रिमाया लघुसंरचनाया (Rough Tour) अपि स्वतन्त्रराष्ट्रत्वेन स्वामित्वघोषणा दृष्टा चेन्नेपाले विघटनात्मके सङ्घर्षे प्रारब्धे सति तद्विरामो केवलं द्वि-राष्ट्रियतामवाप्य भविष्यतीति मन्तुं नात्र कश्चिद् आधारोऽस्ति । बहु-राष्ट्रियता-सिद्धान्तो द्वि-राष्ट्रियतामवश्यं विस्थापयिष्यतीति अभिप्रायः । द्वि-राष्ट्रियता यं घृणाविषं प्रवर्धयति, तदेव विषं शनैः शनैर्बहु-राष्ट्रियतायाः कोलाहलं प्रवेश्य प्रतिस्पर्धि-राष्ट्रियतानामन्त्यहीने सङ्घर्षचक्रवाते देशं भ्रामयति । एवंरीत्या राष्ट्रराज्य-बहु-राष्ट्रियतावादिनोरन्तर्जाले निमज्य द्वि-राष्ट्रियतादिनो विनश्यन्तीति ऐतिहासिकतथ्यैः प्रमाणीकृतं खलु। द्वि-राष्ट्रियतावादिनः स्वयन्तु नंक्ष्यत्येव, सहैव देशाय च हानिं प्रापयिष्यन्तीति अभिव्यक्तिरत्युक्तिर्न स्यात् ।

नेपाल-भारतसदृशेषु देशेषु तु स्थितिरितोऽपि जटिला वर्तते । यतो हि, अत्र जात्या प्रजात्या भाषया धर्मसम्प्रदायेन संस्कृति-क्षेत्रगतपरिचयेन सहैव वर्णगोत्रौ (Caste) च राजनीतिक्या महत्त्वाकाङ्क्षायाः प्रयोजकौ भवितुं शक्ष्यतः । एतादृशीं सम्भाव्यदशां विचिन्त्य राज्यराष्ट्रयोः पर्यायपदत्वस्वीकरणं हि विवेकपूर्णमनुभूयते । नोचेद् देशोऽयं प्रतिस्पर्धिराष्ट्रियतानामन्त्यहीनानां नैकेषां सङ्घर्षाणां चक्रवातेषु निमज्जति । देशस्य नैकेषां भाषा-जाति-प्रजाति-धर्मसम्प्रदाय-संस्कृतिक्षेत्रगतपरिचयादीनां तत्त्वानां प्रतिस्पर्धित्वं न मत्वा राज्यावयवत्वं स्वीकृत्य बृहत्तरैकताधारेण यत् सुसंयोजनं विधीयते, तदेव राज्यराष्ट्रम् (State Nation) । अतः सिद्धान्तेऽस्मिन् प्रतिस्पर्धिराष्ट्र-राष्ट्रियतानां सङ्घर्षाय स्थानं न भवति । तेन यावत् शीघ्रं राज्यराष्ट्र-सिद्धान्तो द्वि-राष्ट्रियतावादं विजेष्यते, तावदधिकं देशहितं भविष्यति ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

५. बहु-राष्ट्रियता

एकस्मिन्नेव भू-राजनीतिके वैधानिके राज्ये राष्ट्राणां बहुत्वं भवतीति मान्यता बहु-राष्ट्रियताधारणायां निहितास्ति । राज्यमेकीकृतं परन्तु नैकानि राष्ट्राणि । भाषा, जातिः, प्रजातिः, धर्मसम्प्रदायः, संस्कृति-क्षेत्रगतः परिचय इत्यादितत्त्वानां विविधसन्दर्भानुसारेण परिभाषीकरणेन देशस्य राष्ट्रबहुलत्वं मन्तुम्, भू-राजनीतिक-वैधानिकदृष्ट्या एकीकृते देशे (राज्ये) तेषां समन्वयं विधातुञ्च शक्यत इति मान्यतैव बहु-राष्ट्रियता (Pluri-Nationalism) वर्तत इत्यभिप्रायः ।

कतिपये जनास्तु द्वि-राष्ट्रियताश्च बहु-राष्ट्रियतारूपेण परिभाषां कुर्वन्ति । द्वि-राष्ट्रियताया बहु-राष्ट्रियतायाश्च द्वयोरेव अवधारणात्मकः आधारो राष्ट्रराज्येन (Nation State) साम्यं भजते । राष्ट्रराज्य-सिद्धान्ते इव द्वि-राष्ट्रियता-बहु-राष्ट्रियतयोश्च भाषा-जाति-प्रजाति-धर्मसम्प्रदाय-क्षेत्रसंस्कृतिगतपरिचयादयो राष्ट्रस्य परिभाषायै निर्णायकतत्त्वरूपेण मन्यन्ते । राज्यराष्ट्र-सिद्धान्ते जातिः, प्रजातिः, भाषेत्यादितत्त्वानामेकलस्थितिरादर्शस्थितिर्मन्यते परन्तु द्वि-राष्ट्रियता-बहुराष्ट्रियतामान्यतयोस्तु भिन्नानामपि अवयवानां परस्परं स्वार्थस्य, रणनीतेः, आदानप्रदानयोश्च मिलितावस्थायामेकस्मिन्नेव राज्ये द्वे बहूनि वा राष्ट्राणि भवितुं शक्नुवन्ति । एतन्मध्ये एतदेव पार्थक्यं वर्तते । सामान्यत इमाः तिस्र एव

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

मान्यताः सङ्कीर्णराष्ट्रियतावादि चिन्तनमाश्रयन्ते।

बहुराष्ट्रियराज्यस्य पुरातनं सफलञ्च उदाहरणं स्वीजरल्याण्डदेशो मन्यते। केभ्यश्चिद् वर्षेभ्यः पूर्वं बोलिभिया राष्ट्रराज्यतो बहुराष्ट्रियराज्यरूपेण स्वरूपान्तरणस्य औपचारिकीं घोषणामकरोत्। परस्परं वैरस्य विद्वेषस्य च भावयुक्तानामवयवानां बाध्यात्मकपरिस्थितिकारणेन सहवसनमावश्यकं भवति। तदानीमुपायरूपेण प्रयोज्यं सूत्रमस्ति बहु-राष्ट्रियता। यद्यपि अस्माकमेकं राष्ट्रं न विद्यते तथापि सहवसनस्य विकल्पाभावे एक उपायः कल्पनीय इति चिन्तनेन आविष्कृतेयं बहु-राष्ट्रियता। केनचित् कारणेन एकीकरणस्य अभावेन असामर्थ्येन वा पृथक्त्वेन विद्यमानानामस्थिराणां राज्यत्वमनापन्नानां वा अवयवानां पास्परिकस्य स्वार्थस्य व्यवस्थापनाय च एकं सूत्रमस्ति बहु-राष्ट्रियता परन्तु बहुराष्ट्रियराज्यस्य घटकत्वेन स्थितानां राष्ट्राणां मध्ये सङ्कीर्णस्य स्वार्थस्य अविश्वासस्य घृणायाश्च सम्बन्धस्य विद्यमानत्वाद् एतादृश्यामदृढभूमौ निर्मितं राज्यभवनं यदा कदापि पतितुं शक्नोति।

राष्ट्रं राज्यञ्च पृथक् तत्त्वे इत्यङ्गीकृतवद् युरोपमहाद्वीपीयं प्रतिमानमाधृतवन्तो बहु-राष्ट्रियतायाः पक्षपातिनो राष्ट्रवादस्य देशभक्तेश्च पृथक् पृथक् परिभाषे प्रस्तुवन्ति। आपाततो विचारिते सति बहु-राष्ट्रियता एकतां समन्वयं समोवेशात्मकं व्यवहारञ्च परिपोषयतीति प्रतीयते तथापि अवधारणात्मके स्तरे बहु-राष्ट्रियता एका विपरीता दृष्टिवर्तते। यतो हि, राष्ट्रराज्य-द्विराष्ट्रियतयोरिव एतस्याञ्च अविश्वासो घृणा विनिमयश्च सम्बन्धस्याऽऽधारा भवन्ति। भाषा-जाति-प्रजाति-धर्मसम्प्रदाय-सांस्कृतिकपरिचयादीनां भिन्नत्वेन राष्ट्राणां भिन्नत्वमङ्गीकृत्य तेनैव हेतुना राष्ट्रियतायाश्च वैभिन्न्यमस्तीति सङ्कीर्णराष्ट्रियतावादि चिन्तनं बहु-राष्ट्रियतायां भवति। अवधारणास्तरे हि विविधानामवयवानां पृथक्त्वमङ्गीक्रियते चेत्तदेव पार्थक्यं कदाचित् सङ्कीर्णमहङ्कारं जनयेत्। अथ च एकीकृतस्य बहुराष्ट्रियराज्यस्य प्रतिस्पर्धीनि राष्ट्राणि पृथक्तावादिनः सङ्घर्षस्य औचित्यस्य प्रमाणीकरणाय तत्र साधनं प्राप्नुवन्ति।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0 In Public Domain. Digitization by eGangotri

आससारं स्वास्तित्वसाधिका परिचयमूला राजनीतिः (Identity Politics) व्याप्ता वर्तते । एतेनैव हेतुना घृणावादि विखण्डनञ्च जायमानं दृश्यते । एतस्मिन्नवसरे बहुराष्ट्रियतेयं पृथक्तावादिनं सङ्घर्षमितोऽपि परिपोषयतीति सन्देहमेघाच्छन्नता वर्तते। एकस्मिन्नेव देशे नैकासां प्रजातीयानां जातीयानाञ्च कबिलात्मिकानां संरचनानां विद्यमानत्वे तादृशेषु देशेषु बहु-राष्ट्रियताधारेण नरसंहारात्मिकायाः शोणितप्रवाहशृङ्खलायाः प्रारम्भस्य भयावस्था इतोऽपि प्रवृद्धेति अनुमितमस्ति। एतादृश्या दुरवस्थाया निराकरणाय सैद्धान्तिक आधारो राष्ट्रराज्य-द्विराष्ट्रियता-बहुराष्ट्रियताद्यासु अवधारणासु नहि लभ्यते। तन्निराकरणाय राज्यराष्ट्रम् (State Nation) इति सिद्धान्तः प्रभावशाली भवितुं शक्नोति ।

पुरातनं युरोमहाद्वीपीय-प्रतिमानाधृतं राष्ट्रराज्यम् (Nation State) इति सिद्धान्तः तत्रत्यानां राष्ट्रियतानां परिचयेन परिभाषीकरणेन सीमाङ्कनस्याधारनिर्माणेन च समुचितमवदानमकरोत् परन्तु स एव कालान्तरे सङ्कीर्णराष्ट्रियतावादि चिन्तनं परिपोष्य आसंसारं विपरीतं प्रभावसृजत्। तथैव केषुचिद्देशेषु समस्यासमाधानाय सूत्ररूपेण पुरस्कृता बहु-राष्ट्रियतावधारणा च बृहति विश्वपरिवेशे घृणाधृतां परिचयमूलां राजनीतिं परिपोष्य समष्टौ विपरीतं प्रभावमुद्भावयति । यतो हि, देशान्तःस्थानां भाषा-जाति-प्रजाति-समुदाय-सम्प्रदायादीनां पृथक्त्वस्य (राज्यमेकीकृतं परं नैकानि राष्ट्राणि) मननानन्तरं तादृशस्य देशस्य एकता रणनीतिपरा कृत्रिमा विश्वासरहिता च भवति। रणनीतिपरेण कृत्रिमेण अविश्वासधारितेन चैक्येन सृष्टो देशः (राज्यं) विविधावयवेषु सञ्चल्यमानानां प्रतिस्पर्धिराष्ट्रियतानां सङ्घर्षं व्यवस्थापयितुं न शक्नोति। उपर्युक्तं तथ्यमाधृत्य विचारे विहिते सति यदि समुचितेनोद्देश्येन बहुराष्ट्रियस्य राज्यस्यापेक्षा पुरस्कृता चेदपि परिणामो विपरीत एव भविष्यतीति प्रमीयते ।

कस्यापि देशस्य बहुराष्ट्रियराज्यत्वस्य (Pluri-Nation State/Multi-Nation State) स्वीकरणस्य तात्पर्यं तत्रत्यानां विविधानां जाति-प्रजाति-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

भाषिकसमुदाय-धार्मिकसम्प्रदाय-क्षेत्रीयपरिचय-सांस्कृतिकपरिचयरूपाया महत्त्वाकाङ्क्षायाः सांस्कृतिक-सामाजिक-सामञ्जस्य-मान्यतादृशा सम्बोधनमकृत्वैव राजनीतिप्रतिस्पर्धायै संरचनानिर्माणं वर्तते । एतादृशी राजनीतिकी प्रतिस्पर्धा समावेशात्मिका, समन्वयाभिमुखी एकतात्मिका च भवितुं शक्नोति, आहोस्वित् सङ्कीर्णा अहङ्कारवादिनी, पार्थक्यवादिनी, वैभिन्न्यवादिनी, घृणावादिनी च भवितुमपि शक्नोति । नेपाले बहु-राष्ट्रियतायाः सङ्कथनेन सहैव वर्धमाना समस्या सङ्केतयति यद् बहु-राष्ट्रियताया मान्यता विषवृक्ष इव विस्तीर्य विकसतीति सम्भावना विद्यते ।

नेपाले बहु-राष्ट्रियतायाः प्रवर्धका नैके सन्ति परन्तु तेषां परस्परं स्वार्थसम्बन्धो वर्तते । देशेऽस्मिन् बहु-राष्ट्रियतायाः परियोजना अग्रेसारिता वर्तते । कार्येऽस्मिन् अत्रत्यानां जातिवादिनां (Ethnicist) प्रजातिवादिनां (Racist) कथित-वामपथि-कम्युनिष्ट-मार्क्सवादि-लेनिनवादि-माओवादि-समाजवादिनाम् एवञ्च नेपालस्य मौलिक-पारम्पर्य-धर्मसंस्कृती, सामुदायिकं सहृदयतासम्बन्धञ्च विकारयितुकामानानामन्तरराष्ट्रियाणां संयन्त्राणां सहकार्यमस्ति । तत्कालीनेन माओवादिदलेन कथितजनयुद्धस्य कृतेऽवलम्बिता जातिवादिनी (Ethnicist) प्रजातिवादिनी (Racist) सामरिकनीतिः, तत्सम्बद्धा परिघटना च इह विवेचनीये स्तः । अनल्पैरन्तरराष्ट्रियैरसर्वकारीयैः सङ्गठनैः (INGO) वैदेशिकस्रोतस्संयन्त्रैरन्यैश्च परिपोषितस्य बहु-राष्ट्रियतावादस्य उद्घोषवतामेकत्रीभवनस्य क्रमश्च दृश्यते । माओवादिदलादेव वियुक्तो एको वर्गो नवशक्तीति दलनाम गृह्णन् नेपालं विविधजातीयसमूहस्य गठबन्धनमात्रत्वं प्रोच्य जातिवादिविखण्डने निरत आसीत् । परिचयमूलां राजनीतिमाश्रितवद्भिरपरदलैः सह मिलित्वा दलमिदं समाजवादिदलरूपेण परिवृत्य पुनश्च जनतासमाजवादिदलनाम्ना परिवर्तितमिति घटनाक्रम इह समुल्लेख्यो वर्तते ।

नेपाले अवध-डोटेलि-किरात-मिथिला-खसान-जडान-ताम्सालिङ्-लिम्बुवान्-खम्बुवान्-तमुवान्-थरुहट-भोजपुरा-मगराताख्यादीनां नेवाख्यस्य

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0 In Public Domain. Digitization by eGangotri

च प्रदेशस्य प्रान्तस्य राज्यस्य वा नामभिः सञ्जातैर्गतिविधिभिः कीदृशः प्रभावः सृष्टोऽस्तीति विषयेऽनुसन्धानमवशिष्टमेव परन्तु मानसिकं विखण्डनम्, साम्प्रदायिकस्य घृणावादस्य प्रवर्धनम्, देशेऽन्तहीनस्य सङ्घर्षस्य दण्डानलोद्दीपनञ्च तेषामभीष्टमिति आक्षेपः श्रूयमाणो वर्तते । वैज्ञानिकेन विश्लेषणेन ज्ञायते यद् बहुराष्ट्रियतेति कथिताद् अर्थहीनाद् युरोपमहाद्वीपीयात् पुरातनप्रतिमानात् (Outdated European Paradigm) प्रादुर्भूता घृणवादिनी मान्यता याथार्थ्येन नेपालीयाया राष्ट्रियताया मूलत आघातकं शस्त्रं सम्पन्नास्ति ।

बहु-राष्ट्रियताया मूले स्थितोऽन्तर्विरोधिनी दृष्टिः स्वरूपतो दुष्परिणाममेव जनयतीति संसारस्य विविधानां स्थलानां साक्ष्यैः प्रदर्शितं वर्तते । यदा तु विखण्डनकरी पृथक्तावादिनी घृणाधृतावधारणा मान्यते, तदानीं तद्व्राव्यस्य विखण्डनस्य कश्चन सीमा न भवति । जातीय-क्षेत्रीय-भाषिकादिविविधतायुक्तस्य देशस्य सन्दर्भे बहुराष्ट्रियता (Pluri-Nationalism) इत्यवधारणा यावत् प्रवर्धते, तावत्प्रमाणेन परिचयमूला राजनीतिः (Identity Politics) इत्यभिधेये दावदहने मार्तैलसेचनमिव भवति ।

नेपालस्य भारतस्य संयुक्तराज्यामेरिकादेशस्य अष्ट्रेलिया-क्यानडादिदेशानाञ्च सन्दर्भेषु बहु-राष्ट्रियता असान्दर्भिकी अवाञ्छिता च अवधारणा वर्तते । यतो हि, एतानि राज्यराष्ट्राणि वर्तन्ते । एतावदेव न, अपवादभूतान् कतिपयदेशान् विहाय प्रायो देशा बहुजातीया बहुभाषिका बहुसांस्कृतिकाश्च जायमानाः सन्ति । एतादृश्यामावस्थायां बहु-राष्ट्रियताया मान्यतानुरूपाया राज्यसंरचनाया अपेक्षया आसंसारं समस्या प्रचेष्यत एव[57] । अत एव विगतकाले राष्ट्रराज्यरूपेण परिभाषापन्नानां देशानाञ्च राज्यराष्ट्ररूपेण परिवर्तनमनिवार्यम् । बहु-राष्ट्रियताया अवधारणाया अव्यवहार्यत्वेन बहुराष्ट्रियराज्याख्यानां देशानाञ्च राज्यराष्ट्रसंरचनैव सान्दर्भिकी वाञ्छनीया च वर्तते ।

---

57 नवीनराज्यस्य कृते संसारस्य विविधेषु भूखण्डेषु सङ्घर्षरतानां सूची अस्यैव पुस्तकस्य परिशिष्टस्य द्वितीयेऽङ्के प्रस्तुतास्ति ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

६. राज्यराष्ट्रस्य सिद्धान्तीकरणम्

राज्यं (State) राष्ट्रं (Nation) चेति पदयोर्मध्ये राज्यशब्दं विशेषणस्थायीत्वेन प्राक्, राष्ट्रशब्दं विशेष्यस्थानीयत्वेन पश्चात् प्रयुज्य विर्निमितं 'राज्यराष्ट्रम्' (State Nation) इति पदम् एकं सैद्धान्तिकमभिनिर्माणम् (Theoretical Construct) अस्ति । षष्ठमिदमधिकरणमस्यैव पुस्तकस्य प्रथमद्वितीययोरधिकरणयोः परिचर्चिताया मूलावधारणात्मिकायाः पृष्ठभूम्याः, तदितरेषु अधिकरणेषु प्रस्तुतस्य तुलनात्मकस्य विश्लेषणस्य च प्रकाशनाय अग्रेसरितं वर्तते ।

६.१. राज्यराष्ट्रस्य प्रमेयम्

'राज्यराष्ट्रम्' इति पदे राष्ट्रशब्दस्य विशेष्यस्थानीयत्वेन एतस्य प्रमेयं राष्ट्रमस्ति । अतो विशेषणस्थानीयो राज्यशब्दः तस्य राष्ट्रस्य गुण-वैशिष्ट्य-स्वभावान् बोधयति । 'राज्यराष्ट्रम्' इत्यत्र मुख्योपादेयं तत्त्वं राष्ट्रमस्तीति भावः । अत्र राष्ट्रस्य परिभाषा राज्यस्य दृष्टिबिन्दुमाधृत्य निर्धार्यते । अतो 'राज्यराष्ट्रम्' इत्यत्र साध्यरूपेण राष्ट्रम्, साधनरूपेण च राज्यं वर्तते । एवं समष्टिरूपेण साध्यसाधनयोर्मिथोऽभिन्नस्य सम्बन्धस्य कारणेन राज्यमेव राष्ट्रम् (State as Nation) इति सिद्ध्यति ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

बौद्ध-जैन-बोन-वैदिक-किरातादीनां दार्शनिकमान्यतानां तात्पर्यानुशीलनेनात्र राष्ट्रमेव प्रमेयरूपं मुख्योपादेयतत्त्वं वाधिगम्यते। राष्ट्रस्य व्यावहारिकी सार्थकता राज्यतः खलु विनिश्चीयत इति तथ्यं वेदेषु, एतद्विषयसम्बद्धेषु शास्त्रेषु च प्रकटितं दृश्यते। वैदिकी मान्यतेयं बौद्ध-जैन-बोन-किरातादिभिश्च अङ्गीकृता वर्तते।

कस्यापि राज्यस्य उद्भवविकासयोः कृते विविधा पारिस्थितिकी सम्भाव्यता (Situational Probability) भूमिकां निर्वहति। केनापि कारणेन उद्भवेत्, राज्येन राष्ट्रियताविशेषश्च अवलम्बितो भवति। एवञ्च विशिष्टायाः तस्या राष्ट्रियताया सुदृढीकरणेनैव राष्ट्ररूपेण राज्यस्य सार्थकता विनिश्चीयते। अतो राज्यमेव राष्ट्रमिति कथनस्य तात्पर्यं राष्ट्रनिर्माणस्य प्रक्रियाया साधनत्वेन राज्यस्य निर्णयात्मिका भूमिका भवतीति तथ्यस्य स्वीकारः खलु।

६.२. राज्यराष्ट्रस्य प्रमाणम्

राज्यराष्ट्रस्य सिद्धान्तीकरणं मूलतो राष्ट्रस्य वैदिकाद् बौद्धाच्च वाङ्मयात् प्राप्तस्य ज्ञानस्य, आसंसारं स्थितानां राष्ट्राणामितिहासस्य च स्थितिगत्यात्मकं विश्लेषणमाधृत्य विहितमस्ति। नेपालस्य मौलिक-सनातनानां बौद्ध-जैन-बोन-वैदिक-किरातादिपद्धतीनां भौगोलिकी, ऐतिहासिकी, दार्शनिकी च आधारशिला समाना वर्तते। अतो राज्यराष्ट्र-सिद्धान्तः समेषाञ्च तेषां समन्वयेनाभिनिर्मिता वर्तते। वैदिकमान्यतानुरूपं राष्ट्रं युगानुकूलपद्धत्या भू-राजनीतिक-वैधानिकतापन्नं निश्चितभौगोलिकसीमबद्धञ्च राज्यमस्ति, यत्र विविधानां भाषा-क्षेत्र-जाति-प्रजाति-संस्कृति-समुदाय-सम्प्रदायादीनां समन्वयेन समष्टिरूपा राष्ट्रियता निर्धारिता भवति।

वैश्विकस्तरे '**वसुधैव कुटुम्बकम्**' इति आदर्शमङ्गीकृतवन्तो वैदिकर्षयो मानवान् क्षेत्र-जाति-प्रजाति-समुदाय-सम्प्रदायादिभेदेन न विभज्य समष्टिरूपेण '**कृण्वन्तो विश्वमार्यम्**' इत्यभिदधुः। समग्रोऽयं संसारः समष्टिरूपेण अखण्डो वर्तते, तथापि नैककारणैर्विश्वस्मिन् विश्वेऽनेकानि राष्ट्राणि परिकल्प्यन्त इति व्यावहारिकस्य याथार्थ्यस्याभिज्ञा वैदिकमन्त्रष्टार ऋषयः स्वतन्त्रराष्ट्रस्य

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

विविधानामायामानां विषये च पर्यचिन्तयाम्बभूवुः। राष्ट्रपरिकल्पनस्य सत्स्वपि विविधेषु आधारेषु एतस्य निर्णायक आधारो निश्चितभौगोलिकसीमबद्धं राज्यमेवेति मान्यता वैदिवाङ्मयेऽवाप्यते । दिक् (Space) कालः (Time) च अनयोर्मध्ये दिगेव प्राथमिकीति वैदिकमान्यतामङ्गीकृत्य एकं निश्चितभौगोलिकसीमबद्धं राज्यमेव राष्ट्रियतायाः परिभाषायै निर्णायकं तत्त्वमिति मननं वैदिकविचारधारायां नूनं स्वाभाविकम् ।

प्राचीने हिमवत्खण्डे भारतवर्षे च स्थितानां नैकेषां राज्यानाम्, आधुनिके युगे वर्तमानानां नेपाल-भारत-संयुक्तराज्यामेरिकादीनाञ्च राष्ट्रियतायाः परिभाषा मूलतो राज्यत एव निःसृतास्ति। अतिप्राचीनस्य न, अपि तु प्राचीनस्य, मध्यकालीनस्य, आधुनिकस्य च नेपालस्य विषये प्रोच्यते चेन्नेपालस्य राष्ट्रियतायाः प्राथमिकं तत्त्वं राज्यमेव दरीदृश्यते। नेपालस्य केन्द्रीभूय स्थितं नेपालमण्डलक्षेत्रम्, अत्रत्य आदिवासी नेवारसमुदायश्च राज्यराष्ट्रम् (State Nation) इत्यस्य प्रबलं प्रमाणं खलु। एतादृशान्येव प्रमाणाणि नेपालस्य मिथिलाक्षेत्रेऽन्यान्यक्षेत्रेषु च समुपलभ्यन्ते। मेची-कोशी-गण्डकी-कर्णाली-महाकालीनां प्रस्रवणक्षेत्रेषु प्राचीनकालतो विद्यमानाया विविधतायाः परस्परं समन्वयेन नेपालीयाया राष्ट्रियताया उद्भवो विकासश्च राज्यराष्ट्र-सिद्धान्तस्य व्यावहारिकं साक्ष्यम् । भारत-संयुक्तराज्यामेरिकादयो देशा राज्यराष्ट्रस्यैव नैके दृष्टान्ताः ।

एवं राज्यराष्ट्रस्य प्रमेय-प्रमाणानां विद्यमानता प्रमाणीकरोति यद् 'राज्यराष्ट्रम्' इत्यावधारणाया दार्शनिकस्य विमर्शस्य, सिद्धान्तीकरणस्य च कृतेऽपेक्षिताः पूर्वाधारा विद्यन्त एव । तुलनात्मकस्य विमर्शस्य कृते राष्ट्रराज्य-द्विराष्ट्रियता-बहुराष्ट्रियतानाम्, राज्यराष्ट्रस्य विपरीतानामवधारणानाञ्च विद्यमानत्वेन उपर्युक्तस्य दार्शनिकविमर्शस्य सिद्धान्तीकरणस्य च आयामो बृहत्तरताङ्गतो वर्तते।

६.३. राज्यराष्ट्रस्य सिद्धान्तत्वं कथम् ?

सकला अवधारणा सिद्धान्तमाधृत्य हि विकसन्ति इति न, परन्तु

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri
सकलानाञ्च सिद्धान्तानां मूलं अवधारणा अवश्यं भवन्ति। राज्यराष्ट्रञ्च एकः सिद्धान्तोऽस्तीति अस्मदीया मान्यता। राज्यराष्ट्रं सिद्धान्तः (Theory) वर्तत इत्यत्र सन्ति स्पष्टानि कारणानि । प्रथमं कारणम्, राज्य-राष्ट्र-राष्ट्रियतादिप्रमेयाणां परिभाषाम्, राष्ट्रियतासम्बद्धानां परिघटनानां वैज्ञानिकपद्धत्या विवरणञ्च प्रस्तोतुं राज्यराष्ट्रे आधारः प्राप्यते। एवं परिभाषात्मकस्य विवरणात्मकस्य च (Definition and Description) प्रकार्यस्य कृते इदं क्षमतावाहति।

द्वितीयं कारणम्, राज्यराष्ट्रदृष्ट्या राष्ट्रियतासम्बद्धानां परिघटनानां रीतिपूर्वकं प्रणालीबद्धं (Systematic) वा व्याख्यानं सम्भवति । एवं व्याख्यात्मकस्य प्रकार्यस्य (Explanation) कृते एतत् प्रभवति।

तृतीयं कारणम्, सम्बद्धानां परिघटनानां कारणानां (Cause) प्रभावाणां (Effects) च अन्तःसम्बन्धं विश्लेष्य राज्यराष्ट्रदृष्ट्या भविष्यत्कालिकपरिणामा आकलयितुं शक्यन्ते आहोस्विद् विधेयात्मकस्य प्रकार्यस्य (Prediction) कृते एतत् क्षममस्ति।

चतुर्थं कारणम्, केनापि परिपूर्णेन सिद्धान्तेन नियन्त्रणात्मकं (Control) प्रकार्यं कर्तुं शक्यते। एतच्च राज्यराष्ट्रं पूरयति। अवधारणात्मके स्तरे हि राज्यराष्ट्रं केवलं सीमबद्धं नास्ति । एतदीया मान्यता व्यवहारे च प्रयोक्तुं शक्यन्ते । एवं राष्ट्रियताया व्यावहारिके कार्यान्वयने, राज्यस्य संरचनायाम्, नागरिकाधिकारस्य, राजनीतिकाधिकारस्य, सांस्कृतिकाधिकारस्य च प्रचलनेष्वपि राज्यराष्ट्रस्य निर्णायिका भूमिका भवतीति एतस्य नियन्त्रणात्मकं प्रकार्यं स्पष्टं खलु । प्रयोगशालाया नियन्त्रितावस्थायां प्रकृतिविज्ञानस्यानुसन्धानमिव कार्यसम्पादनरूपं नियन्त्रणात्मकं प्रकार्यमिह नाभिप्रायः, अपि तु सिद्धान्तस्य कार्यान्वयनकारणेन समाजे राज्ये वा नवीनायाः परिघटनायाः स्थितिसर्जनमत्र सङ्केतितमिति बोद्धव्यम्।

एवंरीत्या 'राज्यराष्ट्रम्' एकः सिद्धान्तोऽस्ति। यतो हि, सिद्धान्तोऽयं यस्य कस्यापि सिद्धान्तस्य चत्वारि प्रकार्याणि आत्मसात्कृत्य आधुनिकसिद्धान्तस्य सकलानि वैशिष्ट्यानि पूरयति । यस्य कस्यापि सिद्धान्तस्य प्रश्न-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

सन्देह-परीक्षणान्तर्गतत्वेन सर्वविधः सिद्धान्तः सर्वदा परीक्षणीयो भवति । अतो राज्यराष्टसिद्धान्तश्च परीक्षणीयोऽस्ति । अभिनिर्मितस्य राजनीतिकस्य दर्शनस्य, सिद्धान्तस्य च परीक्षणं प्रथमं तर्काधृतं भवति । पश्चाच्च समाजिकस्य प्रभावस्य विकारस्य वा सापेक्षताधारेण तन्मूल्याङ्कनं भवति ।

६.४. राज्यराष्ट्रस्य बौद्धवैदिकादिसन्दर्भाः[58]

उपरि द्वितीयेऽधिकरणे विहितया परिचर्चया स्पष्टीकृतमेतद्यत्, राज्येन, राज्यशासनप्रणाल्या, शासकेन च कथं भाव्यमिति विषये हिमवत्खण्डे भारतवर्षे च सभ्यताया आरम्भत एव चिन्तनमासीदिति । अनेकतायामेकता वैदिक्या विश्वदृष्टेश्चरित्रमस्ति । अनेकतायां विश्वासं परिहाय धर्मस्य, संस्कृतेः, दार्शनिकचिन्तनस्य च एकपक्षीयाभिव्यक्तिरपि नहि व्यावहारिकी । बहुलतायाः स्वीकारमान्यता भारतवर्षीयं दार्शनिकं चिन्तनमाश्रितासु सर्वासु विचारधारासु लभ्यते । सर्वे सहभावेन समुन्नतिं कुर्याम, सहैव सम्यग् उच्यास्म, सहैव सत्कर्म आचर्यास्मेत्यादयो वैदिकोपदेशाः, सर्वे सहभावेन निवसेम, सहैव भुञ्जीमहि, सहैव कर्म आचरेम इत्यादयो वैदिकोद्घोषाः, विविधा विश्वसंस्कृतयः स्वपरिवेशानुकूल्येन स्वान्तर्गतान् जनान् शिक्षयेयुरिति उपनिषच्चिन्तनम्, उदारचरितानां कृते सकलोऽपि संसारः कुटुम्बायत इति उदात्तो

58 अस्योपशीर्षकस्यान्तर्गतानां सामग्रीणां लेखनकाले आधारत्वेनाङ्गीकृतासु सन्दर्भसामग्रीषु विशेषत उल्लेख्याः सन्ति– काशीप्रसाद जायसवाल (ख्रीष्टाब्दस्य १९२४), रामशरण शर्मा (ख्रीष्टाब्दस्य १९९०), शिवदत्त ज्ञानी (ख्रीष्टाब्दस्य १९४४), श्रीपाद दामोदर सातवलेकर (ख्रीष्टाब्दस्य १९५०), सत्यकेतु विद्यालङ्कार (ख्रीष्टाब्दस्य २०११) च ।

तथैव अइयर (ख्रीष्टाब्दस्य १९९३), अधिकारी (ख्रीष्टाब्दस्य २०१०, २०१२, २०१४, २०१६), गजेन्गड्कर (ख्रीष्टाब्दस्य १९९३), घोसाल तथा बसक (ख्रीष्टाब्दस्य १९९३), बनर्जी (ख्रीष्टाब्दस्य १९८०), मित्र (ख्रीष्टाब्दस्य १९९१), शास्त्री (ख्रीष्टाब्दस्य १९९३), सरकार (ख्रीष्टाब्दस्य १९९३) च द्रष्टव्यम् ।

पुनश्च परिचर्चायै द्रष्टव्यम् : अधिकारी (वैक्रमाब्द २०५७, २०६२, २०६३ क, २०६३ ख, २०६३ ग, २०६६, २०७१, २०७२, २०७५ क, २०७५ ख, २०७५ ग, २०७६ क, २०७६ ख) । जैनानां राजनीतिकचिन्तनसन्दर्भे द्रष्टव्यम्– पाण्डे (ख्रीष्टाब्दस्य १९८४) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0 In Public Domain. Digitization by eGangotri
नैतिककोद्घोषश्च राज्यराष्ट्रस्य दार्शनिकी आधारभूमिर्वर्तते।

चीन-नेपाल-भारतानां समाजस्य, युरोपीयसमाजस्य च दार्शनिकी आधारभूमिः पृथगेवेति सत्यम् । वस्तुतो नेपाल-भारतादिदेशेषु बौद्ध-जैन-वैदिकादिदर्शनैर्निर्मिता आधारभूमिरतीव प्रबला वर्तते । एवञ्च आधारभूमिरियं स्वविरोधि चिन्तनं दर्शनञ्च सम्मानयति, ताभ्यां स्वकीयां छायां प्रयच्छति । ब्रह्मभिन्नं न किञ्चन परन्तु यच्च विश्वस्मिन् विश्वे दृग्गोचरीभवति, तत्सर्वमपि ब्रह्म इत्युदारचेतनारूपे मूले समुद्भूतायाः सर्वसमावेशिन्याः संस्कृतेर्दार्शनिकी आधारभूमिरेव लक्षशो वर्षेभ्योऽस्तित्ववतो वैविध्यस्य बाहुल्यस्य वा हेतुः । एकामेव सभ्यतामाश्रित्य सत्तावतां राज्यानामधिकारक्षेत्रसहितानां राष्ट्रियतानामस्तित्वं मननीयं खलु । वस्तुतो बौद्धाया वैदिक्याश्च मान्यताया आधारेण राष्ट्रसंरचना वैविध्याद् ऐक्यं प्रति उन्मुखताङ्गच्छति । पाश्चात्त्यैः प्रस्तुतं दार्शनिकं चिन्तनमैक्याद् वैविध्यं प्रति गच्छति परन्तु एकलचिन्तनहेतुना ते साफल्यं नाधिगच्छन्तीति तथ्यमितिहासेन प्रदर्शितमस्ति।

वैदिकमान्यतानुसारेण राष्ट्रं न केवलं भौतिकमस्तित्वम्, अपि तु आत्मिकी अनुभूतिश्च । बौद्धमान्यता च अनयैव मान्यतया सह तादात्म्यं भावयति। कतिपयानां माताग्रहानुयायिनां कृते तु उदारतावादि राष्ट्रियताचिन्तनं काल्पनिकविषयमात्रम्, परन्तु प्राचीनायां वैदिक्यां सभ्यतायां राष्ट्रस्य दार्शनिकं चिन्तनं राष्ट्रविषये विचारणस्य मननस्य वा चेष्टया प्रकटितमस्ति। राज्यस्योत्पत्ते-र्दार्शनिक-पृष्ठभूमिविषये अथर्ववेद इङ्गितीकरोति यत् प्राणिनां हितकामनया ऋषिभिर्बहुधा विचिन्त्य सिद्धान्तः परिकल्पितः, सिद्धान्तगता नियमाश्च परिपालिताः । तेषां चरित्रबलेनैव राज्ये शक्तिः प्रादुर्भूता । अतो राज्यस्य दार्शनिक आधारः तपः सच्चारित्र्यं सदाचारश्च सन्ति ।

आर्यशब्दस्य युरोपमहादेशीयं प्रजातिपरकमर्थं विहाय संस्कृतव्याकरणदृशा उच्यते चेत् सभ्याऽसभ्यराज्ययोर्द्वन्द्वो नहि जातीयताया युद्धम् । द्वन्द्वोऽसौ राजनीतिकराष्ट्रस्य अन्तर्गतत्वेन बोद्धव्यः, न तु जातीयस्य राष्ट्रस्य । इह

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri
राज्याधारेण राष्ट्रियतायाः परिभाषा विधीयते । राज्ये राष्ट्र-राष्ट्रियतयोर्विषये न कश्चन मतभेदो भवतीत्येवंविधा पद्धतिरियम् । अस्यां पद्धतौ सर्वे जनाः स्वस्योद्गमस्य, सामाजिकव्यवस्थायाः, श्रद्धायाश्चाधारेण स्वसंस्कृतिमनुसरन्तः शिक्षां दीक्षाञ्च गृह्णन्ति । राष्ट्रियताया विषये राज्ये मतभेदो न सम्भवत्येव । एतस्य दार्शनिक आधारोऽस्ति- ...एकोऽहं बहु स्याम्', 'ईशावास्यमिदं सर्वम्' इति । एकाकी अस्मि, अनेकतां प्राप्नुयाम्, वैश्विके वैविध्ये सर्वत्र ईश्वरीयः सुगन्धः प्रसृतोऽस्तीति भावः । वैदिकमान्यतानुरूपे राष्ट्रेऽनेकतायामेकता, एकतायामनेकता च स्वीकृते भवतः । राष्ट्रं राज्यरूपिणि मूले निर्मितं भवति । राज्यसत्ता राष्ट्ररूपेणैव अस्तित्ववती भवति ।

राष्ट्रमूलं सत्यतायां, बृहति, ऋते, उग्रे, दीक्षायाम्, तपसि, ब्रह्मणि, यज्ञे च आस्थितं भवतीति अथर्ववेदो ब्रूते (१२/१/१) । असत्ये, स्वार्थमूले वा आस्थितं राष्ट्रं प्रजाः सम्मानयितुं न शक्नोति । स्वार्थमूला राष्ट्रव्यवस्था खलु स्वार्थपरायणान् शासकान् जनयति । तादृशे राष्ट्रे ऋतस्य नियमस्य बन्धनं न भवति । यतो हि, स्वार्थस्य मूलेन ऋतं तिरस्क्रियते । यः स्वार्थी भवति, स सत्यस्य पक्षे दार्ढ्येन स्थातुं न शक्नोति । सत्यस्य मूलमाधृतं राष्ट्रं सदैव सत्यपक्षे दृढतया तिष्ठति । तत् स्वस्य सत्यपक्षेऽन्याँश्च साहज्येन प्रेरयितुं शक्नोति । सत्यतायाः कारणेन तत्स्वीकरणीयत्वञ्च वर्धते । एतादृशे स्वीकरणीयत्वे तदीया त्यागशीलता, दयापरता, करुणापरायणता, तपश्चर्या च भूमिकां निर्वहन्ति । तपोयुक्तस्य क्षमाशीलस्य च राज्यस्य दृष्टिः सङ्कुचिता न भवति । ईदृशे राष्ट्रे नैका जातयः, प्रजातयः, समुदायाश्च साहज्येन निश्चिन्ताः सन्तः चिरं स्वपरिचयेन स्वसत्तां साधयितुं शक्नुवन्ति । अन्ते यदीया दृष्टिर्विशालास्ति, स हि सकलं विश्वं कुटुम्बत्वेन अङ्गीकरोति । तदानीं राष्ट्रियता एकः पवित्रो यज्ञो भवति । राष्ट्रियता उत्सवायते । राष्ट्रयज्ञे सर्वेषां भूमिका भवति । योग्यतयैव तत्तद्भूमिका निर्दिश्यन्ते । वर्णः, जातिः, भौगोलिकता च गौणीभवन्ति । सर्वे स्वमातृभूमिं प्रति गर्वं कुर्वन्ति । ग्रामाः, जनपदाः, प्रान्ताश्च स्वराष्ट्रं प्रति गर्वं कुर्वन्ति । भारती (वाणी), इला (मातृभूमिः), सरस्वती (संस्कृतिः) च समानराष्ट्रियतायां समन्विता भवन्ति ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0 In Public Domain. Digitization by eGangotri

दैविक-भौतिकभेदेन राष्ट्रस्य द्वैविध्यं वर्णितमस्ति ऋग्वेदे (४/४२/१)। पृथिव्यप्तेजोवाय्वाऽऽकाशादि-तत्त्वानि दैविकराष्ट्राऽन्तर्गतानि सन्ति चेद् एतादृशे राष्ट्रे मानवीयो हस्तक्षेपो न सम्भवति। मानवाः तत्त्वानां कृते विधिं निर्माय स्वानुकूल्येन एतानि तत्त्वानि सञ्चालयितुं न शक्नुवन्ति। राष्ट्रं प्राणधारिणां भवति। प्राणधारिषु मानवः श्रेष्ठोऽस्ति। कस्मिँश्चिद्भागे निवसतां प्राणिनां समूह एव भौतिकं राष्ट्रं वर्तते (ऋग्वेदः ७/३४/१०-११)। दैविकराष्ट्राध्यक्षो वरुणो भवति चेद्भौतिकराष्ट्रस्य प्रशासको मानवो भवति। राष्ट्ररक्षां विना राज्यानि रक्षितानि न भवन्ति (ऋग्वेदः १०/२४/४)। एवंरीत्या राज्यराष्ट्रं सुदृढं स्थायि च भवति। यथार्थत एतादृशं राष्ट्रं देव-वीर-शिल्पि-ज्ञानि-श्रमिकैः पञ्चभी रक्ष्यते। कश्चन वर्ग उच्चो निम्नो वा न भवति (अथर्ववेदः ७/६/१)। यतो हि, सर्वे च ते एकस्या एव धरित्र्याः सन्ततयः।

राजा, सभा, समितिः, राजकृत्, मतदानेन राज्ञो चयनम्, राज्ञः पदच्युतिः, राज्ञः पुनः सिंहासनारोहणमित्यादयः सन्दर्भा वेदेषु समुल्लिखिताः प्राप्यन्ते।[59] राज्यसञ्चालनस्य सन्दर्भे आयामत्रयात्मिका संरचना ऋग्वेदे (३/३८/६) समुल्लिखितास्ति। सभा-समित्योर्महत्त्वं वेदे बहुवारमभिहितं वर्तते (अथर्ववेदः ३/२९/१-२, ७/१२/१-२)। सत्तासीनः शासक एव सर्वोपरि वर्तत इति मान्यतावतो मेकियावेलाख्यस्य, वर्गविशेषस्य दलमेव सर्वोपरीति मार्क्सवादमान्यतायाः, दलनाम्ना व्यक्तितन्त्रात्मकस्य लेलिन-स्टालिनवादाभ्यासस्य कृते च सदैव विधेः शासनं स्वीकरणशीलेषु वैदिकहिन्दु-बौद्धादिदर्शनेषु स्थानं नास्ति।

अथर्ववेदे राष्ट्र-राज्ययोरवधारणा साम्प्रतिकीव प्राप्यते। नैकेभ्यो राजनीतिकसिद्धान्तेभ्यश्च वेदेऽस्मिन् स्थानं प्रदत्तमस्ति। राष्ट्रस्य, राष्ट्ररक्षाया विविधोपायानाम्, विभिन्नानां शासनप्रणालीनाम्, संस्थानाम्, सिद्धान्तानाञ्च विषयेषु वेदेऽस्मिन् सुस्पष्टं समुल्लेखनं वर्तते। मानवानामितिहासे मातृभूमेरवधारणापि सर्वप्रथममथर्ववेदे हि उट्टङ्किताावाप्यते। प्रसिद्धं भूमिसूक्तमेव

---

59 ज्ञानी (ख्रीष्टाब्दस्य १९४४), पृ. १७३।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri
राष्ट्रियताया अवधारणां समुन्नीतवत् । सूक्तेऽस्मिन् ऋषिणा पृथ्व्यां मातृदृष्टिः, स्वात्मनि च तत्पुत्रदृष्टिः कृता वर्तते– **माता भूमिः पुत्रोऽहं पृथिव्याः** (१२/१)।

६.४.१. प्राचीना राज्यशासनप्रणाल्यः

वैदिक-वाङ्मयस्याध्ययनेन शासनोत्पत्तिसन्दर्भे षट् सिद्धान्ता निश्चयीक्रियन्ते-

१) व्यक्तिविशेषप्रधानः सिद्धान्तः २) मत्स्यन्यायसिद्धान्तः
३) सत्ययुगसिद्धान्तः ४) सामाजिकसन्धिसिद्धान्तः
५) पितृप्राधान्यसिद्धान्तः ६) दैवी सिद्धान्तश्च ।[60]

एवंरीत्या प्राचीनकाले हि नैकेषां सिद्धान्तानां मान्यतावाप्यते । अतो विभिन्नेषु भूभागेषु राज्यानामुत्पत्तिः केवलमेकेनैव हेतुनाभवदिति मन्तुं न शक्यते । तथ्यमिदमस्यैव पुस्तकस्य द्वितीयेऽधिकरणे विहितं विमर्शं प्रमाणीकरोति। 'पारिस्थितिकी सम्भाव्यता' (Situational Probability) इति पदयुग्म राज्योद्भवं व्याख्यातुमर्हति ।

राज्योत्पत्तेराधारत्वेन यः सिद्धान्तः स्वीक्रियते, तदनुरूपैव शासनप्रणाली निर्धायते। अतः प्राचीने हिमवत्खण्डे भारतवर्षे च नूनं शासनस्य विविधाः प्रणाल्यः प्राचलन्। ऐतरेयब्राह्मणे विविधाः शासनप्रणाल्यो वर्णिता वर्तन्ते–"**साम्राज्यं भौज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यं राज्यं महाराज्यं आधिपत्यमयं समन्तपर्यायी स्यात्, सार्वभौमः सार्वायुष आन्ताद् आ परार्धात् पृथिव्यै समुद्रपर्यन्ताया एकराडिति**" (८/३/१५)। ऐतरेयब्राह्मणस्य वचनेऽस्मिन् पूर्वं राज्यशासनप्रणाल्यः समुल्लिखिताः, उत्तरार्धे च कथितं यत् समुद्रपर्यन्तायाः पृथिव्या एकशासनमेकराडाधीनं भवति। अत्र पूर्वं राज्यशासनप्रणालीनां विषये चर्चां करवाम।

एकस्मादेव स्रोतसः प्रमाणस्य गृहीतत्वेऽपि नैकेषां लेखकानां शासनप्रणाल्याः सूचीषु मतैक्यं नावलोक्यते। यथा सातवलेकरः (ख्रीष्टाब्दस्य

60 ज्ञानी (ख्रीष्टाब्दस्य १९४४), पृ. १७४ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

१९५०) साम्राज्यम्, भौज्यम्, स्वाराज्यम्, वैराज्यम्, पारमेष्ठ्यराज्यम्, महाराज्यम्, आधिपत्यमयम्, समन्तपर्यायी चेति अष्ट नामानि उल्लिखितवान् वर्तते। जनराज्यस्य (जानराज्यस्य), गणराज्यस्य, राज्यस्य च वर्णनं वेदे प्राप्यत इत्यभिदधानः स एकादशविधानां राज्यशासनप्रणालीनां नामानि प्रस्तुतवान् अस्ति[61] परन्तु ज्ञानी (ख्रीष्टाब्दस्य १९४४) साम्राज्यम्, भौज्यम्, स्वाराज्यम्, वैराज्यम्, राज्यम्, पारमेष्ठ्यम्, महाराज्यम्, आधिपत्यम्, (स्वावश्यम्) इति उदलिखत्[62]। ऐतरेयब्राह्मणे समुल्लिखिताभ्योऽष्टविधशासनप्रणालीभ्योऽतिरिक्ताः प्रणाल्यश्च पश्चाद्भारतवर्षे प्रयुक्ता आसन्निति परिचर्च्य स राष्ट्रिकम्, पेत्तनिकम्, द्वैराज्यम्, अराजकम्, उग्रम्, राजन्यञ्चेति उल्लिखितवान् अस्ति ।[63] बौद्ध-जैन-वैदिकानां परम्पराणां ग्रन्थान् अन्विष्य जायसवालवर्यः (ख्रीष्टाब्दस्य १९२४) राजतन्त्रम्, गणतन्त्रम्, स्वाराज्यम्, वैराज्यम्, राष्ट्रिकम्, पेत्तनिकम्, द्वैराज्यम्, अराजकम्, दलशासितराज्यम्, (विरुद्ध-रज्जाणि), उग्रप्रणाली, राजन्यप्रणाली चेति शासनप्रणालीनामुल्लेखनमकरोत् ।[64]

राज्योत्पत्तेर्विषये विविधा मान्यतास्तु सन्त्येव। तथैव हिमवत्खण्डेनस्य भारतवर्षेण च सम्बद्धानां प्राचीनानां सन्दर्भसामग्रीणामध्यनेन पुरा शासनप्रणाल्यश्च विविधा व्यवहृता आसन्निति ज्ञायते। उपर्युक्तं विविधताभाण्डागारं तत्कालीनं समृद्धं राजनीतिकं व्यवहारं चिन्तनञ्च इङ्गितीकरोति । राजनीतिशास्त्रस्य युरोपकेन्द्रिताद् रेखीयादेकात्मकाद्वा सङ्कथनात्मकाद्विस्तारादपसृत्य तुलनात्मकं समीक्षात्मकञ्च विश्लेषणं विधातुमध्ययनीयसामग्रीणां पर्याप्तता मौलिकस्रोतसि वर्तत इति तथ्यञ्च उपर्युक्तात् कथनात् प्रकाशितमस्ति ।

पुरा पृथिव्यां नैकेषां राज्यानां सत्त्वम्, सकलायां पृथिव्यामेकमेव अविभाज्यं

---

61 सातवलेकर (ख्रीष्टाब्दस्य १९५०), पृ. ३८३।
सातवलेकरो जनराज्यस्य जानराज्यस्य च पृथक् पृथक् विशेषताः सन्तीत्यपि चर्चामकरोत् (पृ. ३८३)।

62 ज्ञानी (ख्रीष्टाब्दस्य १९४४), पृ. १७८-१७९।

63 ज्ञानी (ख्रीष्टाब्दस्य १९४४), पृ. १८०।

64 जायसवाल (ख्रीष्टाब्दस्य १९२४)।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

राज्यं स्यादिति अपेक्षामासीदिति तथ्यञ्च प्रमाणीकरोति ऐतरेयब्राह्मणस्थः "पृथिव्यै समुद्रपर्यन्ताया एकराड्" इत्यंशः। ऋग्वेदे एकराडस्य भुवनस्य राजसि शचीपति इन्द्रः' इत्युल्लिखितमस्तीति प्रदर्श्य अतिप्राचीनकाले राष्ट्ररूपस्य जगत एक एव राजा 'एकराट्' आसीदित्यभिहितं वर्तते।[65] एतादृशी अवस्था वर्तते न वेति अन्वेषणार्हो विषयः परन्तु तदानीं वैश्विक्याः शासनव्यवस्थाया अपेक्षा/भावना आसीदीति तु नूनं वक्तुं शक्यते। राज्यानां सीमासु सङ्कुचनं परिहाय वेदसंहिताया "माता भूमिः पुत्रोऽहं पृथिव्याः" इत्युद्घोषगताया मान्यताया आदर्शत्वं स्वीकृतमिति तथ्यस्य द्योतकरूपेण उक्तापेक्षा भावना वा मन्तुं शक्यते। आधुनिके युगे सर्वसमानाया विश्वव्यस्थायाः परिकल्पकानां कृते वैदिकसंहिताया ब्राह्मणग्रन्थस्य च वचनानि प्रेरणास्रोतांसि भवितुं शक्नुवन्ति।

६.४.२. राजतन्त्रं गणतन्त्रं राजधर्मश्च

वैदिकयुगे प्रथमं राजतन्त्रात्मिका पश्चाच्च गणतन्त्रात्मिका शासनव्यवस्थासीदिति जायसवाल उल्लिखितवान् अस्ति (ख्रीष्टाब्दस्य १९२४, पृ.२५) । यद्यपि संहिताग्रन्थेषु ब्राह्मणखण्डेषु च राजतन्त्रात्मिकाया गणतन्त्रात्मिकायाश्च उभयविधायाः प्रणाल्याः सूचनमवाप्यते। राजतन्त्रस्य गणतन्त्रस्य च द्वयोरेव पद्धतयोः प्रधानो राजैव कथ्येत, कथितः प्राप्यते च।[66] मान्यतयानया राजधर्मपदेन राजतन्त्रात्मिका गणतन्त्रात्मिका च उभयविधा शासनव्यवस्था सङ्केत्यते।

प्राचीनकालस्य शासनप्रणालीनां वर्गीकरणं मूलतो लोकप्रधानप्रणाली राजप्रधानप्रणाली चेति द्विधा कर्तुं शक्यत इत्युच्यते, यदनुसारेण साम्राज्ये राज्ये पारमेष्ठ्ये महाराज्ये आधिपत्ये च राजसत्ता, भौज्ये स्वाराज्ये वैराज्ये च लोकसत्ता प्रधानासीदीति बुद्ध्यते।[67] बौद्ध-जैनग्रन्थानामध्ययनेन राजतन्त्रम्, गणतन्त्रम्, वैराज्यम् (राजानं विना शासितम्), द्वैराज्यम् (शासकद्वयेन

65 महावीर (ख्रीष्टाब्दस्य २००१) पृ. २८।

66 रामशरण शर्मा, (ख्रीष्टाब्दस्य १९९०), पृ. ४८।

67 ज्ञानी (ख्रीष्टाब्दस्य १९४४), पृ. १७९।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0 In Public Domain. Digitization by eGangotri

शासितम्), यौवराज्यम् (युवराजेन शासितम्) इत्याख्यानां शासनप्रणालीनां सूचनावाप्यत इति ज्ञानमणिनेपालः समुल्लिखति ।[68] जैनग्रन्थे द्वैराज्यस्य गणराज्यस्य च उल्लेखोऽवाप्यत इति काशीप्रसाद-जायसवालवर्येण लिखितं वर्तते ।[69] एतावता नीश्चत्य वक्तुं शक्यते यद् अतिप्राचीनकालतः क्वचित् प्रजानां प्रतिनिधिभिः प्रत्यक्षशासना गणतन्त्रात्मिका शासनप्रणाली आसीच्चेत् क्वचिद् राजतन्त्रात्मिका शासनप्रणाली आसीत्, क्वचित्तु मिश्रिता (साम्प्रतिकसन्दर्भे संवैधानिक-राजसंस्थायुक्ता संसदीयव्यवस्थात्मिका) प्रणाली च आसीदिति । स्वाराज्यस्य स्वराज्यस्य वा प्रणाल्याः पुनरनुसन्धानेन वर्तमानयुगस्य भविष्यस्य कृते च उपयोगिन्या नवीनप्रणाल्या अभिनिर्माणं भवितुं शक्नोतीति संलक्ष्यते ।[70]

राजसत्तात्मकत्वेऽपि सर्वासु व्यवस्थासु निरपेक्षतया राज्ञः सर्वशक्तिमत्त्वात्मिका स्थितिर्नासीत् । यजुर्वेदे कतिपये मन्त्राः तादृशाः सन्ति, येभ्यः तदानीं प्रजाभ्यः प्रत्यक्षतो निर्वाचनेन राज्ञः चयनव्यवस्थासीदिति प्रावधानमपि दृश्यते (अथर्ववेदः १/४/६) । वैदिककाले यादृशी अपि शासनप्रणाली भवतु, तत्र शासकात् प्रजानामेव बलवत्तरतासीदिति कथने नातिशयोक्तिः स्यात् ।[71]

सम्राट्पद्धत्यनुसारेण सम्राज आज्ञैव सर्वमान्या भवति । राज्ञः सम्राजो वा कृतेऽपि नैतिकनियमा भवन्ति, असौ तदनुसारेणैव शास्ति । राज्ञा प्रजाना रक्षणम्, राष्ट्रोन्नयनम्, दुष्टेभ्यो दण्डप्रदानञ्च करणीयम् । स्वदण्डविधानेनैव राजा प्रतापी भवति (अथर्ववेदः ४/८/१) । विराट्पद्धतौ राजा न भवति । प्रजाः सर्वसम्मतिभिर्बहुमतेन वा निर्णयं कुर्वन्ति । अस्यां पद्धत्यां यः समूहनिर्णयो भवति, स एव मान्यो भवति ।

स्वराट्पद्धतौ केन्द्रीयशासनं भवति स्म । अथर्ववेदे स्वतन्त्रस्य

---

68 नेपाल, (वैक्रमाब्दस्य २०६६), पृ. ११ ।

69 जायसवाल (ख्रीष्टाब्दस्य १९२४), पृ. २६ ।

70 पुनश्च परिचर्चायै द्रष्टव्यम्– सातवलेकर (ख्रीष्टाब्दस्य १९५०) ।

71 द्रष्टव्यम्– ज्ञानी (ख्रीष्टाब्दस्य १९४४) तथा विद्यालङ्कार (ख्रीष्टाब्दस्य १९५०) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

राज्ञः कृते स्वराट्-शब्दः प्रयुक्तोऽस्ति, यः स्वकीयतेजस्विताबलात् शासको भवति (२०/११३/२)। प्रजाः तादृशं जनं चिन्वन्ति, य इन ऐश्वर्ययुक्तो वा भवेत्। वृत्रं पापिनमज्ञानिनं वा राजानं कर्तुं प्रजा नेच्छन्ति (अथर्ववेदः १२/१/३७)। अस्यां प्रणाल्यां प्रजाः प्रतिनिभिसभायां प्रतिनिधिसमित्यां च गच्छन्ति। केन्द्रीयसभायां केन्द्रीयसमित्याञ्च ते राज्यसम्बद्धान् नियमान् निर्मान्ति। राष्ट्रस्यास्य प्रजानां प्रतिनिधिशास्यत्वाद् अदो जनतन्त्रराज्यमित्यपि प्रोच्यते।

रामायणकालेऽपि राजपुत्र एव स्वतो राजा भवतीति निश्चयस्तु नासीत्। विशैः (प्रजाभिः) वृतः सन् कश्चन जन औपचारिकरूपेण राजा भवति स्म। राजपदे राज्ञ उत्तराधिकारिरूपेण ज्येष्ठाय राजपुत्राय प्राथमिकता दीयते स्म परन्तु तदनिवार्यं नासीत्। तदर्थं परिषदा अन्यस्यैव जनस्य चयनस्य सम्भावनापि प्रबलासीत्। विश्वकोशसदृशे महाभारते तु नैकप्रकारिकाणां शासनप्रणालीनां सङ्केतोऽवाप्यते।

ऐतिहासिकस्य विकासक्रमस्य सम्यङ्निरीक्षणेन भारतवर्षीयः समाजो वैदिककालतः पौराणिककालं प्रति यावदपसर्पति, तावल्लोकसत्ताया निर्बलीकरणं राजसत्तायाः सुदृढीकरणञ्चानुभूयते। नैकेषु पुराणेषु वर्णितं राजतन्त्रस्य राजवंशस्य च प्रधान्यमेतस्यैव तथ्यस्य द्योतकम्। इयमेव मान्यता दण्डनीतेरर्थशास्त्रस्य च परम्पराया ग्रन्थेष्वपि प्राप्यते। शुक्रनीतौ प्रायो राजसत्तात्मित्कायाः प्रणाल्या वर्णनं लभ्यते। अर्थशास्त्रं मनुस्मृतिश्च राजतन्त्रात्मिकायाः प्रणाल्याः कृते हि विरचितेऽनुभूयेते। पौराणिकस्य कालखण्डस्य शासको राजा वा बह्वधिकारवान् दृश्यते। प्राचीनयुगस्य राजवंशीयशासकानां विषये पुराणेषु अध्येतुं शक्यते। कासुचिदवस्थासु निरङ्कुशशासकविरुद्धस्य जनविद्रोहस्य कथाश्च पौराणिकग्रन्थपृष्ठेषु निबद्धाः सन्ति।

“प्राचीनस्य गणतन्त्रस्य विधानशासनव्यवस्थाविषयस्तु दुर्बोध्य एव। यतो हि, राजतन्त्रविषये लिखितानां बहूनां ग्रन्थानां समुपलब्धता वर्तते।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri
गणतन्त्रविषयेऽपि तदानीं ग्रन्था रचिताः स्युस्तथापि तदनुपलब्धता नास्तीति"[72] प्रोच्यते। राजतन्त्रात्मिकायाः पद्धतेः साङ्गोपाङ्गज्ञानदाः शुक्रनीतिः, मनुस्मृतिः, अर्थशास्त्रमित्यादयो ग्रन्थाः साम्प्रतमपि समुपलभ्यन्ते। गणतान्त्रिकपद्धतिविषये तादृशानां प्राचीनग्रन्थानामनुपलब्धत्वे उपर्युक्तरीत्या विचारितमिति बोद्धुं शक्यते, यद्यपि अन्वेषकैर्विविधानां प्राचीनस्रोतसामाधारेण प्राचीनगणतन्त्रपद्धतिविषये च विवरणं यथासम्भवं प्रस्तुतं वर्तत एव।[73]

गौतम-बुद्धस्य समये गणराज्यानां सत्तया सहैव राजतन्त्रात्मका देशाश्चासन् ।[74] बौद्धग्रन्थेषु च गणतन्त्रस्य बहुत्र उल्लेखोऽवाप्यते । शास्त्रीयेन सिद्धान्तप्रदेन (Doctrinal) प्रचलितेन (Popular) च उभयविधया राजनीतिं बौद्धदर्शनञ्च विश्लेष्य राजतन्त्रात्मकानां बृहतामधिराज्यानां तुलनया लघीयसां गणसङ्घानां विशेषतैव बुद्धविचारानुकूलेति कथनमवाप्यते ।[75] गौतमबुद्धस्य जन्म, लालनपालनम्, शिक्षा च गणराज्यस्य परिवेशेऽभवत्। अतो भिक्षुसङ्घस्य निर्माणावासरे तत्कालीनस्य गणराज्यस्य प्रचलनस्य प्रभावस्तस्मिन्नासीदिति विश्लेषणं प्राप्यते ।[76] सन्दर्भेऽस्मिन् 'दीघ्घनिकाय', 'महापरिनिव्वानसुत्त' इत्यनयोः प्रमाण्यञ्च प्रस्तुतमस्ति ।[77] एवंरीत्या बुद्धः, धर्मः, सङ्घ इति बुद्धस्य त्रिरत्ने सङ्घस्य संस्थानात्मकं स्वरूपमासीत् । सङ्घस्यास्य संस्थानीकरणाय बुद्धकालीनानां गणराज्यानां गणसङ्घानां वा पद्धतिः प्रचलनं वा दृष्टान्तीकृतमिति

---

72 नेपाल (वैक्रमाब्दस्य २०६६), पृ. १४।

73 द्रष्टव्यम्– काशीप्रसाद-जायसवालकृतं 'हिन्दु पोलिटी' (ख्रीष्टाब्दस्य १९२४)।

सत्यकेतु-विद्यालङ्कारकृतं 'प्राचीन भारतकी शासनपद्धति और राजशास्त्र' (ख्रीष्टाब्दस्य २००१)।

शिवनन्दन-मिश्रकृतम् 'एन्सिएण्ट् इण्डियन रिपब्लिक्स् : फ्रम् द अर्लिएष्ट टाइम्स टु सिक्स्थ् सेन्चुरी ए.डी.' (ख्रीष्टाब्दस्य १९७६)।

74 पोखरेल (वैक्रमाब्दस्य २०५५), पृ. ३४८-३५३।

75 जयसूर्या (ख्रीष्टाब्दस्य २००८), पृ. ४७।

76 जायसवाल (ख्रीष्टाब्दस्य १९२४), पृ. ४५।

77 जायसवाल (ख्रीष्टाब्दस्य १९२४), पृ. ४५-४७।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

बुद्ध्यते[78] परन्तु बौद्धग्रन्थानामनुसन्धानेन एकेनाध्येत्रा विचारदार्ढ्यं प्रकटितमस्ति यत् तदानीं गणतन्त्रस्यापेक्षया राजतन्त्रस्यैव पक्षपोषणमासीत् ।

राज्ञ एकलशासनप्रणाल्या गणतन्त्रात्मकशासनप्रणाल्याश्च अत्यन्तं विपरीतप्रणाल्योः समुल्लेखनं वैदिकवाङ्मये लभ्यते तथापि आधुनिके सन्दर्भे राजसहिता संसद् (King in Parliament) इति वक्तुं शक्यानां लोकतान्त्रिकपद्धत्यनुरूपाणां सभा (ऋग्वेदः १०/७१/१०, यजुर्वेदः १६/२४,२८ अथर्ववेदः ७/१२), समितिः (अथर्ववेदः ६/८८/३, ५, १९, १५) इत्येवंविधानां व्यवस्थासीदित्यपि ज्ञायते । राजतन्त्रस्य राजा भवेत्, गणतन्त्रस्य गणप्रमुखो (राजेति च सम्बोध्यः) वा भवेत्, वैदिकयुगे सभा-समिति-नामकाभ्यां संस्थाभ्यां राष्ट्रस्य आदर्शशासनं भवति स्मेति संलक्ष्यते ।[79] राज्यस्य प्रशासनसञ्चालनाय राज्ञा मन्त्रिमण्डलस्य गठनं करणीयम् । तस्य च मन्त्रिमण्डलस्य सभा-समितिभ्यामनुमोदनस्य प्रचलनं तदानीमासीत् ।[80] स्वाराज्यस्य स्वराज्यस्य वा प्रणाल्याः श्रेष्ठता प्राचीनग्रन्थेभ्यो ज्ञायते । जनसंसद्, संसच्चेति नामकयोः संस्थयोरुल्लेखो रामायण-महाभारतयोः प्राप्यते ।

अथर्ववेदकालीने राज्ये पञ्चविधाः लोकाः/प्रजा आसन्– ब्राह्मणः, क्षत्रियः, वैश्यः, शूः, निषादश्च । एतेषां सर्वेषां पृथिव्याः सन्ततित्वेन सर्वेभ्यः समानोऽधिकारो भवतीति अथर्ववेदेऽभिहितमस्ति (१२/१/१५) । राष्ट्रे निम्नोच्चभावो मास्तु, मित्रताया एकतायाश्च भावोऽस्तु (अथर्ववेदः १२/१/२), पारस्परिकसम्बन्धविच्छेदः कदापि न स्यात्, (अथर्ववेदः ३/८/१), सङ्गठनस्य सौमनस्य च विस्तारोऽस्तु (अथर्ववेदः ६/६४/१) इत्याकारिका भावना तदानीं प्रसृतासीदित्यनुभूयते ।

राष्ट्ररक्षार्थं सैन्यस्यापेक्ष्यत्वेन वेदे सैन्यसन्दर्भे च समुल्लेखनं लभ्यते

---

78 पुनश्च परिचर्चायै द्रष्टव्यम्– गर्ड (ख्रीष्टाब्दस्य १९५६), जयसूर्या (ख्रीष्टाब्दस्य २००८), जायसवाल (ख्रीष्टाब्दस्य १९२४), मुर (ख्रीष्टाब्दस्य २०१५, २०१६ अपि), विद्यालङ्कार (ख्रीष्टाब्दस्य २००१) च ।

79 द्रष्टव्यम्– स्वामी प्रपन्नाचार्य (वैक्रमाब्दस्य २०६०), पृ. ३७-३९ ।

80 द्रष्टव्यम्– स्वामी प्रपन्नाचार्य, (वैक्रमाब्दस्य २०६०), पृ. ७६-७७ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

(यजुर्वेदः ११/७७-८०, २९/३९)। अथर्ववेदे एकविंशतिप्रकारकाणां सैन्यानां व्यवस्थाया विषये सङ्केतोऽवाप्यते। वैदिककालीनायां सैन्यशक्तौ पुरुषैः सह नारीणाञ्च समाविष्टिर्विज्ञायते। इन्द्रस्य इनण्याश्च सेनापतित्वेन समुल्लेखनमथर्ववेदे प्राप्यते (२/३/१, १२७/४)। सामान्यतया युद्धमनुचितं मतं परन्तु कश्चन आक्रामति चेद् अवश्यं प्रत्याक्रमणीय इति निर्दिष्टं वर्तते। जीवनं राष्ट्रधनं मत्वाऽऽचरणाय वेदः प्रेरयति। राष्ट्ररक्षायै प्रजा राजा च समानरूपेणोत्तरदायिनो भवन्तीति ज्ञायते। सर्वहितकामना, सत्यालम्बनम्, पदार्थानां यथार्थज्ञानावाप्त्या प्राकृतिकनियमानां यथोचितं पालनम्, आस्तिकता, धार्मिकावाचारव्यवहारौ च वैदिकराजनीतेराधाररूपेण स्पष्टतोऽनुभवितुं शक्यन्ते।

शासकेन कदापि स्वेच्छाचारिणा निरङ्कुशेन च न भाव्यम्, सदैव दण्डनीतेरधीनस्थेन भाव्यम्, जनतायाः (प्रजानां विशानां नागरिकाणां) भृत्यभावेन स्वकर्तव्यं पालनीयञ्चेति मान्यता वैदिकवाङ्मयेऽवलोक्यते (द्रष्टव्यम्– अथर्ववेदः १५/९/१, १९/३७/२, ऐतरेयब्राह्मणम् ८/५)। समाजस्य सर्वतोमुखिकल्याणाय राज्यमिति तदानीन्तनी मान्यतासीत्। यजुर्वेदे याष्ट्रगानं वर्तते, तदस्याः खलु मान्यताया द्योतकमनुभूयते (२२/२२)। प्रजापालनाय स्वजीवनस्यापि उत्सर्जनाय तत्परता तस्मिन् युगे राजगुणो मन्यते स्म (अथर्ववेदः ४/८/१)।

शासकस्य स्वेच्छाचारित्वस्य, निरङ्कुशत्वस्य, पापित्वस्य च दृष्टान्ता न लभ्यन्त इति न। राज्ञो वेनस्य दृष्टान्तस्तु बहुश्रुतः खलु। वेनादीनां दुराचारिणां शासकानां विनाश ऋषिभिर्विहितः, तदानीं दुःशासकविरुद्धो जनविद्रोहश्च सञ्जात इत्यादीनि उदाहरणानि प्राप्यन्त एव।[81] बौद्धपरम्परायाञ्च सच्चङ्कजातके एकस्य क्रूरस्य दुराचारिणो राज्ञो विरोधाय सञ्जातेन जनविद्रोहेण तद्धननपूर्वकस्य अपरराजचयनस्य उल्लेखोऽवाप्यते।[82] पदकुशलमाणवजातके

81 अधिकारी निर्मलमणि (वैक्रमाब्दस्य २०६३ आश्विनः), विश्वको प्रथम जनविोह, वेनको पतन र नयाँ राष्ट्रको विधिनिर्माण, प्राची, पूर्णाङ्क ६०, पृ. ४३-४५।

82 विद्यालङ्कार (ख्रीष्टाब्दस्य २००१), पृ. १०९-११०।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri
खण्डहालजातके च दुराचारिणः शासकस्य प्रजाभिर्विनाशसन्दर्भो दृश्यते ।[83] शासकस्य गुण-कर्तव्यानां विषये वैदिके बौद्धे जैने च वाङ्मये समाना मान्यतास्तीति कथने नातिशयोक्तिः । वैदिकपरम्परायां प्रजावत्सलः कर्तव्यनिष्ठो धार्मिको विवेकी शासको राजर्षित्वेन आदर्शशासको मतोऽस्ति । शासकस्य राजर्षित्वावधारणा वैदिकवाङ्मये, रामायणे, महाभारते, मनुस्मृतौ, शुक्रनीतौ, अर्थशास्त्रे, तदनुवर्तिषु कामन्दकनीतिसारे, वीरमित्रोदयशिक्षायाम्, राजनीतिरत्नाकरे, नीतिवाक्यामृते, ग्रन्थान्तरेषु च प्रत्यक्षेण परोक्षण वानुमोदितानुभूयते ।[84] वस्तुतो राजतन्त्रात्मिकायां व्यवस्थायां राज्ञः चरित्रस्य राज्यचरित्रे निर्णायकप्रभावोत्पादकत्वेन तदानीं विषयोऽयं गम्भीर्येण गृह्यते स्म ।

बौद्धपरम्परायां चक्कवत्ती-सिंहनाद-सुत्तस्य विश्लेषणेन राज्ञाः चरित्रं राज्यचरित्रे निर्णायकं प्रभावं समुत्पादयतीति मान्यता दृश्यत एव परन्तु राज्यप्रणाल्याः राजनीतिकस्य पर्यावरणस्य वा, सामाजिकस्य पर्यावरणस्य च जनानां चारित्र्यविकासाय निर्णायकः प्रभावो न भवति । अतो राजनीतिकात् सामाजिकाद्वा पर्यावरणाद् निरपेक्षत्वेन स्थितिश्च सम्भवतीति बौद्धमान्यता वर्तते । अस्यां मान्यतायां वैचारिकी दृढता च दृश्यते ।[85] भगवता बुद्धेन नैकेषां राज्ञां मार्गनिर्देशनस्य सन्दर्भा बौद्धवाङ्मयेऽवाप्यन्ते । बौद्धमान्यतानुसारेण राज्ञः कर्तव्यो धर्म एव । 'राज्ञा धर्मः पालनीयः' मान्यतेयं बौद्धसिद्धान्तानुसारेण राजनीतिकचिन्तनस्य प्राथमिकी अवधारणेति कथने नातिशयोक्तिः स्यात् ।[86]

बौद्धपरम्परायां धर्मध्वजः, धर्मकेतुः, धर्माधिकारी चेति विशेषणानि आदर्शराज्ञः कृते प्रस्तुतानि सन्ति ।[87] बौद्धसम्राड्-रूपेण ख्यातिङ्गतस्य

83 विद्यालङ्कार (ख्रीष्टाब्दस्य २००१), पृ. ११० ।

84 द्रष्टव्यम्– अर्थशास्त्रस्य प्रथमेऽधिकरणे षष्ठोऽध्यायः (राजर्षिवृत्तम्), षष्ठेऽधिकरणे प्रथमोऽध्यायः ।
मनुस्मृतौ सप्तमोऽध्यायः । महर्षि–दयानन्द-सरस्वतीकृतस्य सत्यार्थप्रकाशस्य षष्ठः समुल्लासः । बनर्जी (वैक्रमाब्दस्य १९८०), शर्मा (वैक्रमाब्दस्य १९५०), सरकार (वैक्रमाब्दस्य १९९३) च ।

85 मुर (ख्रीष्टाब्दस्य २०१६), पृ. १३५ ।

86 जयसूर्या (ख्रीष्टाब्दस्य २००८), पृ. ५८ । मुर (ख्रीष्टाब्दस्य २०१५), पृ. ३९-४१ ।

87 शर्मा रामशरण (ख्रीष्टाब्दस्य १९९०), पृ. ७३ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0 In Public Domain. Digitization by eGangotri

राज्ञोऽशोकस्य शासनप्रणाल्यां सङ्घस्य (धार्मिकसंस्थायाः), राज-राजसंस्थयोः, प्रजानाञ्च मिथोऽन्तःसम्बन्धस्य आधारत्वेन धर्म एव स्वीकृतोऽवलोक्यते ।[88] वस्तुतो राजधर्मस्य प्रायो वैदिकपरम्परासमैव अवधारणा बौद्धपरम्परायाञ्च दृश्यते । किरातपरम्पराया 'मुहिगुम अङ्सीमाङ् येहाङ्' इत्यस्य "श्वासवद्भिः सकलैः जीवप्राणिभिः सह दयया व्यवहर, प्रेम्णा वस"[89] इत्युपदेश इह उल्लेख्योऽस्ति। भारते महात्मना गान्धिना राजनीतौ नैतिकतायाः पक्षपोषणस्य तस्य धार्मिकपृष्ठभूमेश्च महान् प्रभाव आसीत् ।[90]

पौराणिककाले राजतन्त्रमेव प्रायः सर्वस्वीकृतशासनप्रणालीत्वेन साफल्यमवाप । ततो भारतवर्षीयेषु राज्येषु राजानं परित एव राज्यसत्तायाः स्थितिः, राज्यस्य भाग्यं राज्ञः सौभाग्य-दुर्भाग्यानुरूपमेव च दृश्येते । तस्मिन् युगे च प्रायो राज्ञां स्वसर्वोच्चतायाः स्थितावपि प्रजानां जर्नादनत्वेन तेभ्यो महत्त्वप्रदानेऽवधानता दृश्यते परन्तु स्वात्मानं स्वेच्छाचारिणं निरङ्कुशञ्च परिभाव्य आचरितानां राज्ञां लोकनिन्दित्वेन वेनादिभिः कतिपयैर्नृपैः सह विहितस्य प्रजाविद्रोहस्य दृष्टान्ताश्च लभ्यन्ते ।

वेनाख्यस्य राज्ञो निरङ्कुशस्य स्वेच्छाचारिणः शासनस्य सन्दर्भे श्रीमद्भागवते पर्याप्तं समुल्लेखनमवाप्यते ।[91] यद्यपि कतिपयानां सन्दर्भानामतिरञ्जनया मिथकीकरणेन च यथार्थ्यं विच्छिद्यते तथापि श्रीमद्भभागवतस्याध्ययनेन सुस्पष्टं भवति यद् राजैव ईश्वरः, 'राजैव राष्ट्रम्, 'राज्ञः स्वेच्छिक आदेश एव दण्डो विधिर्वा' इति घोषणां कृत्वा वेनेन सभायाः समितेर्मन्त्रिपरिदश्च विघटनं विहितम् । स्वराज्यान्तर्गतानां सकलानां ग्रामसभानां जानपदसभानाञ्च विघटनं तेन विहितम् । राज्यं यस्मिन् कस्मिन्नपि काले व्यक्तेः

---

88 कमिस्की (दिनाङ्कोऽनुल्लिखितः) ।

89 द्रष्टव्यम्– शेर्मा लिम्बू (वैक्रमाब्दस्य २०७१ क), पृ. १६ ।

90 द्रष्टव्यम्– अइयर (ख्रीष्टाब्दस्य २०००) ।

91 वेनस्य सन्दर्भः श्रीमद्भागवतात् प्राचीनतरेषु ग्रन्थेषु च वर्तते परन्तु नेपालिसमाजेऽस्यैव ग्रन्थस्य सुप्रसिद्धिं विचिन्त्य सन्दर्भोऽयं प्रस्तुतोऽस्ति ।
द्रष्टव्यम्– अधिकारी (वैक्रमाब्दस्य २०६३ ग) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri
स्वतन्त्रतामार्थिकमधिकारञ्च आक्रमितुं शक्नोतीति प्रचलनं तेन प्रारब्धम् । प्रजानां स्वेच्छया धार्मिककृत्ये प्रवर्तनञ्च निषेधितम् । वैदिक्या राजनीत्या सञ्चालितायाः शासनपद्धतेर्वेनस्य सैन्यवादिन्या पद्धत्या विस्थापनेन लोकेऽतीव असन्तुष्टिः प्रासरत् ।

प्रजाभिर्वेनकृतस्य स्वपीडनस्य विषये ऋषयः सूचिताः । अहिंसाव्रता ऋषयः प्रथमन्तु वेनस्य समक्षं गत्वा राजधर्मोपदेशाय प्रायतन्त परन्तु वेनेन ऋषिभिः सह दुर्व्यवहारः विहितः । राजसत्ता-लोकसत्तयोः सुसंयोजनेन राष्ट्रं सञ्चालनीयमिति विचारवतां मध्ये केचन ऋषयस्तेन कारागारे निक्षिप्ताः । दुराचारेऽतिशयताङ्गते कैश्चिद् वनादेव सशस्त्रं विद्रोहः प्रारब्ध इति बुद्ध्यते, यः श्रीमद्भागवते निषादरूपेण परिचायितोऽस्ति । ऋषिभिस्तु युद्धहिंसात्मको विद्रोहो न स्वीकृतः । अतो हुङ्कारेणैव वेनस्य सैन्योन्मादस्योपरि विजयं प्रापुः । श्रीमद्भागवते हुङ्कारपदेन यत् सङ्केतितं वर्तते, तदिदानीन्तने सन्दर्भे विरोधवचःसभाकार्यत्यागादिकमेव ।

वेनविरुद्धो लोकविद्रोह एव मानवानां ज्ञातेतिहासे प्रथमो जनविद्रोहः । इतः पूर्वं पाश्चात्त्यसन्दर्भे स्पार्टाकस-नेतृत्वेन सञ्जातं दासविद्रोहं प्रथमजनविद्रोहत्वेन व्याख्याय स एव आदिविद्रोही मत आसीत् । इतरत्र चिनदेशस्य सन्दर्भे रञ्जिताक्षिभ्रूणां बद्धपीतोष्णीषाणाञ्च मध्ये सञ्जातो विद्रोहः (कृषकविद्रोहः) ततोऽपि प्राचीनतरो मन्यते परन्तु सर्वेषु विद्रोहेषु प्राचीनतमो विद्रोहः सिद्ध्यति वेनविरुद्धो विद्रोहः । पौराणिकस्यास्य विद्रोहस्य अपरा च विशेषता वर्तते यद् आधुनिकसन्दर्भे सत्याग्रहाख्यस्य अहिंसात्मकस्य विद्रोहस्य श्रेष्ठता तदानीमेव प्रमाणीकृतासीत् ।

वेनस्य पतनानन्तरं नवीनः शासकः कः करणीयः ?, प्रश्नोऽयं समुत्पन्नः । वेनविरुद्धं सशस्त्रं विद्रोहं कृतवतां निषादानां स्वामित्वप्रस्तावः प्रथममुपस्थापितः परन्तु ऋषिभिः तस्यास्वीकारेण निषादपक्षतः सत्तारद्रोहणमसम्भवं जातम् । ऋषिभिरेव राजसत्ता सञ्चालनीयेति एकस्य पक्षस्य प्रस्ताव ऋषिगणेन नहि स्वीकृतः । यतो हि, शासकत्वप्राप्तिर्विद्रोहकरणे ऋषीणामभीष्टं नासीत् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0 In Public Domain. Digitization by eGangotri
नवीनराज्यस्य स्वरूपं कीदृशं भवतु, कीदृश्यां शासनप्रणाल्यां कः शासकः चेतव्यः सन्दर्भेऽस्मिन् अनिर्णयावस्था चिरकालं यावदजायतेति सङ्केतोऽवाप्यते। ऋषिभिरन्याभिः प्रजाभिश्च सभा-समितियुक्तस्य राज्ञः प्राचीनपद्धतौ स्वीकृतायां निषादपक्षो निर्बलताङ्गतः । अन्ते वेनस्यैव वंशजस्य पृथो शासकसिंहासने स्थापनाय सहमतिर्जाता । पृथोर्नेतृत्वेन सञ्चालितायां राज्यप्रणाल्यां निषादपक्षस्य सहमतिः किञ्चित्कालानन्तरमेव भूत्वा राष्ट्रे सर्वसम्मतिर्जातेति बुद्ध्यते ।

राज्यस्य सञ्चालनाय लोकसम्मत्यधारेण राज्ञा, मन्त्रिपरिषदा, सभया, समित्या, स्थानीयपालिकया च नियन्त्रितं संयन्त्रमाविष्कृतमासीत् । वेनात् पूर्वं कुलसभाया वंशजसभाया वा शक्तिमत्त्वेऽपि पृथोः समये भौगोलिकमाधारं प्रधानं मत्वा ग्रामपालिका-नगरपालिकादिनिकायानां व्यवस्था विहितेति बुद्ध्यते । अद्यतनमापदण्डानुसारेण प्रोच्यमाने राष्ट्रराज्यम् (Nation State) मान्यतामिमां परिहाय राज्यराष्ट्रम् (State Nation) इति हितकर्याः पद्धत्या अङ्गीकरणं पृथोर्नेतृत्वेन विहितमासीत् ।

तदानीं सभायां समित्याञ्च राष्ट्रस्य सर्वेषां भूभागानां समुदायानाञ्च प्रतिनिधित्वं स्यादिति पक्षेऽधानमासीत् । अतः समावेशीकरणात्मिका आधुनिकी अवधारणा तदानीञ्च आत्मसात्कृतासीदिति वक्तव्यम् । तदानीं निर्मिता दण्डनीतिः (विधिः) लिखिता एव स्यात् । पूर्वं वेनात् समस्याद्भूतिहेतुना दण्डनीतेः पूर्णनियन्त्रणान्तर्गतत्वेन राज्ञः पृथोः प्रबन्ध ऋषिभिर्विस्मृतो न स्यादिति स्पष्टम् ।

तदानीन्तनेन प्रथमेन जनविद्रोहेण व्यक्तिविशेषस्य स्वेच्छाचारिशासनस्यावधारणा स्पष्टतः तिरस्कृता । एतेन राज्यशासनस्य कृते विधिर्दण्डनीतिर्वा अनिवार्येति वैदिकमान्यतायाः पुनःपुष्टिर्जाता । राजा राष्ट्रभृत्यः, लोकश्च राष्ट्रस्वामीति वैदिकमते (अथर्ववेदः १९। ३७/२, १५/९/१) पृथुना पूर्णास्था प्रकटीकृतासीत् । तस्य लोकप्रियतायामीर्ष्याभावेन राज्यान्तरस्य इत्याख्येन केनचित् समकालीनेन राज्ञा पृथुविरुद्धं प्रचारयुद्धं (आधुनिके सन्दर्भे

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri
Propaganda War) च कृतमासीत् परन्तु तदीया लोकप्रियता इयती विवृद्धा यद् राज्यारोहणात् केभ्यश्चिद्वर्षेभ्योऽनन्तरमेव लोकैर्विष्णोरवताररूपेण पृथोरर्चनं प्रारब्धम् । तस्यैव नामाधारेण धरित्र्या नवीना संज्ञा पृथिवीति जाता । एवं पारस्परिक्या सहृयतया राजप्रजानां सम्बन्धः सौहार्दमयः सम्पेदे । वैदिकस्य राजधर्मस्य मर्यादां पृथुः कदापि नोल्ललङ्घ इत्युच्यते, यद्यपि परवर्तिभिः कंस-शाल्व-रावण-शिशुपाल-जरासन्धादिभी राजानमेव सर्वश्रेष्ठं मत्वा वेनस्य विचारः पुरस्कृत आसीत् ।

नेपाले शताब्दीं यावच्चलितं राणाशासनं वेनवादिन्या शासनप्रणाल्या अपरं रूपमासीत् । 'मेकियाबेली' इत्यस्य सिद्धान्तेन युरोपमहादेशीयसन्दर्भे वेनवादिनी शासनप्रणाली अङ्गीकृतासीत् । सोवियतसङ्घस्य स्टालिन, चीनदेशस्य माओ, कम्बोडियादेशस्य पोलपोट, रोमानियादेशस्य चाउचेस्कु इत्यादयोऽपि प्रकारान्तरेण वेदवादस्यैवानुयायिनः संलक्ष्यन्ते । म्यान्मादेशस्य मिलिटरी जुन्ता, युगाण्डादेशस्य इदी अमिन, जर्मनीदेशस्य हिटलर, इटालीदेशस्य मुसोलिनी इत्यादयश्च वेनस्यैव नवीनानि संस्करणानीति वक्तुं शक्यते । सर्वसत्तावादिनौ विचारव्यवहारावेव वेनप्रवृत्तेर्द्योतकौ स्तः ।

वेनवादि शासनं राज्यस्थेभ्यो भाषिक-जातीय-भौगोलिकाधारान्तर्गतेभ्यो विविधेभ्यः समुदायेभ्यः स्थानीयासु केन्द्रीयासु च शासनसत्तासु यथोचितं सहभागितां न दापयति । अतः तत्प्रतिक्रियारूपेण देशे सङ्कीर्ण-विखण्डनस्य पक्षधराणां पक्षे जनसमर्थनं सम्भवति । वेनविरुद्धभ्य सङ्घर्षस्य, अग्रणिनो निषादपक्षस्य दृष्ट्या विचार्यते चेद् अधुना नेपालस्य द्वि-राष्ट्रियताया बहु-राष्ट्रियतायाश्च पक्षधराणां मानसिकता साहज्येन बोद्धुं शक्यते । वर्तमाने नेपालेऽनेके जातीय-क्षेत्रीय-भाषिकाः समुदायाः स्वात्मानं यत् तीरीकृतं वञ्चितं विभेदापन्नञ्चानुभवन्ति, तत्र राणाकालीनानां दुष्टनीतिनियम-व्यवहाराणां प्रतिक्रियापि एकं प्रमुखं कारकतत्त्वम् । यथा पृथोर्नेतृत्वकाले उदारवादिभ्यां विचार-व्यवहारभ्यां कालान्तरे सर्वेऽपि एकतासूत्रे ग्रथिताः, तथैव राज्यराष्ट्रसिद्धातानुसारेण नेपालीयाया राष्ट्रियतायाः पुनःसंरचना

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

भविष्यति । तत उदारसहिष्णुतावादिभ्यां विचारव्यवहाराभ्यां सर्वप्रकारकाणां नेपालिनामैक्यं भविष्यतीति विश्वसितुं शक्यते । नेपालस्तु एकं दृष्टान्तमात्रम्, राज्यराष्ट्र-सिद्धान्तः संसारस्य यस्य कस्यापि देशस्य सन्दर्भे परीक्षणीयो वर्तते ।

६.५. राज्यराष्ट्र-सिद्धान्तः

राज्यस्य जन्मना सहैव राष्ट्रियताया निर्धारणाय निर्णायकशक्ती राज्ये भवतीति तथ्यस्य सन्दर्भेऽस्यैव पुस्तकस्य द्वितीयेऽधिकरणे प्रकाशितं वर्तते ।[92] तस्मिन्नेवाधिकरणे राष्ट्रस्य परिभाषां प्रस्तूय अन्योन्याश्रिताऽन्तःसम्बन्धयोश्च मान्यताः समुल्लिखिताः सन्ति ।

राज्यराष्ट्रम् (State Nation) इत्याख्यस्य सिद्धान्तस्य सारोऽधः चतुर्भिः कथनबिन्दुभिः प्रस्तुतोऽस्ति-

राज्यमेव राष्ट्रम् । (State as Nation)

- कस्यचनापि देशस्य भू-राजनीतिक-वैधानिकतायाः सामाजिक-सांस्कृतिकैकतायाश्च समष्टिरेव राज्यराष्ट्रम् । (State Nation as the integration of both the Geo-political-legality and the Cultural-Social-unity.)
- राष्ट्रियतायाः परिभाषायै परिचयाय च राज्यमेव निर्णायकं तत्त्वम् । (State as the decisive factor for defining and identifying Nationality.)
- राज्यराष्ट्रस्य सुदृढीकरणाय नागरिक-राजनीतिकाधिकारयोः, सांस्कृतिकाधिकारस्य च प्रत्याभूत्या विशिष्टीकरणमावश्यकम् । (Ensuring the Civil and Political Rights and the Cultural Rights as mutually exclusive but not conflicting entities.)

एतेषु चतुर्षु कथनबिन्दुषु समाविष्टानामाधारभूतानां प्रस्थापनानां सन्दर्भेषु क्रमतो विमर्शः प्रस्तुतोऽस्ति–

92 नेपालस्य सन्दर्भे राज्यराष्ट्रस्य प्रारम्भिकं चिन्तनं कथं प्रस्तुतमासीदिति विषये ज्ञातुं द्रष्टव्यम्– अधिकारी निर्मलमणि (वैक्रमाब्दस्य २०६६), नेपाली राष्ट्रियता सुदृढीकरणको मार्गचित्र, स्टुडेन्ट्स कन्सेप्ट, वर्ष २, अङ्क ४, पृ. १८-२४ ।
एतदपि द्रष्टव्यम्– अधिकारी (वैक्रमाब्दस्य २०५७, २०६३ ग अपि) । अधिकारी (वैक्रमाब्दस्य २०६३ क, २०६३ ख, २०७२ अपि) च द्रष्टव्यम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

राष्ट्रस्य परिभाषा

भू-राजनीतिक-वैधानिकतापन्नं निश्चित-भौगोलिक-सीमबद्धं राज्य-मेव राष्ट्रं वर्तते, यत् स्वतन्त्रं स्वाधीनं सार्वभौमसत्तासम्पन्नञ्च भवति । एवञ्च यत्र विविधानां भाषा-जाति-प्रजाति-संस्कृति-समुदाय-सम्प्रदाय-भौगोलिकक्षेत्रादीनां समन्वयेन समष्टिगता राष्ट्रियता निर्धारिता भवति ।

६.५.१. राज्यमेव राष्ट्रम्

राज्योद्भवेन सहैव राज्याधृतस्य भूभागस्य तत्रत्यानां विशानां (जनानां प्रजानां लोकानां) च समष्टिरूपं राष्ट्रं प्रोक्तम् । संस्थानीकृतं राष्ट्रियस्वरूपधारं निर्माय राज्यमेव राष्ट्रस्यास्तित्वं भावयतीति तथ्यमात्मसात्कृत्य राज्यराष्ट्र-सिद्धान्ते राज्यं मानकं विशेषणं गुणं वा मत्वा राष्ट्रस्य राष्ट्रियतायाश्च परिभाषा विधीयते, तत्प्रचलनञ्च भवतीत्यर्थः । राज्यराष्ट्र-सिद्धान्तानुसारेण भू-राजनीतिक-वैधानिकतापन्नमेकं निश्चितभौगोलिकसीमबद्धं राज्यमेव राष्ट्रमस्ति, यत्र विविधानां भाषा-जाति-प्रजाति-संस्कृति-समुदाय-सम्प्रदाय-भौगोलिकक्षेत्रादीनां समन्वयेन समष्टीकृता राष्ट्रियता निर्धारिता भवति । इह विविधानां भाषा-जाति-प्रजाति-संस्कृति-समुदाय-सम्प्रदाय-भौगोलिकक्षेत्रादीनां समन्वयाग्रहो वर्तते । तस्माद् राज्यराष्ट्र-सिद्धान्ते राष्ट्रन्तु सदैव समष्टीकृतं संस्थानीकरणम् (Holistic institutionalization) अस्ति, यत्र वैविध्यं स्वाभाविको गुणः परन्तु पृथक्तायाः, वैभिन्न्यस्य, पार्थक्यस्य, विखण्डनस्य च कृते स्थानं नास्ति । तादृशाय प्रयोजनाय स्थानेन नहि भाव्यञ्च ।

सिद्धान्तेऽस्मिन् विविधानां भाषा-जाति-प्रजाति-संस्कृति-समुदाय-सम्प्रदाय-भौगोलिकक्षेत्रादीनां समन्वयेन संस्थानीकृतस्य स्वतन्त्रस्य स्वाधीनस्य सार्वभौमसत्तासम्पन्नस्य देशस्य/राज्यस्य भू-राजनीतिक-वैधानिकमस्तित्वं राष्ट्रस्य राष्ट्रियतायाश्च परिभाषायै प्राथमिकं तत्त्वं मतमस्ति । राज्यानां नामाधारेणैव

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

नागरिकाणां नामकरणरूपेण प्राचीनकालीनेन प्रमाणेन च सह मान्यतेयं तादात्म्यं भावयति । 'राष्ट्रस्य हृदयं राज्यं भवती'ति इतिहासशिरोमणेर्बाबुरामाचार्यस्य कथनञ्च सन्दर्भेऽस्मिन् सङ्गच्छन्ते ।

राज्यस्तरे संस्थानीकरणेन राष्ट्ररूपेण समन्वितपरिचयावाप्तेर्दशायां राजनीतिकं राष्ट्रमेव हिमवत्खण्डे भारतवर्षे च निर्मितमासीदिति तथ्यमस्यैव पुस्तकस्य द्वितीयेऽधिकरणे पूर्वमेव परिचर्चितमस्ति ।[93] अतो राज्यराष्ट्र-सिद्धान्ते परिचयायै विविधाङ्गोपाङ्गरूपेण समागतानि भाषा, जातिः, प्रजातिः, धार्मिकाः समुदाय-सम्प्रदायाः, सांस्कृतिकः परिचयः, क्षेत्रीयः परिचय इत्यादीनि तत्त्वानि राष्ट्रं न मन्यन्तेऽपि तु तेषु तत्त्वेषु विविधतायां सत्यामपि समानायां राष्ट्रियतायां तत्समन्वय एव राष्ट्रियता मन्यते । तस्मात् कस्यचिदपि नागरिकस्य जन्म-वर्ण-धर्म-रङ्गादिकारणैर्विभेदस्याऽभावनं राज्यराष्ट्रस्य मौलिकी विशेषता (Intrinsic Characteristics by Virtue of Origin) वर्तते । एवंरीत्या राज्यराष्ट्र-सिद्धान्तेनोदार-राष्ट्रियतावादी विचारोऽवलम्बितो वर्तते ।

इतरत्र राज्यराष्ट्र-सिद्धान्तविपरीतां मान्यतामाधृताभी राष्ट्रराज्यम्, द्विराष्ट्रियं राज्यम्, बहुराष्ट्रियं राज्यमित्येताभिरवधारणाभिः सङ्कीर्ण-राष्ट्रियतावादी दृष्टिराश्रिता वर्तते । यतो हि, तासु जातिः (Ethnicity, Tribe, Clan), प्रजातिः (Race), भाषा (Language), धार्मिकः सम्प्रदायः (Religion), सांस्कृतिकः परिचयः (Cultural Identity) इत्यादीनि तत्त्वानि राष्ट्रस्य राष्ट्रियतायाश्च परिभाषायै प्राथमिकतत्त्वरूपेण स्वीकृतानि वर्तन्ते । सङ्कीर्णया पार्थक्यवादिन्या वैभिन्न्यवादिन्या अहङ्कारवादिन्या घृणावादिन्या च दृष्ट्या राष्ट्रस्य राष्टियतायाश्च परिभाषानिर्माणेनैव राष्ट्रराज्यस्य द्विराष्ट्रियराज्यस्य बहुराष्ट्रियराज्यस्य च अवधारणानुरूपेषु देशेषु भाषा-जाति-प्रजाति-संस्कृति-समुदाय-सम्प्रदाय-भौगोलिकक्षेत्रविषयको विभेदो भवति । स च विभेदः तादृशस्य राष्ट्रस्य मौलिकी विशेषता (Intrinsic Characteristics by Virtue of Origin) भवति । साम्प्रतं

93 राज्यस्य व्यावहारिकस्य वास्तविकस्य च स्वरूपस्य यः प्रश्नोऽस्ति, तस्य प्राचीनभारतीयपरिभाषया सह एङ्गेल्समहोदयस्य परिभाषा नैकदृष्टिभिः समतामाप्नोतीति रामशरण-शर्मणा प्रोक्तमस्ति । (वैक्रमाब्दस्य १९९०), पृ. ५३ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri
मानवाधिकारस्य नैके प्रावधाना अन्तरराष्ट्रियविधिशास्त्रात् प्रत्याभूताः सन्ति । राष्ट्रियविधिनिर्माणे मौलिकानामधिकाराणां सुदृढाः प्रावधाना व्यवस्थापिताः सन्ति । इतोऽपि संसारे सङ्कीर्णस्य राष्ट्रियतावादस्य लेशावशेषकारणेन एतादृशेऽपि युगे प्रजाति-रङ्गगतस्यान्यविधस्य वा विभेदस्य हानं नास्ति । संयुक्तराज्येऽमेरिकादेशे विविधतायाः स्वागतपूर्वकं महन्महत्त्वख्यापनेन वर्णसङ्करश्च स्वीकृतोऽस्ति । एतादृशे देशेऽपि श्वेतपुरुषाहङ्कारवादिभी (White-male-supremacist) राष्ट्रपतिनिर्वाचनावासरे बाराक-ओबामामहोदयं हिलारी-क्लिण्टननमहोदयञ्च प्रति कथितानां घृणाजन्यवचसां मूले च सङ्कीर्णराष्ट्रियतावादि विचारोऽवर्तत ।

युरोपमहादेशीयस्य प्रतिमानानुरूपायां राष्ट्रराज्यावधारणायां राष्ट्रं राज्यञ्च पृथक् परिघटनारूपेण समीक्ष्य राष्ट्रवादं (Nationalism) देशभक्तिं (Patriotism) च पृथक्कृत्य परिभाषीकरणस्य दृष्टिर्विसङ्गता वर्तते परन्तु राज्यराष्ट्र-सिद्धान्ते राज्यं राष्ट्रञ्च पृथग् न मन्यते । एवञ्च सिद्धान्तेऽस्मिन् राजनीतिक-वैधानिकतापन्नं निश्चितभौगोलिकसीमबद्धं राज्यमेव राष्ट्रस्वरूपमवाप्नोति । विविधानां भाषा-जाति-प्रजाति-संस्कृति-समुदाय-सम्प्रदाय-भौगोलिकक्षेत्रादीनां समन्वयेन समष्टीकृता राष्ट्रियता निर्धायते । अतो राज्यराष्ट्रे राष्ट्रवादः (Nationalism), देशभक्तिः (Patriotism) च वस्तुत एकस्या एव मान्यतायाः संज्ञाद्वयमात्रं सिद्ध्यतः । कतिपयैः पाश्चात्त्यैरध्येतृभिस्तदनुयायिभिश्च राष्ट्रवादमनुचितं सङ्कीर्णं विभेदकरञ्च मत्वा आलोचनपूर्वकं तद्विकल्परूपेण देशभक्तिपदं पुरस्कृत्य पदस्यास्य राष्ट्रियचरित्रवाहकत्वेन विश्लेषणं यद्विधीयते, तत् प्रचलनं राज्यराष्ट्रस्य सन्दर्भे पूर्णतोऽसान्दर्भिकं दृश्यते । राज्यराष्ट्रस्य दृष्टिबिन्दुना निरीक्षणे राष्ट्रवादः (Nationalism), देशभक्तिः (Patriotism) च समानार्थके संज्ञे स्तः ।

राज्यराष्ट्र-सिद्धान्ते राज्यस्य जन्मनि समुन्नतौ च विविधाः पारिस्थिक्यः सम्भाव्यता (Situational Probability) भूमिकां निर्वहन्तीति पूर्वोक्तिरिह उल्लेख्या वर्तते । राज्यस्योद्भवः समुन्नतिश्च कथं बभूवतुरिति विषये विविधानां सिद्धान्तानां स्वीयप्रकारका मान्यता विलसन्ति । कैश्चिद्

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

ईश्वरेच्छा, कैश्चिद् जनानां मत्स्यन्यायात्त्राणापेक्षा, कैश्चित् सामाजिकसन्धिः, इतरैरन्यमेव कारणमिति राज्योद्भवकारकत्वेन स्वीकृतमस्ति। राज्यनिर्माणाय भौगोलिकपक्षस्य निर्णायकः प्रभावोऽवर्तत इति कतिपयानां विश्लेषणं विलोक्यते चेत् कतिपयैरन्यैर्भाषिक-धार्मिक-जातीय-प्रजातीयादितत्त्वानि प्रधानानि मत्वा विश्लेषणं विहितमस्ति। वस्तुतो राज्यस्य उद्भव-सीमाङ्कनोन्नयनादिषु किञ्चन निश्चितं गणितीयं सूत्रमिव सामान्यीकृतं सूत्रमस्तीति मन्तुं न शक्यतेऽपि तु विविधाः पारिस्थितिक्यः सम्भाव्यता (Situational Probability) भूमिकां निर्वहन्तीति मननं तर्कसङ्गतं भवति।

व्यावहारिकदृष्ट्या विचार्यते चेत् केनापि कारणेन समुद्भूतस्य येन केनापि भू-राजनीतिक-वैधानिकदेशेन स्वास्तित्वं साध्यते। स्वास्तित्वसाधनेन सहैव राज्यस्य, राष्ट्रस्य, राष्ट्रियतायाश्च विशेषाधिकारोऽपि तेनावाप्यते। यदा तु कश्चन देशो युगपद् राज्यस्य, राष्ट्रस्य, राष्ट्रियतायाश्च विशेषाधिकारमधिगन्तुं न शक्नोति, तदानीं तस्य स्वतन्त्रता, स्वाधीनता, सार्वभौमसत्ता च सुनिश्चिततां नाप्नोति। विश्वेऽद्यावधि व्यावहारिकं प्रचलनमेतदेव वर्तते। भविष्यति च परिस्थितिक्याः सम्भाव्यतायाः कारणेन यदि कश्चन नवीनो देशो जनिष्यते चेत्तस्यावस्था चेयमेव। इदं व्यावहारिकं याथार्थ्यं स्वीकृत्यैव राज्यराष्ट्र-सिद्धान्ते भू-राजनीतिक-वैधानिकतापन्नमेकं निश्चितभौगोलिकसीमबद्धं राज्यं राष्ट्रमित्यभिहितं वर्तते, यत् स्वतन्त्रं स्वाधीनं सार्वभौमसत्तासम्पन्नञ्च भवति, यत्र च भाषा-जाति-प्रजाति-संस्कृति-समुदाय-सम्प्रदाय-भौगोलिकक्षेत्रादीनां समन्वयेन समष्टीकृता राष्ट्रियता निर्धारिता भवति। समन्विता समष्टीकृता सम्पूर्णा च राष्ट्रियता!

कश्चन देशो (राज्यं राष्ट्रं) भू-राजनीकि-वैधानिकतां कथमवाप्य स्वकीयां स्वतन्त्रतां स्वाधीनतां सार्वभौमसत्ताञ्च निश्चयीकरोतीति विचारेण विभिन्नेषु युगेषु विभिन्नाः तत्पद्धतयः प्रादुर्भूता दृश्यन्ते। वर्तमानयुगे विविधानामन्तरराष्ट्रियाणां विधिसंयन्त्राणाम्, सन्धीनाम्, संयुक्तराष्ट्रसङ्घसहितानां संस्थानाञ्च विद्यमानतया भू-राजनीतिक-वैधानिकताया विशिष्टीकरणं जातम्,

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri
स्वतन्त्रता-स्वाधीनता-सार्वभौमसत्तानां सुनिश्चिततायाः पद्धतिरत्यन्तं व्यवस्थिता औपचारिकी समन्विता च सञ्जाता। काँश्चन अपवादान् विहाय अन्तरराष्ट्रियाः सीमा अपि यथाशक्ति नियमनशक्याः, मिथो मान्याः, अधिकाधिकाः स्थिराश्च सञ्जाताः । तथैव काँश्चिदपवादान् परिहाय प्रायो देशेषु राष्ट्रियतायाः परिचयं परिभाषां व्याख्याञ्च साहज्येन कर्तुं शक्यावस्था वर्तते । एवंरीत्या युगानुकूलपद्धत्या युक्तस्य देशस्य (राज्यस्य/राष्ट्रस्य) कृते विशेष्यस्थाने राष्ट्रशब्दम्, विशेषणस्थाने राज्यशब्दञ्च संस्थाप्य राष्ट्रस्य परिभाषाया निर्धारणं राज्यस्य दृष्टिबिन्दुतो कर्तुं शक्यावस्था वर्तते । राज्यराष्ट्र-सिद्धान्तस्यालोके सर्वविधानां राष्ट्रियतानां विज्ञानसम्मता व्याख्या साहज्येन कर्तुं शक्यते । नेपाल-भारत-संयुक्तराज्यामेरिकादीनां मौलिकरूपेणैव वैविध्यपूर्णानां देशानां सन्दर्भे हि न, अपि तु विगतकाले सङ्कीर्णराष्ट्रियतावादिकारणेन समुद्भूतत्वेऽपि वैश्विकीकरणस्य (Globalization) प्रक्रियायाः, आधिक्येन निवासान्तरणस्य, अन्यैश्च हेतुभिर्वैविध्यपूर्णतापन्नानां युरोपमहादेशीयानां तदतिरिक्तानाञ्च देशानां सन्दर्भेष्वपि राज्यमेव राष्ट्रमित्याख्याद् राज्यराष्ट्र-सिद्धान्तादेव राष्ट्रियतायाः साम्प्रतिकी परिभाषा व्याख्या च कर्तुं शक्येते ।

६.५.२. भू-राजनीतिकवैधानिकतायाः सांस्कृतिकसामाजिकैकतायाश्च समष्टिः

निश्चित भौगोलिकसीमाभ्यन्तरे निवसत्सु विविधेषु जाति-प्रजाति-समुदायेषु परस्परं राज्यस्य कारणेन सहास्तित्वस्य, समन्वयस्य, सहकार्यस्य, सहृदयतायाश्च भावोन्नयनेन देशे सामाजिक-सांस्कृतिकैतता संस्थापिता भवति। एतेन समष्टिभूतं राष्ट्रं समुन्नतं भवति। अतो राज्यराष्ट्र-सिद्धान्ते राज्यं राष्ट्रञ्च समानार्थके संज्ञे सिद्ध्यतः, यत्र राष्ट्रस्याधारशिला एकस्य स्वतन्त्रस्य स्वाधीनस्य सार्वभौमसत्तासम्पन्नस्य च राज्यस्य भू-राजनीतिक-वैधानिकतया स्थापिता भवति ।

प्रचलनेऽवलोक्यते यद् राज्यमिति संज्ञायां भू-राजनीतिक-वैधानिकतायाः, राष्ट्रमिति संज्ञायां राज्यान्निःसृतस्य राष्ट्रियस्वरूपस्य

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

सामाजिकसांस्कृतिकैकतायाश्च आग्रहोऽस्ति । उचितं सन्दर्भे प्रयुज्यते चेत् प्रचलनमिदं स्वीकर्तुं शक्यते। राज्यमिति संज्ञायां भू-राजनीतिक-वैधानिकतायाः, राष्ट्रमिति संज्ञायां सामाजिक-सांस्कृतिकैकतायाश्च आग्रहहेतुना तयोः संज्ञयोः पार्थक्यं नहि मन्तव्यम् । वस्तुतो राज्यराष्ट्रे राष्ट्रस्य प्रमेयत्वेन आदर्शदृष्ट्या राष्ट्रस्य बृहदवधारणान्तवर्तिनी आधारशिला मूलं वा राज्यं भवतीति प्रोक्तम्। अतो राज्यराष्ट्रे नहि पृथक्तत्त्वे । कस्यापि राज्यान्तर्गतस्य ग्रामस्य नगरस्य जनपदस्य प्रान्तस्य वा निवासिनो नागरिकाः (विशाः, जनाः, प्रजाः, लोकाः) राष्ट्रिया भवन्ति । भाषा-जाति-वर्ण-रङ्ग-प्रजाति-नासाकार-नेत्रप्रकार-भूसांस्कृतिकस्थानीयपरिचयाद्याधारेण तेऽराष्ट्रिया न भवन्ति। यतो हि, राज्येन सदैव समष्टीकृता समन्विता ऐक्यबद्धा राष्ट्रियता स्थाप्यते।

प्रसङ्गेन समुल्लिखितं यद् राष्ट्रराज्यम्, द्वि-राष्ट्रियं राज्यम्, बहु-राष्ट्रियं राज्यञ्चेत्येतासु अवधारणासु पुरातनी युरोपमहादेशीया मान्यता राष्ट्रं (Nation) राज्यं (State) च पृथक्तत्त्वत्वेन स्वीकरोति, यत्र राष्ट्रं पूर्ववर्ति, राज्यञ्च परवर्ति मन्येते। युरोपमहादेशीयावधारणानुसारेण कतिपयासु अवस्थासु पृथक्तत्त्वबोधकत्वेन ते संज्ञे प्रयुक्ते स्तः। एतत्पार्थक्यहेतुनैव देशे प्रजातीयं जातीयं सङ्कीर्णमन्यं वा परिचयं पुरस्कृत्य प्रतिस्पर्धिराष्ट्रियतानां सङ्घर्षस्य भयं सदैवावतिष्ठते। देशे सामाजिक-सांस्कृतिकैक्यस्य सुनिश्चिततां विना कोऽपि देशो राज्यराष्ट्ररूपेण साफल्यमधिगन्तुं न पारयति। नेपाले भारतेऽन्येषु वा येषु केष्वपि प्रजातिबहुलेषु जातिबहुलेषु भाषाबहुलेषु संस्कृतिबहुलेषु सम्प्रदायबहुलेषु च देशेषु बहुलतां विविधताञ्च समन्वीय समष्टीकृत्य संश्लेष्य च राज्याद् राष्ट्रस्य स्तरं यावत् समुन्नतिः सम्भवति। अतिप्राचीनकालाद् हिमवत्खण्डे भारतवर्षे च कुलं (वंशजः पक्षः, सांस्कृतिकाधिकारस्याऽऽयामः), ग्रामः (राजनीतिकः पक्षः, नागरिक-राजनीतिकाधिकारयोरायामः) सहास्तित्वेऽवलोक्यते । ग्रामपञ्चायतसंस्थाया अस्तित्वं वैदिककालेऽपि आसीत् । बौद्धसाहित्ये च अस्योल्लेखः प्राप्यत इत्यभिहितमस्ति ।[94] लघुतमेऽवयवेऽपि वैविध्यस्य समन्वयोऽपेक्षितो भवति चेत् सकले देशे तु समन्वयादृते

94 ज्ञानी (ख्रीष्टाब्दस्य १९९४), पृ. १९५।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

नान्य उपायः ।

देशाभ्यन्तरे विद्यमानैर्विविधैर्भाषा-जाति-प्रजाति-समुदाय-सम्प्रदाय-भौगोलिकक्षेत्रादिभिः सह राज्यसत्तासीनैः समानः समन्यायी सहृदयतापूर्णश्च व्यवहारोऽनिवार्योऽस्ति । शासनस्य दर्वि-समदर्वी यद्धस्तगतौ स्तः, समुचितस्य प्रशासनस्य प्रत्याभूतिश्च तस्यैवोत्तरदायित्वं भवति । यदि कश्चन तच्छाशनादन्यायमनुभवति चेत् स्वभावतः तत्प्रवृत्तिर्नूनं तच्छाशनविरुद्धा भविष्यति । अतो देशस्य विविधानां जाति-प्रजाति-भाषाभाषि-समुदाय-सम्प्रदायानां विशेषभौगोलिकक्षेत्रनिवासिनाञ्च एकस्मिन्नेव सामाजिक-सांस्कृतिकैक्यसूत्रे ग्रथनस्य प्राथमिकमुत्तरदयित्वं राज्यसत्तायाः प्रमुखेषु संसद्-सर्वकार-न्यायपालिकाद्यवयवेषु आसीनानां खलु । एवञ्च सामान्यनागरिकेण च राज्यं स्वस्यैवेति विज्ञाय राज्यस्य सुदृढीकरणस्य स्वकर्तव्यत्वेन मननमनिर्वायम् ।

देशे विद्यमानाया विविधतायाः समन्वयेन समराष्ट्रिय-सामाजिक-सांस्कृतिक-चेतनाया विकासप्रक्रिया सद्दृष्ट्या न विचार्यते चेद् राज्यराष्ट्रस्य तात्पर्यं बोद्धुं न शक्यते । **"सङ्गच्छध्वं संवदध्वं सं वो मनांसि जानतम्"** इति वैदिक आदर्श इह सान्दर्भिकोऽस्ति । देशे विद्यमानानां जाति-प्रजाति-समुदायादीनां स्वकीया विशेषता भवन्ति, तेषां सर्वविधानामैक्येन समुन्नतस्य समग्रस्य राष्ट्रस्य, राष्ट्रियचरित्रस्य संस्कृतेश्चापि एकं विशिष्टं स्वरूपं भवति । यथा रसायनशास्त्रानुसारेण अम्लक्षारयोः सम्मिश्रणेन निर्मितस्य पृथक्प्रकारकस्य लवणवस्तुनो गुणोऽम्लक्षाराभ्यां पृथगेव भवति परन्तु तस्मिन् लवणेऽम्लक्षारयोः समानमवदानमस्तीति वैज्ञानिकं सत्यमस्ति, तथैव राष्ट्रियचरित्रेण संस्कृत्या च सह भाषिक-जातीयसमुदाययोर्भौगोलिकक्षेत्रगतस्य चरित्रस्य, संस्कृतेश्च तादात्म्येऽदृष्टेऽपि तद्राष्ट्रस्य राष्ट्रियचरित्रे संस्कृतौ च तज्जातेश्चरित्रं संस्कृतिश्च सन्निहिते भवतः । यथोपरि प्रदत्तैरुदाहरणैऽम्ल-क्षारयोर्गुणस्य लवणगुणेन सह तादात्म्येऽदृष्टेऽपि लवणेऽम्लक्षारयोरुभयोर्योगदानं महत्त्वञ्च वर्तेते, तथैव राज्यराष्ट्रे देशस्य विविधताः समन्विताः संश्लेषिता ऐक्यापन्नाश्च भवन्ति ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

एवञ्च तत्र सहृत[illegible]योऽपि व्यवहृती भवति ।

CC-0.In Public Domain. Digitization by eGangotri

अत्रावधेयं तथ्यमेतच्च वर्तते यद् देशस्य समानायां राष्ट्रिय-सामाजिक-सांस्कृतिक-चेतनायां तस्मिन् देशे विद्यमानानां विविधानां जाति-प्रजाति-समुदायादीनां महत्त्वाऽवदानयोः समत्वेऽपि राष्ट्रियपरिचयरूपेण औपचारिकानौपचारिकमान्यतापन्नेषु पर्वसु, सांस्कृतिकेषु अभ्यासेषु, प्रतिकादिषु च कस्यचनैकस्य, केषाञ्चन समुदायानां वा केन्द्रीया भूमिका भवितुं शक्नोति । एतादृश्या केन्द्रीयभूमिकाया ऐतिहासिककालादेव स्वतःस्थापितत्वे तदनुरूपमेव आचरणीयं भवति । एवञ्च नवीननिर्णयावसरेषु तत्तत्क्षेत्राणामादिवासिसमुदायाय प्राथमिताप्रदानं राज्यस्य कर्तव्यमस्ति । उदाहरणार्थं सांस्कृतिकायोजनेषु नेपालमण्डले नेवारसमुदायस्य, जनकपुरे मैथिलसमुदायस्य, डडेल्धुराजनपदे डोडेलीसमुदायस्य च केन्द्रीयभूमिका स्वाभाविकी वर्तते । एवमेव भारतस्य सन्दर्भे आसामक्षेत्रे आसामसंस्कृत्या, तामिलनाडुक्षेत्रे च तमिलसंस्कृत्या प्राथमिकतावाप्तिः स्वाभाविकी । सांस्कृतिकाधिकारसन्दर्भे आदिवासिनः समुदायस्य अग्राधिकारत्वेऽपि नागरिक-राजनीतिकाधिकारसन्दर्भे केनचिज्-जातीयेन अन्येन वा सङ्कीर्णेन पूर्वाग्रहेण न भाव्यमिति राज्यराष्ट्रस्य मान्यता च इह स्मरणीया वर्तते ।

किञ्चित्कालात् पूर्वं यावञ्च नेपालमण्डले स्थितयोरभ्यास-पद्धत्योरन्वेषणेन ज्ञायते यद् राज्यराष्ट्रे राज्यस्य तद्राज्यसीमरेखान्तर्गतानां विविधानां जनसमुदायानां सांस्कृतिकी चेतना निरन्तरं समुन्नयनशीला भवति । समानायाः सामाजिक्याः सांस्कृतिक्याश्च चेतनाया समुन्नयनाभावे नेपालमण्डले नैकस्थानेभ्यः स्थानान्तरेण समागतानां विविधानां जाति-प्रजाति-समुदायादीनां समन्वितं स्वरूपं भूत्वा अद्यतनो नेवारसमुदायो न विकसेत् । ब्राह्मणादयः चत्वारो वर्णाः, शिल्पि-(दलित)-समुदायः, वर्णव्यवस्थाया अनन्तर्गताः समुदायाश्च मिलित्वा आधुनिको नेवारसमुदायो निर्मितोऽस्ति । शाहठकुरीवंशैः सह इह सम्प्राप्ताः शतशः समुदाया मिलित्वा आधुनिकस्य नेवारसमुदायस्य समन्वयीकरणमेव प्रत्यक्षं प्रमाणं वर्तते यद् राज्यराष्ट्र-सिद्धान्ते स्वीकृतमिव

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

निश्चिते भौगोलिकसीमाभ्यन्तरे निवसत्सु विविधेषु जाति-प्रजाति-समुदायेषु राज्यस्य कारणेन सहास्तित्वं समन्वयः सहकार्यं सहृदयता च आविर्भूय देशे समाजिक-सांस्कृतिकैकतायाः स्थापनं सम्भवति ।

समानायाः सामाजिक-सांस्कृतिक-चेतनाया अविच्छिन्नोन्नतेः सफलोऽभ्यासो नेपालमण्डलस्यैव परिघटना नास्ति । प्राचीनस्य हिमवत्खण्डस्य भारतवर्षस्य च राज्येषु यत्र तत्र एवंविधः सफलोऽभ्यास आसीत् ।[95] राज्यमेव राष्ट्रमूलं मत्वा भू-राजनीतिक-वैधानिकस्य सीमाङ्कनस्य, स्वसीमरेखान्तर्गतानां सर्वविधानां जाति-प्रजाति-समुदायादीनां निजविशेषतानां सम्मानपूर्वकं समानायां सामाजिक-सांस्कृतिक-चेतनायामाबद्धतायै प्रेरिकाया वैदिक्याः पद्धत्याः कारणेनैव तादृशोऽभ्यासः सम्भवोऽभवत् । एवंरीत्या विचारणे वैविध्यापन्नस्य नेपालदेशस्य विविधानां जाति-प्रजाति-समुदायादीनां समन्वयेन राष्ट्रस्यैकस्य निर्मितिः सहजा स्वाभाविकी च । अतः सकलायां नेपालिराष्ट्रियसंस्कृतौ ब्राह्मणादीनां चतुर्णां वर्णानां शिल्पि-(दलित)-समुदायस्य वर्णव्यवस्थातिरिक्तानां समुदायानाञ्च समानं मवदानं महत्त्वञ्च वर्तेत इति मननमेव समीचीनम् ।

राज्यराष्ट्र-सिद्धान्तः स्वतन्त्रस्य स्वाधीनस्य सार्वभौमसत्तासम्पन्नस्य देशस्य (राज्यस्य) भू-राजनीतिक-वैधानिकमस्तित्वं राष्ट्र-राष्ट्रियतयोः परिभाषायै प्राथमिकं तत्त्वं मन्यते । ततो यान् कानपि भाषा-वर्ण-जाति-प्रजाति-धर्मसम्प्रदाय-क्षेत्रीयपरिचय-सांस्कृतिकपरिचयादीन् समष्टीकृतदृष्ट्या स्वाभ्यन्तरे समाहितान् समन्वितान् ससंयोजितान् च करोति । अतो राज्यराष्ट्रे ते पृथक् पृथग् अवयवाः परस्परं विरुद्धाः प्रतिस्पर्धिनश्च न भवन्ति । इह राष्ट्रियतानां सङ्घर्षाणां कृते स्थानं न भवति । नेपालस्य,

---

95 यथा– नेपालस्य साम्प्रतिके संविधाने 'खस आर्य' इति समुल्लिखिते समुदायेऽपि बहूनां समुदायानां सम्मिश्रणं वर्तते । खस-नाग-किरातादिजातीनां सम्मिश्रणेन इदानीन्तनस्य मगरसमुदायस्याद्यतनं स्वरूपं निर्मितमस्तीति नेपालस्य मगर-समुदायविषयेऽस्मदीयमन्वेषणमिङ्गितीकरोति । गुरुङ(तामु)-समुदाये च न्यूनतयापि द्वित्राणां जातीनां सम्मिश्रणं स्यादिति वयं स्वकीयेऽन्वेषणेऽवापाम ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

एतद्देशस्येव भाषिक-जातीय-साम्प्रदायिकादिवैविध्ययुक्तानां देशानाञ्च कृते स्वकीयस्य स्वतन्त्रस्य स्वाधीनस्य सार्वभौमसत्तासम्पन्नस्य राज्यस्य परिचयस्य सुदृढीकरणस्य सिद्धान्तो राज्यराष्ट्रं (State Nation) खलु। राष्ट्रियताया विज्ञानसम्मताय व्याख्यानाय समर्थे राज्यराष्ट्र-सिद्धान्ते समाविष्कृते सति सम्प्रति सङ्कीर्णराष्ट्रियतावादि-सिद्धान्तार्गतस्य अवधारणात्रयस्य (राष्ट्रराज्यस्य, द्वि-राष्ट्रियतायाः, बहु-राष्ट्रियतायाश्च) परित्याग आवश्यकोऽनुभूयते।

६.५.३. राष्ट्रियतायाः परिचयाय परिभाषायै च राज्यमेव निर्णायकं तत्त्वम्

राज्यराष्ट्र-सिद्धान्ते राष्ट्रियतायाः परिभाषायै परिचयाय च राज्यमेव निर्णायकं तत्त्वमस्ति। राष्ट्रियतायाः परिभाषायै परिचयाय च राज्यस्य निर्णायकतत्त्वत्वेन मान्यतायाः तात्पर्यमस्ति यद् भाषा-जाति-प्रजाति-धार्मिकसम्प्रदाय-क्षेत्रीयपरिचय-सांस्कृतिकपरिचयादीनां बहिष्कारवादिनिना सङ्कीर्णेनासमावेशिनाऽऽधारेण राष्ट्रस्य परिभाषा न विधेया। यस्य राज्यस्य नागरिकोऽस्ति, तस्यैव राज्यस्य नागरिकतया सहैव राष्ट्रियता निर्धार्यते। राष्ट्रियताया निर्णयाय पद्धतिरियं नेपालस्य मौलिकानामादिवासिनां बौद्ध-जैन-बोन-वैदिक-किरातानां परम्परासु प्राचीनकालत एव प्रचलनेऽवर्तत। संसारस्य आधुनिकराज्यैश्च पद्धतिरियं व्यवहारतोऽङ्गीकृता वर्तते, यस्य प्रत्यक्षं प्रमाणं नागरिकतायाः (Citizenship) माध्यमेन राष्ट्रियतायाः परिचयनमस्ति।

उपरि विविधेषूपशीर्षकेषु विहितया परिचर्चया स्पष्टीकृतमेव यद् यस्मिन् काले युरोपमहादेशे राष्ट्रियतायाः परिभाषा विधीयमानासीत्, राष्ट्राणां पश्चियो जायमान आसीत्, राज्यस्य वैधानिकता संस्थाप्यमानासीत्, तत्र तदानीं नेपाल-भारतादिषु इव वैविध्यपूर्णा परिस्थितिर्नासीत्। युरोपमहादेशीयैः स्वविशेषपरिस्थित्यनुकूला राष्ट्रराज्यम् (Nation State) इत्यवधारणा स्वीकृता, यत्र भाषा-जाति-प्रजाति-धार्मिकसम्प्रदाय-क्षेत्रीयपरिचय-सांस्कृतिकपरिचयादीन् राष्ट्रनिर्माणाय आधारत्वेन मतः। यथाशक्यं तयैव मान्यतया निर्मितस्य राष्ट्रस्य स्वतन्त्रस्य स्वाधीनस्य सार्वभौमसत्तासम्पन्नस्य राज्यस्य रूपेण

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

भू-राजनीतिक-वैधानिकः परिचयो वाञ्छनीयो बभूव । अतो युरोपमहादेशीयानां वैधानिकता तदनुरूपैव बभूव परन्तु एवंरीत्या निर्मितेषु युरोपमहादेशीयेषु देशेषु इतरदेशेभ्यः स्थानान्तरणं विधाय समागतानां जनानां नागरिकरूपेण समावेशक्रमे राष्ट्रियतायाः प्रमाणपत्रञ्च सम्पन्नं वर्तते ।

सम्प्रति व्यक्ति-राष्ट्रियतयोरन्तःसम्बधस्य सन्दर्भे कालचक्रं परिभ्रम्य प्राचीनेन युगेन सह तुलनावस्था प्राप्ता प्राप्यमाणा वास्तीति कथनेऽत्युक्तिर्न स्यात् । प्राचीने युगे यः कोऽपि जनो यदा कदापि स्वसौविध्यानुसारेण निवासान्तरणं करोति स्म । तस्य स्थायी निवासो यस्य राज्यस्य सीमरेखाभ्यन्तरे भवति स्म, तस्यैव राज्यस्य राष्ट्रियतायां स समाहितो भवति स्म । पुरातन्यां भारतवर्षीयपरम्परायां विशेषां परिस्थितिं विहाय जनस्य वर्ण-गोत्र-प्रवरादीनामपरिवर्तनीयत्वेऽपि राष्ट्रियता तथाविधोऽपरिवर्तनीयः परिचयो नासीत् । अद्यत्वेऽपि व्यक्तेर्नागरिकता राष्ट्रियता च परिवर्तनीये स्तः तथापि व्यक्तेर्मूलं किमस्तीति परिचयो न विस्मरणीय इति प्रचलनं प्रबृद्धमस्ति । अमेरिकादेशस्य नागरिका भूत्वा तदीयां राष्ट्रियतां स्वीकृतवताञ्च अफ्रिकादेशस्य अमेरिकीयः, चीनदेशस्य अमेरिकीयः, भारतदेशस्य अमेरिकीयः, नेपालदेशस्य अमेरीकीय इत्यादिरित्या परिचयः पुरातने युगे व्यक्तेर्वर्ण-गोत्र-प्रवराणामपरिवर्तनीयताया मान्यतेव वर्तते । पुरातनेन युगेन सह तुलनायां पृथक्ता एवमस्ति यद् अधुना नागरिकतायाः प्रमाणपत्रम्, पारपत्रम्, प्रवेशाज्ञा इत्याद्या औपचारिक्यो वैधानिक्यो व्यावहारिश्यश्च संरचनाः सन्ति । विधेः प्रक्रियां प्रपूर्यैव नागरिकतासम्बद्धा वैधानिकता प्राप्यते ।

राष्ट्रियताया अद्यावधिक्या व्याख्याया अवसरे एतञ्च नहि विस्मरणीयं यत् प्राचीनाद् आधुनिकाच्च युगाद्भिन्नव्यवहारवतो युगस्य समयावधिश्च शताब्दीशो दीर्घासीत्, यत्र जाति-प्रजाति-कबिल-समुदायादीनामाधारेण विखण्डनं विधाय रष्ट्रियतायाः सङ्कुचिता परिभाषा कृतासीत् । राष्ट्रस्य राष्ट्रियताया राष्ट्रराज्यस्य च युरोपमहादेशीयं प्रतिमानमपि तदनुरूपमेव सङ्कुचितपृष्ठभूमौ निर्मितमासीत् । कौटिल्यचाणक्यस्य "वसुधैव कुटुम्बकम्"

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0 In Public Domain. Digitization by eGangotri

इति समग्रायाः पृथिव्या निवासिनां कुटुम्बत्वमान्यताया उत्तराधिकारित्वेऽपि तदानीन्तन्या विशेषायाः परिस्थितेः कारणेन नागरिकेभ्य एव न, अपि तु वैदेशिकैः सह कृतोद्वाहेभ्यो स्वदेशीयेभ्यो नागरिकेभ्यश्च राज्यस्य मुख्यं दायित्वं न प्रदेयमिति तस्य व्यावहारिकं निर्देशनमासीदिति तथ्यञ्चात्र समुल्लेख्यमस्ति परन्तु साम्प्रतिक्या वैश्विक्या आबद्धतायाः कारणेन परिस्थितिः परिवर्तितास्ति । अतः सम्प्रति प्राचीनयुगवद् उदारव्यवहारस्य सम्भावनाया द्वारं समुद्घाटितमिवाऽनुभूयते । सन्दर्भेऽस्मिन् जाति-प्रजाति-कबिलसमुदायादिनामाधारेण राष्ट्र-राष्ट्रियतयोः परिचयं परिभाषाञ्च कर्तुमशक्यतया एकस्य व्यावहारिकस्य परिनिश्चितस्य च मानदण्डस्य रूपेण नागरिकतायाः (Citizenship) भूमिका कस्यापि देशस्य राष्ट्रियतायाः पृच्छायां प्रमुखायमाणास्ति ।

आप्रवासनं मानवसभ्यताया स्वाभाविकी अन्यतमा परिघटना वर्तते । राज्यैराप्रवासनस्य नियन्त्रकेषु प्रावधानेषु (सीमा, नागरिकता, पारपत्रम्, प्रवेशाज्ञा इत्येतेषु) अवलम्बितेष्वपि युगेऽस्मिन् आप्रवासनं जायमानमेव वर्तते चेद् यदा तु विश्वमिदं समानं सदनमिति मान्यतासीत्, तदवस्थायां कियन्मात्रयाऽऽप्रवासनं भवेत् ! स्वत आकलयितुं शक्यते । मानवसमुदायस्य लघीयांशः चिरकालं यावत् कस्यापि स्थानविशेषस्य मूलनिवासी भवति चेदपि बृहदंशस्तु सञ्चलन्नेव दृश्यते, भविष्यति च आप्रवासनं चलन्नेव भविष्यति । आप्रवासनहेतुना देशे जनसमुदायसंरचनायां समागम्यमानस्य परिवर्तनस्य याथार्थ्यं सम्बोधयितुं राष्ट्रियताया अद्यावधिकीं व्याख्यां कृत्वा मौलिकीं मूलसंस्कृतिं केन्द्रीकृत्य नवागन्तुकानां नागरिकाणां संस्कृतीश्च राष्ट्रियसंस्कृतौ समावेशितुं राज्येन सदैव तत्परेण भाव्यम् ।

राष्ट्रियतायाः परिभाषायै परिचयार्थञ्च राज्यमेव निर्णायकतत्त्वमिति सैद्धान्तिकी मान्यता यथा सहजा वर्तते, नागरिकतायाः प्रमाणपत्रस्यैव राष्ट्रियतायाः प्रमाणपत्ररूपेण ग्रहणात्मकं व्यावहारिकं प्रचलनं तावत्सहजं न दृश्यते । बौद्ध-जैन-वैदिकादिदृष्ट्या नागरिकताया विमर्शं विधाय प्राचीनस्य

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0 In Public Domain. Digitization by eGangotri
भारतवर्षस्य प्रचलनस्यानुकूलनपुरःसर व्यवह्रियते चेत् सम्प्रति नागरिकतायाः प्रावधानस्य कारणेन आसंसारमापतितताया जटिलतायाः समुचितं समाधानं भवति । नोचेद् युरोपमहादेशीयमानदण्डानुसारेण नागरिकताया बोधो व्यवहारश्च विधीयेते चेद् आसंसारं नवानामङ्गीकृतानाञ्च नागरिकाणां विषये समुत्थितः प्रश्न इतोऽपि अनुत्तरणङ्गमिष्यतीति स्पष्टम् । नागरिकतासम्बन्धस्य संविधानगतस्य विधिगतस्य च प्रावधानस्य सन्दर्भे नेपाले दशाब्दीशः सञ्जायमानानि विवादकोलाहलान्दोलनानि प्रत्यक्षोदाहरणानि खलु । फ्रान्स-संयुक्तराज्यामेरिकादिदेशेषु आप्रवासिनां नवनागरिकाञ्च अनात्मीयीकरणं राक्षसीकरणं वापि अत्र सान्दर्भिको दृष्टान्तः ।

निवासान्तरणस्य कथमपि रोद्धुमशक्यत्वात्तद्व्यवस्थापनार्थं पूर्वसक्रियतैव बुद्धिमत्ता सिद्ध्यति । अतो निवासान्तरणस्य तत्सबद्धपरिघटनानाञ्च कथं नेपालस्य राष्ट्रियहिताय आधिकाधिकतया अनुकूलीकरणं व्यवस्थापनं सम्भवतीत्यत्र प्रयत्नोऽवश्यं विधेयः । संसारस्य विभिन्नेषु देशेषु नेपालिनां गमनम्, यथासम्भवं सौविध्यसम्पन्ने देशे स्थायिनिवासानुमतेर्नागरिकतायाश्चादानम्, इतरतः समागत्य नेपाले स्थायिरूपेण निवसनपूर्वकं वैदेशिकैर्नेपालस्यैव नागरिकताया आदानायासश्चेति स्वाभाविकं मन्तव्यम् । अन्यदेशानां सन्दर्भे च एतदेव सङ्गच्छते ।

विश्वस्य काँश्चन देशान् विहाय प्रायः सर्वेषु देशेषु विविधता वर्धमाना वर्तते । वंशजां जन्मसिद्धाञ्च नागरिकतां परित्यज्य अङ्गीकृताया अन्यप्रकारिकाया वा नागरिकताया ग्रहणप्रवृत्तेः प्रवर्धनेन क्रमतो विविधतायाश्च वर्धमानतानुमीयते । राष्ट्रियतायाः परिभाषायै परिचयाय च राज्यमेव निर्णायकं तत्त्वञ्चेद्वैधानिकरूपेण नागरिकतायाः प्रमाणपत्रमेव राष्ट्रियतायाः प्रमाणपत्रं वर्तते । अतो नागरिकतायाः प्रावधानं कीदृशं भवत्विति जिज्ञासातीव महत्त्वयुक्ता संवेदनशीला क्वचिज्जटिला च सञ्जायते । नेपालस्य सन्दर्भे निवासान्तरणस्य नागरिकतायाश्च प्रश्न इतोऽपि संवेदनशीलो जटिलतरश्च वर्तते । यतो हि, संसारस्य सर्वाधिकजनसङ्ख्यावतोर्देशयोर्मध्ये स्थिता भौगोलिक-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri
सीमरेखैव नेपालस्थीना वर्तते, यत्र प्रतिवेशिराष्ट्रयोः प्रतिशतैकमात्राणां नागरिकाणामिह निवासान्तरणं भवति चेदपि अत्रत्या आदिवासिनो नेपालिनोऽल्पमतेऽन्तर्भवन्ति । अन्यत्र च विविधतया सहैव जनेषु मिथो विखण्डनस्य अविश्वासस्य, घृणायाश्च प्रवर्धनं तत्सम्भावना वा दृश्यते । युरोपमहादेशीयस्य प्रतिमानस्य राष्ट्रराज्यावधारणागतायाः स्पष्टतायाः कारणेन सङ्कीर्णराष्ट्रियतावादिनो विचारस्य भूमिका घृणा-विखण्डनाविश्वासवृद्धौ वर्तत एव परन्तु वन-जल-भूभागादीनां प्राकृतिकानां संसाधनानां न्यूनताकारणेन च स्थानान्तरणमाप्रवासनञ्च सीमानमतिक्रम्य भवितुं न शक्नुतः, ताभ्यां न भाव्यमिति व्यावहारिकं पक्षञ्च विस्मर्तुं नार्हामः ।

समाधानं कथं तावत् ?

उपर्युक्तानां समस्यानां समाधानाय राज्यराष्ट्र-सिद्धान्तान्तर्गता मान्यता एवं प्रस्तूयन्ते–

६.५.३.१. नागरिकतानीतिर्व्यवहारविधिश्च

१) नागरिकताया वर्गीकरणे वंशजा, जन्मसिद्धा, अङ्गीकृता, अन्यैव काचन वा संज्ञा प्रयुज्येत परन्तु कस्मैचन जनाय नागरिकतायाः प्रमाणपत्रप्रदानेन नागरिकत्वेन तदङ्गीकारात्पूर्वं तत्पात्रतापरीक्षणं करणीयम् । तदर्थं वस्तुगतः (Objective), क्रमगतः (Systematic), परीक्षणीयः (Verifiable), विश्वसनीयः (Reliable) इत्येतेषां विधीनां व्यवस्थया देशस्यैव विध्यन्तर्गतया भाव्यम् । नागरिकताया नीतौ विधौ च संसारस्य सर्वेषु देशेषु समानता न भवतीति स्वाभाविकं खलु । यतो हि, भिन्नानां राष्ट्राणामुत्पत्तौ भिन्नानां पारिस्थितिकसम्भाव्यतानां (Situational Probability) निर्णायकः प्रभावः स्यात्, एवञ्च वर्तमानाः परिस्थितयोऽपि पृथक् स्युः । अष्ट्रेलिया-क्यानडा-संयुक्तराज्यामेरिकादीनामितिहासो यादृशोऽस्ति, साम्प्रतिकी भू-राजनीतिकावस्था च यादृशी वर्तते, नेपालभुटानादीनां तद्भिन्नत्वेन अत्रत्यायां नागरिकतानीतौ सादृश्याभावः स्वाभाविक एव । जनसङ्ख्याबहुलानां चीन-भारत-पाकिस्तान-बङ्गलादेशानां निकटवर्तिभ्यां नेपालभुटानदेशाभ्यां नागरिकतायाः प्रावधाने विशेषावधानतालम्बनं

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri
व्यावहारिकं बुद्धिमत्तापूर्णञ्च सिद्ध्यति ।

पाणिनीये समये नागरिकतावाप्तेरुपायत्रयमासीदित्यभिहितम्- अभिजनाधारः (वंशजाधारः), चिरकालं निवासः, राष्ट्रभक्तिश्चेति ।[96] वैदेशिकानां बाह्यानां वा जनानां नागरिकीकरणस्य, वंशजनागरिकतायाश्च प्रावधानं प्राचीनकालतो दृश्यते[97] परन्तु नागरिकतायाः प्रदानात् पूर्वं पात्रतापरीक्षणस्य युक्तियुक्तं प्रावधानमासीत् ।

राज्यसीमाभ्यन्तरे निवसद्भ्यः सर्वेभ्यो नागरिकता प्रदेयेति अनिवार्यता नास्तीति प्राचीनमाधुनिकञ्च प्रचलनं सङ्केतयति । आवासस्य वैधानिकमुपायमाश्रित्य देशस्य धरातलीयेनाऽऽधारेण नागरिकताप्रदानविधेर्नियमनम्, नागरिकताया अधिकारवद्भ्यो हि तत्प्रदानञ्च समुचितं भवति ।

२) कस्यचन नवनागरिकत्वेनाङ्गीकारात् पूर्वं (अङ्गीकृताया अन्यविधाया वा नागरिकतायाः प्रदानात् पूर्वम्) तन्निवासक्षेत्रगतायां संस्कृतौ तस्य जनस्यानुकूलनमनिवार्यमिति प्रावधानं राज्यराष्ट्र-सिद्धान्तस्यानुकूलो व्यवहारः सिद्ध्यति । भाषा-धर्म-संस्कृत्यादिमापदण्डाधारेण योग्यस्य जनस्यैव नागरिकताप्रदानाय अङ्गीकार उचितः ।

यथा कस्मैचन जनाय अङ्गीकृतनागरिकताया दानादानविषयं निर्णेतुं स परस्रोतस (Exogenous) आक्रमणकारिप्रवृत्तेर्वानुयायी न वेत्यत्र विशेषतोऽवधेयं भवति । परस्रोतसो भिन्नसम्प्रदायस्य वा जनत्वेन हि समस्या समापततीति नहि कथनस्यास्य आशयः । यतो हि, भिन्नस्रोतःसम्प्रदायाश्च विविधतायां समन्वीय ऐक्यबद्धतामाप्तुं शक्नुवन्ति परन्तु आक्रमणकारिणोऽतिक्रमणकारिणो वनमारविटपा इव विनाशकप्रवृत्तयश्चेत् समस्या भविष्यति । आक्रमणकारियण प्रवृत्त्या रहितः समूहोऽस्ति चेत्तु आसंसारं यस्मिन् कस्मिन्नपि देशे तेषां नागरिकत्वेन स्वागताचारो हानिकारो न भवति । आक्रमणकारिण्या अतिक्रमणकारिण्या च प्रवृत्त्या युक्तस्य समूहस्य आवासन्तरणे शोभनस्य प्रभावस्य असम्भावनैव

96 विद्यालङ्कार (खीष्टाब्दस्य २००१), पृ. १३९-१४० ।

97 जायसवाल (खीष्टाब्दस्य १९२४), पृ. १२१ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

अधिका भवति । भविष्यति सम्भाविष्यमाणां समस्यां पूर्वमेव बुद्ध्वा राज्यराष्ट्रस्य चरित्रानुकूल्येन नागरिकताप्रदानस्य प्रावधाननिर्माणं बुद्धिमत्तापूर्णं भवति ।

३) वंशजस्य, जन्मनः, अङ्गीकृतविधेः, केनचिदन्येन वाधारेण नागरिकतामधिगतस्यापि जनस्य कार्यकलापाधारेण देशद्रोहे संलग्नतायां सिद्धायां कठोरतमा दण्डव्यवस्था सम्पादनीया । भू-राजनीतिक-वैधानिकतापन्नं भौगोलिकसीमबद्धं राज्यमेव राष्ट्रं भवतीति मान्यता राज्यराष्ट्रस्य वर्तते । अतो राज्यस्य वैधानिकतायाः, व्यावहारिक्या आधिकारिकतायाः, सम्मानस्य, नागरिक-राजनीतिकाधिकारयोश्च क्षेत्रेषु देशस्य सर्वेषां नागरिकाणां सर्वोच्च-समानाऽभिभावकरूपेण निर्णायिका भूमिका अनिवार्या भवति । सर्वेषां नागरिकाणां संरक्षणम्, राज्यसत्तायां सहभागितायाः सुनिश्चयनम्, समानराष्ट्रियतायां विविधतानां समन्वयीकरणमित्यादीनि कार्याणि राज्यस्य दायित्वान्तर्गतानि भवन्ति । स्वतन्त्रता, स्वाधीनता, सार्वभौमसत्ता, क्षेत्रगताऽखण्डता, सहृदयतायाः सम्बन्धस्य नागरिकेषु प्रवर्धनम्, राज्येन राष्ट्रेण वा द्रुह्यमाणानां जनानां कृते कठोरदण्डस्य प्रावधानमित्यादयस्तु राज्यस्य विशेषाधिकारनिहिता भवन्ति । मान्यतेयं राज्यराष्ट्र-सिद्धान्तस्य वर्तते ।

४) वंशजस्य, जन्मसिद्धस्य, अङ्गीकृतस्य वा यस्य कस्यापि आधारेण केनचिद् नागरिकतायाः प्रमाणपत्रं प्राप्तं स्यात् परन्तु तस्य क्रियाकलापस्य देशद्रोहत्वे सिद्धे तदर्थं कठोरदण्डस्य व्यवस्था भवति चेदपि तेन नागरिकेण सह च अन्यैर्नागरिकैः सहेव समानव्यवहारस्य पद्धती राज्यराष्ट्र-सिद्धान्तानुकूला वर्तते । एतत्सिद्धान्तानुसारेण नागरिकतायाः प्रमाणपत्रस्य प्रदानाय पात्रतापरीक्षणस्य कठोरं प्रावधानं युक्तियुक्तं खलु ।

वंशजा नागरिकाः सर्वेऽपि सर्वथा सद्वृत्ताः, शोभनाः, विश्वासार्हाश्च परन्तु अङ्गीकृतनागरिकाः सर्वथा असद्वृत्ताः, अशोभनाः, विश्वासहीनाश्चेति चिन्तनं दोषयुक्तमस्ति । यतो हि, सद्वृत्तत्वासद्वृत्तत्वयोः, शोभनत्वाशोभनत्वयोः, विश्वासनीयत्वाविश्वसनीयत्वयोर्वा विशेषता व्यक्तिसमबद्धा भवति । वंशजा नागरिका अपि केचन सद्वृताः, केचनासद्वृताः, केचन शोभनाः, केचनाशोभनाः,

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0 In Public Domain. Digitization by eGangotri

केचन विश्वसनीयाः, केचनाविश्वसनीयाश्च सम्भवन्ति । कृतापराधाय यस्मै कस्मैचनापि दण्डप्रदानं राज्यस्य दायित्वं वर्तते परन्तु देशस्य विशिष्टपरिवेशाधारेण आदिवासिनः समुदायस्य जनानां कृते सद्विचारात्मको विभेदः संरक्षणं वा स्वाभाविकं खलु । राजकीयस्य, शासकीयस्य, प्रशासकीयस्य च अधिकारस्य उच्चपदीयैः स्वकीयोत्तरदायित्वसन्दर्भेऽवश्यमवधेयमिति मान्यता कौटिल्यीयेऽर्थशास्त्रे, तत्पूर्वं प्राचीनकाले च आसीदिति विज्ञायते ।

५) जन्मन आधारेण आदिवासिसमुदायान्तर्गतत्वेऽपि धर्मपरिवर्तनं विधाय परस्रोतसः (Exogenous) आक्रामकप्रवृत्तेः सम्प्रदायस्यावलम्बिभिरादिवासिजनैः प्राप्तव्या विशेषाधिकारः, अग्राधिकारः, सद्गुणकविभेदस्य लाभश्च तेभ्यो न देयाः । धर्मान्तरणं विहितवद्भ्यः तादृग्भ्यो जनेभ्यः प्रत्यक्षतया परोक्षतया वा राष्ट्रघातस्य सम्भावना स्वाभाविकी खलु । अतः परस्रोतसामाक्रामकप्रवृत्तेः प्रचारकपद्धतेः कारणेन जायमानं धर्मान्तरणं विधिप्रक्रियया दण्डनीयं विधाय निराकरणीयं भवति । व्यक्तेर्मौलिकाधिकारगतायाः स्वतन्त्रतायाः सीम्नः सम्मानः करणीयः परन्तु परस्रोतांसि परसंसाधनानि च समाश्रित्य सङ्गठनात्मकरूपेण सञ्चाल्यमानो देशस्य मौलिकैर्धर्म-संस्कार-संस्कृतिभिर्विरुद्धः क्रियाकलापो निषेधनीयः ।

६) संसारे यत्र कुत्रापि स्थितानां स्वनागरिकाणां संरक्षणस्य दायित्वं देशेन ग्रहणञ्च राज्यराष्ट्र-सिद्धान्तस्य अन्यतमं प्रमुखं वैशिष्ट्यं वर्तते । परदेशस्थानां स्वनागरिकाणां न केऽपि दमनं न कुर्युः । तेषु विभेदस्याऽन्यायस्य च व्यवहारो न भवेदिति विषये सर्वैर्देशैः प्रभावपूर्णा संरक्षणात्मिका भूमिका निर्वहनीया ।

एवञ्च प्रविधेरुन्नत्या युगेऽस्मिन् परदेशवासिनाञ्च जनानां मतग्रहणं सुकरमस्ति । अतो निर्वाचने संसारे यत्र कुत्रापि निवसतां स्वनागरिकाणां मताऽऽदानस्य सुनिश्चितीकरणमपि देशस्य कर्तव्यमिति मननञ्च नूनं राज्यराष्ट्र-सिद्धान्तानुरूपम् परन्तु राज्यराष्ट्र-सिद्धान्तस्यानुपालकेन देशेन द्वैधनागरिकतायै (Dual Citizenship), बहुनागरिकतायै (Multiple Citizenship) च मान्यताप्रदानार्थं

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सैद्धान्तिको विरोधोऽस्ति । राज्यराष्ट्रस्य प्रबलतमेषु वैशिष्ट्येषु अन्यतममिदम् ।

पूर्वं मूलदेशस्य (Nation of Origin) एव नागरिका अपि केनचित् कारणेन अन्यदेशीया नागरिका भवन्ति चेत्तेषां नागरिक-राजनीतिकाधिकारौ (Civil and Political Rights) च यस्य देशस्य नागरिकतावाप्तास्ति, तेनैव देशेन सम्बद्ध्येते । सांस्कृतिकाधिकारपक्षे (Cultural Rights) तु मूलदेशस्यैव यथासम्भवं भूमिका भवति । अत आप्रवासनमवाप्तैः स्वदेशनागरिकतां परिहाय तद्देशनागरिकतां स्वीकृतवद्भिः पूर्वजैर्मूलदेशस्य नागरिकतायाः परित्यागस्य कारणेन अन्यदेशनागरिकतापन्नैर्जनैः सहापि देशेन सांस्कृतिकाधिकारक्षेत्रे आत्मीयव्यवहारं विधाय राजनीतिकाधिकारक्षेत्रे तु स्वदेशीयनागरिकेभ्यो मान्यताप्रदानं राज्यराष्ट्रस्य वैशिष्ट्यमिति निश्चप्रचम् ।

यदि कश्चन जनो मूलदेशाद् स्थानान्तरणेन कञ्चन अन्यं देशं प्राप्य तत्रत्यां नागरिकतां प्राप्तवान् वर्तते परन्तु सः, तत्सन्ततिर्वा पुनः तत्रत्यां नागरिकतां परित्यज्य स्वमूलदेशस्य नागरिकतामिच्छति चेत्तत्पात्रतां परीक्ष्य योग्यत्वे प्रमाणीकृते सति नागरिकत्वेन तदङ्गीकारो राज्यराष्ट्रस्य चरित्रानुकूलमेव ।

आवाससौविध्यहेतुना अन्यदेशस्य नागरिकतां स्वीकृतवता जनेन तद्वंशीयेन वा कालान्तरे पुनः स्वदेशस्यैव नागरिकता वाञ्छिता चेत्तत्पात्रतां परीक्ष्य नागरिकत्वेन तदङ्गीकारो यद्यपि राज्यराष्ट्रस्य चरित्रानुकूलमेव, तथापि व्यवहारतः तादृशस्य प्रावधानस्य कार्यान्वयनपक्षस्तु परिस्थितिजन्यान् पक्षान्तराँश्च विचार्य निश्चेतव्यः ।

७) कस्यचन देशस्य नागरिकैः पारिश्रमिकलोभेन अन्यदेशसैन्यसंरचनायां प्रवेशः, तत्र कार्यसम्पादनरूपो विसङ्गतव्यवहारो राज्यराष्ट्र-सिद्धान्तेन सह प्रतिकूलमस्ति । स्वदेशीयान् नागरिकान् अन्यदेशीयसैन्यसेवार्थं प्रेषणं स्वकृतिप्रदानं वा कस्यचिदपि स्वतन्त्रस्य स्वाधीनस्य सार्वभौमसत्तासम्पन्नस्य च देशस्य कृते नहि शोभनं कार्यम् । अपरत्र अन्यदेशानां नागरिकाँश्च स्वदेशसैन्यसंरचनायां प्रवेश्य वृत्तेः प्रदातुर्देशस्य कृते तु तदेव कार्यं गौरवबोधकं

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri
भवति । संयुक्त-राष्ट्र-सङ्घस्यैव सर्वसमानसंस्थाया नेतृत्वम् संसारस्य यस्मिन् कस्मिन्नपि देशे शान्तिस्थापनार्थं सैन्यपरिचालनन्तु यस्य कस्यापि देशस्य कृते गौरवास्पदमेव कार्यम् ।

यथा नेपालिनां नागरिकाणां बेलायतदेशेन भारतदेशेन च 'गोर्खाभर्ती' इति नाम्ना (अन्यैः कतिपयैर्देशैः चौर्यमार्गेण च) तत्र तत्र सैन्यबले प्रविष्टिः क्रियते । नेपालेन एतान्निषेधनमेव राज्यराष्ट्र-सिद्धान्तानुकूलं सिद्ध्यति । अपरत्र संयुक्तराष्ट्रसङ्घीयकार्यस्य कृते नेपालिसैन्यपचालनपक्षे तु बह्वी सक्रियता उपयुक्ता दृश्यते ।

८) राष्ट्रियेषु, प्रादेशिकेषु, स्थानीयेषु, सांस्कृतिकेषु च व्यवहारेषु राज्येन आदिवासिनः समुदायस्य संस्कृत्यै प्राथमिकताप्रदानं राज्यराष्ट्रस्य अपरिहार्यं वैशिष्ट्यं वर्तते । वैशिष्ट्यमेतद् राज्यराष्ट्र-सिद्धान्तेन स्वीकृतायां राष्ट्रपरिभाषायामेव निहितमस्ति । देशे सामाजिकैकतायाः सुनिश्चयेनैवापि देशो राष्ट्रस्वरूपेण समुन्नतिं याति । अतः स्वसीमरेखान्तर्गतानां मूलसंस्कृतीनां सहृदयतासूत्रेण ग्रथनं राज्यराष्ट्रस्य दायित्वम् । एवं व्यवहारेण नागरिकेषु परस्परं विभेदो न भूत्वा स्वक्रियात्मकविधिना मौलिकानां स्थानीयानां धर्म-संस्कृति-परम्परा-सम्पदादीनां संरक्षणं संवर्धनं प्रवर्धनञ्च क्रियत इति मन्तव्यम् ।

६.५.३.२. प्राकृतिकं संसाधनं सम्पच्च

राज्यराष्ट्र-सिद्धान्ते मूलतो राज्यस्य वैधानिकं/विधिगतं स्वामित्वम्, स्थानीयानां समुदायानां नैतिकं व्यावहारिकं/प्रायोगिकं स्वामित्वञ्च प्राकृतिक-संसाधनान्तर्गते मन्येते । राज्यस्य एवंविधस्य वैधानिकस्य/विधिगतस्य, स्वामित्वस्य कार्याधिकारः केन्द्रीयसर्वकारस्य स्थानीयसर्वकारस्य वा राज्यसंयन्त्रस्याधीने भवति । तस्य स्वामित्वस्य प्रकृतिरभिभावकीया, संरक्षणात्मिका, करसङ्ग्रहात्मिका च भवति । नैतिकस्य व्यावहारिकस्य प्रायोगिकस्य च स्वामित्वस्याधिकारवान् स्थानीयः समुदायो जाति-प्रजात्याद्याधारेण नहि, अपि तु आवासस्य भौगोलिकाधारेण, राजनीतिकाधारेण,

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

राष्ट्रियताधारेण, जनाकाङ्क्षाधारेण च निर्णीयते।
CC-0.In Public Domain. Digitization by eGangotri

प्राकृतिकेषु संसाधनेषु राज्यस्य निरपेक्षस्य प्राधिकारस्य, समग्रतो वैयक्तिकाधिकारस्य वा मननशीला उभयविधा पद्धती राज्यराष्ट्र-सिद्धान्तेन अङ्गीक्रियते। प्राकृतिकेषु संसाधनेषु राज्यस्य निरपेक्षं प्राधिकारं स्वीकृतवत्याः पद्धतेर्मूले सर्वसत्तावादिनी मान्यता वर्तते। सामन्तवादिनः, वामपथिनः, समाजवादिनः, कम्युनिष्टदलीयाश्च सर्वसत्तावादिनो वर्तन्ते। अतस्ते प्राकृतिकेषु संसाधनेषु राज्यस्य प्राधिकारं मन्यन्ते। अपरत्र समग्रतो वैयक्तिकाधिकारस्य मननपद्धतौ पुञ्जवादिनी मान्यता वर्तते। राज्यराष्ट्रपद्धतौ तु प्राकृतिकेषु संसाधनेषु नैतिकाधारेण व्यावहारिकाधारेण प्रायोगिकाधारेण च स्थानीयस्य समुदायस्यैव स्वामित्वविचारो विलोक्यते, यत्र स्थानीयसमुदायः कोऽस्तीति निर्णयावसरे जातीय-प्रजातीयाद्याधारेण न, अपि तु आवासस्य भौगोलिकताया जनापेक्षायाश्चाधारेण चिन्तनम्। राज्येन राजस्वग्रहणमपि यथोचितं करणीयमिति चैव मौलिकी स्थानीया पद्धतिर्वर्तते। महाभारतस्य शान्तिपर्वणि राज्योत्पत्तिविषये युधिष्ठिराय भीष्मोपदेशावसरे अपि परिचर्चा कृतास्ति, तत्तात्पर्यञ्च राज्यस्य पूर्वोक्तभूमिकाया द्योतकमस्ति।

वस्तुतो राज्यराष्ट्र-सिद्धान्ते परिवारस्य, कुटुम्बस्य, समुदायस्य, नैतिकस्य, व्यावहारिकस्य, प्रायोगिकस्य स्वामित्वस्य, राज्यस्य वैधानिकस्य/विधिगतस्य संरक्षणस्य च यत् सुसंयोजनं भवति, तेन भू-राजनीतक-वैधानिकतायाः, सांस्कृतिक-समाजिकैकतायाश्च समष्टेर्मूलं द्रढयति। यथोचितं करग्रहणं राज्याधिकारः। राज्याय राजस्वप्रदानमपि राज्यस्य सीमरेखाभ्यन्तरे वासिनां नागरिकाणामन्येषाञ्च जनानां कर्तव्यम्। शिक्षायाः, स्वास्थ्यस्य, सार्वजनिकयातायातस्य, जीविकावृत्त्यादीनां [illegible]र्व्यवस्थापनं वा करसङ्ग्राहकत्वेन राज्यस्यैव प्राथमिकं दायित्वम्। जनानां शिक्षा-स्वास्थ्यादीनां व्यवस्थापनस्य तात्पर्यं सर्वकारस्यैव अर्थव्ययेन तत्सर्वं सम्पद्यत इति न, अपि तु सर्वकारस्य, समुदायस्य सहकारिणः, व्यक्तिगतस्य वा संयन्त्रस्य माध्यमेन तेषां सञ्चालनं व्यवस्थापनं नियमनञ्च भवतु, शिक्षा-स्वास्थ्यादिभिर्न कश्चन

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

वञ्चितो भवेदिति निश्चयनस्य च दायित्वं राज्यस्यैव वर्तते इत्यभिप्रायः । अन्यथा राज्यस्य अभिभावकीयस्य, संरक्षणात्मकस्य, करसङ्ग्रहणात्मकस्य च पक्षस्य वैधानिकता नैतिकरूपेण निर्बला भवति ।

६.५.३.३. अन्तरराष्ट्रियः प्रभावः

राष्ट्रस्यापि मित्रारी भवत इति तथ्यन्तु प्राचीनकालतः स्वीकृतं वर्तते । यथायं पक्षोऽर्थशास्त्रे विशदं परिचर्चितोऽस्ति । प्रथमस्य द्वितीयस्य च विश्वयुद्धस्य नाम्ना प्रथितात् त्रासदात् किञ्चित् शिक्षामवाप्य संयुक्तराष्ट्रसङ्घः संस्थापित आसीत् । तदनन्तरमन्तरराष्ट्रियसम्बन्धस्य नवीनाऽऽयामे मानवजातेः प्रविष्टिर्जाता । सम्प्रति वैश्विकस्तरे विनियम-समन्वय-सहकार्यादीनां कृते नैकानि संस्थागतसंयन्त्राणि सन्ति । यदि राज्यराष्ट्र-सिद्धान्तस्य मान्यताया वैश्विकरूपेण मूलप्रवाहीकरणं भवेत्, एतत्प्रवर्ध्यस्योदार-राष्ट्रियतावादिनो दृष्टिकोणस्य, व्यवहारस्य च कारणेन वैश्विकेषु विनिमय-समन्वय-सहकार्यादिषु भृशं साहज्यं भविष्यति ।

अन्तरराष्ट्रियस्य सम्बन्धस्य शोभनोऽशोभनश्च उभयविधौ पक्षौ स्तः । रोगसङ्क्रमणकारणेन जन्यानां महाव्याधीनाम्, महामार्याः, प्राकृतिकस्य प्रकोपस्य, विविधानां सङ्कटानाञ्चावसरेषु मिथः साहाय्यं सहकार्यञ्च शोभनः पक्षोऽस्ति परन्तु वैदेशिक्याः संस्थायाः, कथिता अन्तरराष्ट्रिया असर्वकारीया संस्था (INGO) इत्यस्या भूमिकाया हानिकरः प्रभावस्तु अवाञ्छनीयो वर्तते ।

वैदेशिक्याः कथिताया अन्तरराष्ट्रियाया असर्वकारीयायाः संस्थाया भूमिकाया वृद्ध्या स्वतन्त्रस्य, आत्मनिर्भरस्य, सार्वभौमसत्तासम्पन्नस्य च देशस्याधिकारक्षेत्रेऽतिक्रमणम्, हननम्, कासुचिदवस्थासु तु समग्रत आघातश्च भवति । अतः तादृशीनां संस्थानां देशेऽत्यावश्यकत्वे हि राज्येन निश्चितस्य, स्थानीयसमुदायेनाऽनुमोदितस्य वा परियोजनाविशेषस्य (Specific Project) सञ्चालनाय स्वीकृतिप्रदानात्मिकायाः कार्यनीतेरवलम्बनमेव राज्यराष्ट्र-सिद्धान्तस्य मान्यतानुकूलमस्ति । राज्येन विशेषनिरीक्षणपुरःसरं

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

विधेर्नियन्त्रणान्तःपातितया अन्तराष्ट्रियायै असर्वकारीयायै संस्थायै देशे प्रवेशाज्ञाप्रदानं समुचितं भवति । तासां संस्थानां निरीक्षणस्य, नियमनस्य, यथापेक्षं दण्डस्य च क्षमता राज्यसंयन्त्राणां नास्ति चेद् 'न भवति वंशः, न वाद्यते वंशी'ति कथनमिव देशे तासां प्रविष्टौ पूर्णतया प्रतिबन्धः करणीयः ।

CC-0.In Public Domain. Digitization by eGangotri

उपरि प्रस्तुतानि तथ्यानि दृष्टान्तीकृत्य अन्येषां विषयवस्तूनां सन्दर्भाणामपि राज्यराष्ट्र-सिद्धान्तस्यालोके व्यावहारिकं प्रायोगिकं विश्लेषणं निर्णयञ्च कर्तुं शक्यते । राज्यराष्ट्र-सिद्धान्तानुसारेण निश्चितभौगोलिकसीमाभ्यन्तरे निवसतां विविधानां जाति-प्रजाति-समुदायानां परस्परं राज्यस्य हेतुना सहास्तित्वम्, समन्वयः, सहकार्यम्, सहृदयता च वर्धते । एतेन देशे सांस्कृतिक-सामाजिकैकता विकस्य समष्टिभूतं राष्ट्रं जीवनं प्राप्नोतीति मान्यता वर्तते । एतस्या मान्यतायाः कारणेनैव राज्यस्य सर्वसमानाभिभावकत्वमननम्, राज्येनाऽऽधिकारिकरूपेण स्वीकृतायाः समानाया राष्ट्रियताया अवलम्बनञ्च समेषां नागरिकाणां कर्तव्यं मन्यते । राज्येन समानाया राष्ट्रियताया आदर्शनिरूपणाय आधारनिर्माणावसरे भू-राजनीतिक-वैधानिकतया सहैव सांस्कृतिक-सामाजिकैकतायाश्च संसंयोजनमनिवार्यम् ।

राज्यराष्ट्र-सिद्धान्तस्य एवंरीत्या विश्लेषणानन्तरं नागरिक-राजनीतिकयोरधिकारयोः सांस्कृतिकाधिकारस्य च सुसंयोजनं कथं करणीयमिति विषये विचारोऽपेक्षितो भवति । राज्यसत्तायां सर्वेषां नागरिकाणां सहभागितां भावयित्वा भाषा-जाति-प्रजाति-साम्प्रदायाद्याधारेण घृणावादि विखण्डनं रुद्ध्वा सांस्कृतिक-सामाजिकैकता निश्चीयते चेन्नागरिक-राजनीतिकाधिकारयोः (Civil and Political Rights), सांस्कृतिकाधिकारस्य च पृथक्करणमपेक्षितं भवति ।

६.५.४. नागरिक-राजनीतिकाधिकारयोः सांस्कृतिकाधिकारस्य च विशिष्टीकृता प्रत्याभूतिः

देशस्य सर्वविधानां प्रत्येकं जनानां (नागरिकाणाम्) समन्वयेन समष्टीकृतरूपतया राज्यराष्ट्रं जातीयं राष्ट्रं नास्ति । राजनीतिकं राष्ट्रमेतत् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

राज्यराष्ट्रमिदं राष्ट्रस्य नागरिकाणां सभ्यता-संस्कृति-सामाजिकपद्धत्यादीनां सन्दर्भे समावेशि व्यवहारं करोति। अतो राज्यराष्ट्रं सभ्यतागताया राष्ट्रियतायाः चरित्रञ्च वर्धयति । नागरिक-राजनीतिकाधिकारौ (Civil and Political Rights), सांस्कृतिकाधिकारं (Cultural Rights) च न मिश्रणीकृत्य विशिष्टीकृतां सीमरेखां विनिश्चत्य विशिष्टीकृतस्य (Mutually exclusive but not conflicting entities) रूपेण तत्प्रत्याभूतिश्च राज्यराष्ट्र-सिद्धान्तस्याऽन्यतमं प्रमुखं वैशिष्ट्यम् । उपर्युक्तयोर्द्विप्रकारकयोरधिकारयोर्मिश्रणेन देशे सङ्कीर्ण-राष्ट्रियतावादी विचारः प्रसृत्य कथिता परिचयमूला राजनीतिः (Identity Politics) प्रवर्धते। एतेन राष्ट्रराज्यं द्वि-राष्ट्रियता बहु-राष्ट्रियता चेति अवधारणानां प्रवर्धनं भूत्वा समानाया राष्ट्रियताया आदर्शं प्रति आघातो भवति । तस्मात् समूलां राष्ट्रियतां स्थापयितुं राज्यराष्ट्रे नागरिक-राजनीतिकाधिकारयोः सांस्कृतिकाधिकारस्य च पृथक्करणम् (Separation of Civil and Political Rights and Cultural Rights) अपेक्ष्यते ।

नागरिक-राजनीतिकाधिकारयोः सांस्कृतिकाधिकारस्य च राज्यराष्ट्रे तेषां विशिष्टसम्बन्धे विशिष्टतापूर्वकं प्रत्याभूतिर्विधीयते । क्षेत्र-जाति-प्रजाति-समुदाय-सम्प्रदायादिगताः परिचयाः सांस्कृतिकाधिकारस्य विषयाश्च नागरिक-राजनीतिकाधिकारसम्बद्धाः सन्ति। नागरिक-राजनीतिकाधिकारयोः कृते नागरिक एव आधारभूतं तत्त्वम् परन्तु सांस्कृतिकाधिकारस्य कृते देशस्य क्षेत्र-जाति-प्रजाति-समुदाय-सम्प्रदायादिपरिचयाधारेण निर्मिता अवयवा आधारतत्त्वानि मन्यन्त इत्याशयः। तस्माद् नागरिक-राजनीतिकाधिकारयोः सम्बन्धे जाति-प्रजाति-समुदाया-सम्प्रदायादिभिरभिनिर्मितस्य परिचयस्य निर्णायिका भूमिका न भवति परन्तु सांस्कृतिकाधिकारस्य सम्बन्धे राज्यं जाति-प्रजाति-संस्कृति-समुदाय-सम्प्रदाय-भौगोलिकक्षेत्रादिभ्यो निरपेक्षं भवितुं न शक्नोति।

राज्यराष्ट्रे सांस्कृतिकाधिकारस्य सन्दर्भे आदिवासिनः समुदायस्याधिकारे सत्यपि नागरिक-राजनीतिकाधिकारयोः सन्दर्भे नागरिकव्यक्तिरेव आधारतत्त्वं मन्यते । नागरिक-राजनीतिकाधिकारयोः (Civil and Political Rights), सांस्कृतिकाधिकारस्य (Cultural Rights) च परस्परं

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

मिश्रणमवरोध्य विशिष्टीकृतया प्रत्याभूत्या राज्यसत्तायां देशस्य सर्वेषां नागरिकाणां सहभागितासम्पादनं राज्यराष्ट्रे भवति । एवञ्च भाषा-जाति-प्रजाति-सम्प्रदायादिव्याजेन घृणावादि विखण्डनं संरोध्य सांस्कृतिक-सामाजिकैकतायाः सुनिश्चयनस्य पद्धती राज्यराष्ट्र-सिद्धान्तेनाऽवलम्बिता वर्तते ।

राष्ट्रियतायाः परिभाषायै परिचयार्थञ्च राज्यमेव मूलं तत्त्वम् । अतो नासिका उन्नताऽवनता वा कीदृशी ?, चक्षुषी दीर्घायतने सङ्कुचिते वा कीदृशे ?, देहो गौरवर्णः कृष्णवर्णो वा कीदृशः ?, श्मश्रूणि घनानि अल्पानि वा कथम् ?, हिमालयस्य, पर्वतस्य, तराइप्रदेशस्य वा कुत्रत्यः ?, कस्या जातेः ?, कस्याः प्रजातेः ?, इत्येवंरीत्या जनानां विखण्डनात्मिकया ध्रुवीकरणात्मिकया घृणावादि-राजनीतिकदृष्ट्या राष्ट्रस्य परिभाषाप्रदानपद्धतिं राज्यराष्ट्रं नहि स्वीकरोति । इह राष्ट्रियः परिचयो मन्यते, न तु सङ्कीर्णपरिचयात्मिका राजनीतिः । परिचयमूलायाः संस्कृतेः प्रवर्धनं राज्यराष्ट्रेण विधीयते ।

राज्यराष्ट्रे सांस्कृतिकाधिकारस्य सन्दर्भे आदिवासिनः समुदायस्य अग्राधिकारो मन्यते । अतः कस्मिँश्चिदपि देशे तत्रत्यानां मौलिकेभ्यः प्राचीनेभ्यो धर्म-संस्कार-संस्कृति-सभ्यतादिभ्यः सर्वैरपि राज्यसंयन्त्रैर्मान्यताप्रदानं स्वाभाविकं खलु । मान्यतेयमतिप्राचीनात् कालात् प्रचलितपरम्परानुरूपा वर्तते । मत्स्यन्यायस्य अपाकरणाय राज्योत्पत्तिर्बभूव । तस्माद् दण्डनीतेः कार्यान्वयनं राज्यस्याधिकारक्षेत्रे नूनमस्ति परन्तु दण्डनीतेर्मूले धर्मोऽस्तीति मन्यते । धर्मस्य पालनं पालनाय निर्देशनम्, समाजे प्रचलितानां धर्म-संस्कार-संस्कृति-परम्पराणां संरक्षणञ्च राज्यस्यैव दायित्वं मन्यते स्म ।[98]

---

98 द्रष्टव्यम्– In Hindu society, "the king's man duty was just to uphold the existing social order, which considered of an infinite number of autonomous groups each with its own constitution, laws and practices formed for various purposes like local administration, industry, trade or religion" (Sastri 1993, p. 487). As it has been observed, Kautilya's Arthashastra "means something quite definite by the state, namely an order of society with the state does not create, but which it exists to secure" (Keith 1993, p.455). The most basic foundation of Artha, the dominion or the earth broadly, is not the creation of the ruler. Likewise, the eternal rules, aspects of Dharma, also are not created by the ruler. What the ideal ruler is expected is to ensure good governance by proper acquisition and management of Artha and by upholding the principals of Dharma. This is why the ruler's role in social affairs was rarely expected in traditional Hindu society : "It is

CC-0.In Public Domain. Digitization by eGangotri
Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

कञ्चन भूभागं विजित्य स्वकीये राज्ये समावेशानन्तरञ्च विजेत्रा राज्ञा तद्भूभागस्य संस्कृत्यै मान्यता प्रदेयेति सदाचारः पृथ्वीनारायणशाहस्य समयं यावदासीदिति ज्ञायते । काष्ठमण्डपे कुमारीयात्रावसरे कुमारीभवने 'कुमार्याः प्रवेशानन्तरं तच्चरणयोः प्राणिपत्य राजभवनं प्रति प्रस्थाननियमः' पृथ्वीनारायणशाहेन परिपालित आसीत्,[99] एवञ्च "प्रातर्व्युत्थानानन्तरं कान्तिपुरस्य नागरिकैः स्वात्मनि पञ्चश्रीयुतस्य पृथ्वीनारायणशाहस्य प्रजात्वमनुभूतम् । राजसिंहासनेऽधिष्ठिते पञ्चश्रीयुते पृथ्वीनारायणे नगरवासिनां गृह-क्षेत्राद्याः सर्वाः सम्पदः प्रत्यादत्ताः, सर्वे नगरवासिनो निश्चिन्ता भवेयुरिति सूचना च प्रसारिता"[100] आसीदिति प्रसङ्गश्च इह सान्दर्भिकोऽस्ति । मल्लवंशस्य अपाकरणपूर्वकं पृथ्वीनारायणशाहस्य शासने प्रारब्धेऽपि भक्तपुर-ललितपुर-काष्ठमण्डपानां पर्व-यात्रा-रीतिस्थितिषु न किञ्चन परिवर्तनं जातम् । नवीनस्य राज्ञश्च पूर्वतनस्य राज्ञ इव परम्परागतरूपेण विधिपूर्वकं सहभागितायाः कारणेन सा वैदिकस्य हिन्दुराजधर्मस्याऽविच्छिन्ना मान्यतासीदिति कथनेन नात्युक्तिः स्यात् । राज्यव्यवस्थाया उद्देश्यं समाजरक्षणमिति वैदिकी मान्यता ।[101]

असौ राष्ट्रस्याऽवयवरूपाणां सर्वेषां समुदायानां सम्प्रदायानां कृते समाना नीतिरासीत् । विजिगीषुणा राज्ञा कस्मिँश्चिद्भूभागे विजिते सति तत्रत्या संस्कृतिः पालनीयेति नीतिवचनमर्थशास्त्रादिग्रन्थेषु लभ्यते । विजितस्य जनपदस्य पूर्णा मर्यादा भवत्विति मान्यतायां राष्ट्रस्य समानाधिकारसहितस्य अभिन्नाङ्गभूतस्य समुदायस्याऽमर्यादायाः प्रश्न एव नोत्पद्यते स्म । राज्यस्य विधायिकान्तर्गतस्याऽधिकारस्य प्रयोगेण विधितो जननशीलेन परिवर्तनेन

only in the rare instances of disputes arising among then proving incapable of adjustment that the king's aid was invoked; it was only then, and even then only to the extent needed to procure a just settlement of the matter to dispute, that the king did interfere in the affairs of these groups" (Sastri 1993, p.487). Drawing on Mahabharata, it can be said that the ruler, to be in accordance with Hinduism, is always considered to be under the law of Dharma : "One becomes a king for advancing the cause of dharma and not for acting capriciously. All creatures depend on dharma, and dharma depends on the king. He, therefore, is the true king who maintains dharma" (Aiyar 1993, p. 503).

99 आचार्य (वैक्रमाब्दस्य २०६१), पृ. ३५१ ।

100 आचार्य (वैक्रमाब्दस्य २०६१), पृ. ३५१ ।

101 द्रष्टव्यम्– शर्मा रघुनन्दन (ख्रीष्टाब्दस्य १९९०), पृ. ५२९ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri
सहैव तद्विधेः कार्यान्वयनन्तु राज्येन नूनं करणीयम्, परन्तु जनसमुदायस्य सांस्कृतिकव्यवहारान्तर्गतस्य याथार्थ्यस्य चाऽपरिगणनं कर्तुं राज्यं नार्हति।

तस्माद् राष्ट्रिये, प्रादेशिके, स्थानीये च सांस्कृतिके व्यवहारे राज्येन आदिवासिनः समुदायस्य संस्कृत्यै प्राथमिकताप्रदानं वाञ्छनीयमस्ति। यथा वैदिकः सनातनधर्मः (यस्मै हिन्दुरिति संज्ञा च प्रदीयते), एतेन सहैव बौद्ध-बोन-किरातधर्माणाञ्च स्थानीय-मौलिक-धर्मत्वाद् एतैर्नेपालस्य परिचयः समुचितः। एवञ्च राज्यस्य सर्वैरपि निकायैः संयन्त्रैश्च अत्रत्यानां मौलिकानां धर्म-संस्कार-संस्कृति-सभ्यतादीनां सविशेषं संरक्षणं विधेयमिति राज्यराष्ट्र-सिद्धान्तस्य मान्यतानुरूपं कार्यं खलु। तथैव नेपालमण्डलस्य सांस्कृतिकायोजने नेवार-समुदायस्य, जनकपुरस्य सांस्कृतिकायोजने मैथिलसमुदायस्य, डडेल्धुराजनपदस्य सांस्कृतिकायोजने डोटेली-समुदायस्य च केन्द्रीयभूमिका भवतीति पूर्वमपि समुल्लिखितमेव। सांस्कृतिकाधिकारस्य सन्दर्भे स्थानीयस्याऽऽदिवासिसमुदायस्य अग्राधिकारे सुनिश्चितेऽपि नागरिक-राजनीतिकाधिकारसन्दर्भे समतापूर्णो व्यवहारो भवत्विति राज्यराष्ट्रमान्यता वर्तते।

राज्यराष्ट्र-सिद्धान्तानुसारेण कस्मिँश्चिदपि देशे सर्वसत्तावादिन्यै शासनप्रणाल्यै स्थानं न भवति। वैदिकपद्धतौ नहि व्यक्तेः, अपि तु विधेः (दण्डव्यवस्थायाः) शासनं स्वीकृतमनुभूयते।

वैदिकपरम्परायाः सभा-समित्याद्यानां प्रतिनिधिसंस्थानां प्रावधानम्, मन्त्रिपरिषदा शासनसत्तायाः सञ्चालनव्यवस्था चात्र समुल्लेखनीये स्तः। अर्थशास्त्र-मनुस्मृति-शुक्रनीत्यादिग्रन्थेषु दण्डनीतेर्महत्ता सविशेषं वर्णिता वर्तते। राज्ञा दण्डनीत्यनुसारेण हि शासनीयमिति तत्र निर्दिष्टमस्ति। साम्प्रतिके सन्दर्भे विधेः शासनेन सर्वोच्चतया (Rule of Law/Supremacy of Law) च सह एतत्तोलनीयं वर्तते।

राज्यसत्तामधिष्ठितस्य जनस्य समूहस्य दलस्य वाऽशोभनताङ्गतत्वे शासनसत्ताया विरोधाय विद्रोहस्योदाहरणं वेनपृथ्वोः प्रकरणेन प्रकाशितमेव। शासनसत्तासीनस्य जनस्य, समूहस्य दलस्य वा चरित्रानुसारेण तच्छोभनत्वाशोभनत्वे

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri
निश्चेतुं शक्येते परन्तु राज्यम्, तदेव राज्यमाधृत्य विकसितं राष्ट्रञ्च सदा शोभने भवतः । यदि साधारणाः प्रजा राज्यस्य शोभनचरित्रस्य व्यावहारिकं लाभं नाधिगच्छन्ति चेच्छासनसत्तायां सद्यः परिवर्तनमावश्यकमिति वैदिकी मान्यता वर्तते । राज्यात्, राज्याधारेण विकसिताद् राष्ट्राच्च कदापि त्रुटिर्न भवतीति मान्यता राज्यराष्ट्र-सिद्धान्तस्य विशेषता वर्तते । राज्ये सत्तासीनैः, सत्तावृत्तस्य जनैः, समूहेन दलेन वा किमपि कर्तुं शक्यत इत्येवंविधः सर्वसत्तावादी विचारो मतोऽस्तीति न, अपि तु राज्ये किमपि अनुचितं कार्यं जायमानमस्ति चेत्तदर्थं सत्तासीनाय जनाय, समूहाय दलाय वा सद्यो दण्डं प्रदाय सदा राज्यस्य शोभनं हितकरञ्च चरित्रमनिवार्यतया सम्पादनीयमिति भावः ।

युरोपमहादेशस्य ऐतिहासिक्यां सामाजिक्यां सांस्कृतिक्यां राजनीतिक्यामार्थिक्याञ्च विशेषपृष्ठभूमौ जाता या पुञ्जवादिनी कम्युनिष्टमूला विचारधारा वर्तते, तत्र राष्ट्रियता-वैयक्तिकता-सामूहिकता-सामूदायिकतादीनामेकाङ्गिदृष्ट्या विचारणहेतुना स्वाभाविकसन्तुलनस्याभावो भवति। एकत्र पुञ्जवादिन उदारवादस्य पक्षधरा वैयक्तिकताया महत्त्वख्यापनेन राज्य-विवाह-परिवार-समुदायाद्यानां संस्थागतसंरचनानां वैयाक्तिकस्वतन्त्रतादृष्ट्या मूलतोऽशोभनतां मन्यन्ते चेद् अपरत्र मार्क्सप्रवर्तितस्य दर्शनस्य मूले वैयक्तिकतया विरुद्धं चिन्तनमवाप्यते । समाजवादस्योद्घोषवद्भिर्व्यक्तिसमाजयोर्दल-सर्वकारनियन्त्रितत्वं साधयितुं चेष्टितमित्यनुभूयते । वैदिक्यां विश्वदृष्टौ तु राष्ट्रियता-वैयक्तिकता-सामूहिकता-सामुदायिकताद्या युरोपमहादेशीयप्रतिमाने इव प्रतिष्पर्धिन्यो न मन्यन्तेऽपि तु तासां समुचितं सन्तुलनम्, समन्वयनम्, समष्टीकरणञ्च अवलम्बितं दृश्यते । कम्युनिष्टदलस्य, पुञ्जवादिनः, समाजवादिनो वा यस्य कस्यापि पक्षस्य भवन्तु, युरोपमहादेशीयं प्रतिमानं मन्यमानैर्जनैर्द्वन्द्वदृष्ट्या व्यक्ति-राज्ययोर्मध्येऽविश्वासप्राकारो निर्मीयमाणो भवति । वस्तुतो युरोपमहादेशीयप्रतिमानानुसारेण राज्यस्य भूमिका न्यूनप्रभावा भवति आहोस्वित् तत्र सर्वसत्तावादिनः शासनसत्तां वशीकृत्य राज्यनाम्नो दुरुपयोगेन निरङ्कुशम्, स्वेच्छानुकूलम्, दमनकरम्, फासिवादि,

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri
नाजिवादि, प्रजातीयम्, जातीयम्, घृणावादि वा शासनं बलात्कुर्वन्तीति भयं सदैव भवति परन्तु राज्यराष्ट्र-सिद्धान्ते विधेः (दण्डविधानस्य) सर्वोच्चता भवति । अतः स्वभावतः खलु सिद्धान्तेऽस्मिन् सर्वसत्तावादिनः शासनस्य कृते स्थानं न भवति । इह राज्यमेव राष्ट्रयाऽऽधारशिला मन्यते । अत्र भू-राजनीतिक-वैधानिकतायाः, सांस्कृतिक-समाजिकैकतायाश्च समष्टेः प्राथमिकता भवति। राष्ट्रियतायाः परिचय-परिभाषयोः कृते राज्यमेव निर्णायकं तत्त्वं मन्यते । नागरिक-राजनीतिकाधिकारयोः, सांस्कृतिकाधिकारस्य च प्रत्याभूतिर्विशिष्टीकृता (Mutually Exclusive but not Conflicting Entities_ सम्पादनीयेत्यनुकूला पद्धतिराश्रिता वर्तते ।

राज्यराष्ट्रं स्वभावत उदार-राष्ट्रियतावादी सिद्धान्तोऽस्ति । अपरत्र राष्ट्रराज्यं द्वि-राष्ट्रियता बहु-राष्ट्रियता चेति अवधारणासु गतार्थस्य युरोपमहादेशीयस्य प्रतिमानस्य (Outdated European Paradigm) निबद्धतया तासु स्वभावतः सङ्कीर्ण-राष्ट्रियतावादिनी दृष्टिर्वर्तते । यस्यामवस्थायां युरोपमहादेशे राष्ट्रराज्यावधारणा परिभाषापन्नासीत्, साऽवस्था साम्प्रतिके संसारे कुत्रापि नास्ति । अतो राष्ट्रराज्यं द्वि-राष्ट्रियता बहु-राष्ट्रियता चेति अवधारणा असान्दर्भिक्यः, अवाच्छिताः, अनावश्यकाश्च प्रतिपन्नाः सन्ति । राज्यराष्ट्र-सिद्धान्ते भू-राजनीतिक-वैधानिकतापन्नानां देशानां कृते राष्ट्रियताया व्यावहारिकीं प्रायोगिकीं यथार्थपरां परिभाषां व्याख्याञ्च प्रस्तोतुं राज्यराष्ट्र-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

सिद्धान्तः प्रभवति । अतोऽस्य सिद्धान्तस्य युगानुकूलता, समयसान्दर्भिकता, सार्वजनीनता च परिदृश्यते ।

परिशिष्टम् १

वेदे नेतृत्वं शासनव्यवस्थाश्च : राज्यराष्ट्रदृष्टिः

क. राज्यम्, ऋतञ्च

राज्यराष्ट्रस्य विषये बोद्धुम् ऋतस्य वैदिकार्थ-कार्य-प्रयोजनानां विचार आवश्यकः । यतो हि, राज्यराष्ट्रस्य शासकीय आधार ऋतञ्च वर्तते । ऋतं बहुलार्थमस्ति । ऋतं सदाचारेऽस्ति । ऋतं क्षमास्ति । ऋतं नियमोऽस्ति । ऋतमात्मसम्मानोऽस्ति । ऋतस्य दश शाखाः सन्ति । ताः सर्वाः परस्परमपृथग्भूताः सन्ति– धृतिः, क्षमा, दमः, अस्तेयम्, शौचम्, इन्द्रियनिग्रहः, धीः, विद्या, सत्यम्, अक्रोधश्च । सदाचारधारणं धृतिः, न तु दुराचारः । ऋतपालनं राज्यकार्यम् । यत्र ऋतं परिपाल्यते, न तत्र भ्रष्टाचारः । वस्तुतः शाश्वतेन ब्रह्मणा ऋतनामा तन्तुः सर्वत्र प्रसारितो वर्तते, येन सर्वा व्यवस्थाः सञ्चाल्यमानाः सन्ति ।[102]

आधुनिकानां राज्यानां मूलेऽसद्वर्तते । यतो हि, वर्तमाना राजनीतिक-व्यवस्थाः स्वार्थस्य, घृणायाः, लोभस्य, पाखण्डस्य च प्रदर्शनपरस्य काल्पनिकस्य वा मानवोत्थानस्य सिद्धान्तमाधृत्य प्रवृत्ताः सन्ति । प्रजातन्त्रस्य, साम्यवादस्य, लोकतन्त्रस्य, समाजवादस्य, पन्थराष्ट्रस्य च मूलमनृताधारितं छलाधारितं वा वर्तते । यदि ता राजनीतिक्य आस्थाः, तदाधारिता राजकीयव्यवस्था च साफल्यमवाप्स्यन्, संसारोऽवश्यं सुसभ्यं सुसंस्कृतं परिपूर्णञ्चाऽभविष्यत् । नहि अमेरिकादेशो पूर्णोऽस्ति, न चीनदेश आत्मनिर्भरः, नहि पाकिस्तानदेशः शान्तोऽस्ति, न च सिरिया । प्रजातन्त्रस्य विचारो मधुरोऽस्ति । साम्यवादस्य

102 यजुर्वेदः ३२/१२

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

स्वप्नः स्वादुर्वर्तते। पान्थिकराष्ट्राणि अनुदारवादेन रूढिवादेन च समाक्रान्तानि सन्ति। व्यक्तित आरभ्य राष्ट्रं यावत् सर्वेऽशान्ताः सन्ति। राष्ट्रतो व्यक्तिं यावद् विद्रोहिणो वर्तन्ते। कारणं स्पष्टमस्ति– ते नहि मानवीयाः। यतो हि, तैरवमता राजकीयसिद्धान्ता ऋते नहि विश्वसन्ति। तेषां विचारव्यवहारयोरेकता नास्ति। विचारेण विवेको दमितोऽस्ति। विचारेण व्यवहारो हतोऽस्ति।

CC-0. In Public Domain. Digitization by eGangotri

भ्रष्टाचारः केवलमार्थिकपक्षे न भवति। मानसिकी, शारीरिकी, बौद्धिकी अपवित्रता च नूनं भ्रष्टाचारः। राष्ट्रस्य नियमानामस्वीकरणं तिरस्करणं वापि भ्रष्टाचारः। क्षमायोग्यायाऽपि विनाकारणं वा दण्डप्रदानञ्च ऋतं नास्ति। अनृतं तत्। ऋतस्य विपरीतमनृतं भवति। दैहिक्या आवश्यकतायाः प्रधानीकरणञ्च ऋतं न। ईर्ष्याविशात् कस्यचन कृतेऽनिष्टस्य सम्पादनं चिन्तनञ्च भ्रष्टाचारः। वैयक्तिकरूपेण इन्द्रियाणामावश्यकतायै सर्वाधिकमहत्त्वप्रदानञ्च भ्रष्टाचारः। विविधानां मिष्टान्नानां प्रचारं कृत्वा सञ्जातस्य दैहिकस्य स्थौल्यस्य कृते पुनरौषधव्यवस्थायाः सम्पादयित्री साम्प्रतिकी राज्यप्रणाली भ्रष्टाचारपूर्णा वर्तते।

पूर्वं विषप्रचारस्याऽनन्तरं विषेण जना आक्रान्ता इति प्रतिक्रियायाः प्रकटनप्रवृत्तिरद्यत्वे यत्र तत्र दृश्यते। अपवित्रतया ऋतं नहि संरक्ष्यते। विद्वत्तावत्ता ज्ञानवत्ता च पृथग्विषयौ। विद्वांसो ज्ञानिनो भवेयुर्न भवेयुर्वा। ज्ञानिनश्च विद्वांसो (विश्वविद्यालयाल्लब्धप्रमाणपत्राः) भवेयुर्न भवेयुर्वा। विद्वान् ज्ञानी च भवेच्चेद् भ्रष्टाचारो न स्यात्। विद्वांसस्तु अज्ञानिनः, अपवित्राः, इन्द्रियमुखिनः, अधीराः, असत्यवादिनः, असद्व्यवहारवन्तः, क्रोधयुक्ताः, दुराचारिणश्च भवितुमपि शक्नुवन्ति। ऋतयुक्ता जना ज्ञानिनो भवन्ति। "**ऋतस्य यथा प्रेत**" सात्त्विकनियमानुसारेण जीवनं यापय इत्यर्थः। ऋतस्यानङ्गीकर्तारोऽसहजा भवन्ति। ऋतहीना अस्थिरा भवन्ति।

वस्तुत ऋतमेव प्राणः (मरुत्), ऋतं हि आत्मा।[103] विष्णुः (व्यापकता) एव ऋतस्य गर्भः। सकला पृथ्वी, आकाशञ्च ऋताश्रिते स्तः।[104] सत्यस्य,

103 ऋग्वेदः ४/२१/३

104 ऋग्वेदः १०/१२१/१

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

सदाचारस्य, नियमसङ्गतस्य च मार्गस्याऽनुसरणमेव ऋतम् ।[105] अशिष्टता, अनुदारता, अकरुणता, अज्ञानता, असुरता च अनृतम् । वर्तमाना राज्यव्यवस्था अनृताधृता वर्तते । अनृता राज्यप्रणाली त्याज्यास्ति । ऋतं राज्यं वाञ्छितं वर्तते । एतादृशमेव ऋतराज्याधृतं राष्ट्रं वर्तमानस्य भृशमावश्यकता वर्तते ।

न्यूनतयापि ऋग्वेदे चतुस्त्रिंशदुत्तरशतवारम्, अथर्ववेदे च द्वाविंशत्युत्तरशतवारं राष्ट्रशब्दस्योल्लेखोऽवाप्यते । ऋषिभिः **"बृहद् राष्ट्रम्"**[106] इत्युक्त्वा कृतं कल्याणकारि व्यावहारिकं मार्गदर्शनमद्यापि तावदेव महत्त्वपूर्णमस्ति । परिवारस्य, समाजस्य, राज्ये निवसतां सर्वेषां जनानाञ्च चिन्तनेन राष्ट्रं प्रति सहयोगिना, समानेन च भाव्यम् । आधुनिकराज्यव्यवस्थाभिरनेकतायामेकतायाः चिन्तनं व्यावहारिकरूपेण हतं वर्तते । मनसा मनसो योगेन हीनं पृथक्तावादि चिन्तनमाधृत्य राज्येषु एकता न स्थाप्यते । तदा तु द्वन्द्वः समुत्पद्यते । साम्प्रतिकेषु राष्ट्रेषु सहिष्णुताया अभाव एतत्परिणामः खलु । ऋषय ऐक्यमुपदिशन्ति मनोयोगेन । आधुनिक्यो राज्यव्यवस्था एकतां वर्णयन्ति मनोवियोगेन । असावेव आधुनिकराज्यानां विरोधाभासः ।

"इमं राष्ट्रस्याभीवर्गे कृणुतं युज उत्तरम्"[107] राष्ट्रं राज्ये संस्थापय, राष्ट्रेण सह परिवारस्य, ग्रामस्य, जनपदस्य, राज्यानां मनांसि, बुद्धिवृत्तीश्च योजय इत्याशयः । राज्यैः राष्ट्रनिर्माणं भवति । मिष्टभाषया, समानताया व्यवहारेण, पारस्परिकसम्मानेन च राष्ट्रान्तर्गताः सर्वे परिवाराः, प्रत्येकं जनाश्च सुखिनो भवन्ति । यथा वर्षया घासा वर्धन्ते, तथैव सत्कर्मणा सुशासनेन च सम्पन्नता वर्धते ।[108] आत्मीयो जनो भवतु परो वा, मनोमेलनकार्ये, सामाजिकोत्थानस्य कृते ऋतानुकूलायां व्यवस्थायां विरोधं प्रदर्शयति चेत्तस्यापि प्रतिरोधः करणीयः ।

ऋतरहिताया राज्यव्यस्थाया विरोधश्च ऋषिणां सम्मतोऽस्ति । एकं राज्यमन्यानि न स्वीकुरुते चेत्तदक्षम्यं वर्तते । तादृशानि राज्यानि काम-क्रोध-

---

105 ऋग्वेदः १०/१३३/६

106 अथर्ववेदः ३/८/१

107 अथर्ववेदः ६/५४/२

108 अथर्ववेदः ६/५१/१

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri
लोभ-मोहान् विक्रीणन्ति । स्वार्थसिद्ध्यै तानि यत्किमपि कुर्वन्ति । राज्यानां द्वैपाक्षिकस्यास्य भ्रष्टाचारस्य राज्याज्जातीयतायाम्, जातीयतातः परिवारे, परिवाराद्व्यक्तौ च क्रमतो रूपान्तरणं जातमस्ति । एतेन एकस्य राज्यस्याऽपरेण राज्येन सह, एकस्या जात्याऽपरया जात्या सह द्वन्द्ववर्धनं स्वाभाविकं खलु । परिणामः स्पष्टोऽस्ति– अद्यत्वे संसारे पृथक्तावादी, वैभिन्न्यवादी, विखण्डनकारी च सङ्घर्ष उत्कर्षङ्गतोऽस्ति । सम्प्रति शक्तिहीनतापन्ने नेपालराष्ट्रे एव न, अपि तु भारते, चीनदेशे, अमेरिकादेशे, युरोपमहादेशस्य नैकेषु देशेषु च द्वन्द्वाग्निः प्रज्वलितो दृश्यते । एतदर्थं बौद्ध-वैदिकादिमान्यताधारितम्, ऋताश्रितं राज्यराष्ट्रमेव अन्यतमं समाधानम्, नान्यत् । वेदे जातीयराज्यं नास्ति ।

ख. वेदे जातीयं राज्यं नास्ति

ग्रामः, जनपदः, उपवर्तः, स्वराज्यम्, वैराज्यम्, अधिराज्यम्, पारमेष्टिः, आधिपत्यराज्यमित्यादीनां राजनीतिकसंरचनानां व्यवस्था ऋग्वेदादेव दृग्गोचरीभवति । लघुसंरचनादृष्ट्या ग्रामश्च राज्यमेव । वाल्मीकिरामायणे ग्रामश्च राज्यमिति कथितमस्ति । अवधारणेयं सम्प्रति नेपालस्य संविधानेन पुरःस्थापिताया व्यवस्थायाः पृथङ्नास्ति । यतो हि, अत्र पालिकास्तरे च सर्वकारोऽस्ति । जनपदश्च राज्यरूपः । देशशब्दस्य अर्थवैविध्यं वर्तते परन्तु राजनीतिके सन्दर्भे राज्यमेव देशः । प्रजाः, प्रजानामाश्रयः (भूमिः), राजकीयप्रणाली चेत्येषामवयवानां समष्टी राज्यम् । जनसमुदायं भूमिञ्च विना राज्यं न भवति, राष्ट्रञ्च । वस्तुतो संस्थानीकृतं राष्ट्रियस्वरूपाधारं निर्माय राज्यमेव राष्ट्राय अस्तित्वं भावयति ।

वेदेन जात्या भाषायाश्च आधारेण राज्यं राष्ट्रं वा परिकल्पितं नास्ति । परिचयस्य नाम्ना कस्याश्चन जातेः, कस्याश्चन भाषाया भाषिणो जनस्य, समूहस्य वा राष्ट्रियसंरक्षणाद्वञ्चनं निषिद्धम् । वैदिकमान्यतानुरूपं राष्ट्रचरित्रं समावेशीकरणम्, न तु बहिष्करणम् । धर्म-रिलिजन-मजहबाद्याधारेण, जाति-रङ्ग-नासाकृत्याधारेण, भू-सांस्कृतिकपरिचयाधारेण च विभेदस्य प्रवृत्तिः,

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

पद्धतिश्च स्वीकार्ये न स्तः । धर्मस्य, वर्ण-जातीनाञ्चाऽऽधारेण राष्ट्रियताया स्थापनाविचारः पाश्चात्त्यानां वर्तते। एकलजातीयस्य, एकसम्प्रदायस्याऽऽधारेण निर्मितेषु राष्ट्रेषु एकलपरिचयं विहाय अन्येषां परिचयानां विनाशस्य, शून्यताङ्गतत्वस्य च पर्याप्ता दृष्टान्ता अस्मत्पुरतो विलसन्ति । भाषा-जाति-वर्ण-भूगोलानां विषये राज्यैर्व्यवस्था करणीया ।

जाति-प्रजात्याधारेण सृष्टस्य विभेदकरस्य राज्यस्य वेदोऽनुमोदनं न कुरुते । वैदिकी व्यवस्था "**एकोऽहं बहु स्यामि**"ति मौलिकसूत्रेणानुबद्धा वर्तते । बौद्ध-जैन-बोन-किरातादिपरम्परासु च वैदिकमान्यतानुकूलैव दृष्टिरवाप्यते। तस्माद् राष्ट्रराज्यस्य सन्दर्भे नेपालिनां स्वाभाविकी विमतिर्भवत्येव। स्वमूलाद्वियुक्ते सति विटपः, वृक्षः, लतादयः सर्वे शुष्कायन्ते । राज्यराष्ट्रस्य बोधः, राष्ट्रराज्यस्य स्वीकारश्च नेपालिनां मूलकीलद्रढयनमस्ति ।

राष्ट्रराज्यं समस्याऽऽलयः। एकस्य लघीयसः समूहस्य, अल्पसङ्ख्यकाया जातेर्जनानामेको निश्चितो भूगोलो भवति । बृहत्समूहस्य बहुसङ्ख्यकाया जातेर्जनानां परिचयाधारेण देशो निर्मीयते। आङ्ग्लदेशस्य निर्माणमाङ्ग्लानां कारणेन बभूव। जर्मनजना जर्मनीदेशञ्चक्रुः, फ्रेञ्चजनाश्च फ्रान्सदेशम्, परन्तु हिमवत्खण्डे भारतवर्षे बहुजातीयः, बहुभाषिकः, बहुसांस्कृतिकश्च समन्वयः प्रारम्भत एव आसीत् । अत्र राज्यनिर्माणं कस्यचन जातीयस्य, भाषिकस्य, सांस्कृतिकस्य च परिचयस्य हानिं विनैव विहितमासीत् । कारणमस्ति यद्–वैदिकी संस्कृतिर्न कस्यापि परिचये हस्तक्षेपं करोति। वैदिकमान्यतानुरूपं राज्यं प्रत्येकं जनम्, समूहम्, ग्रामम्, जनपदञ्च संरक्षति। राज्यराष्ट्रे सर्वे समायान्ति परन्तु राष्ट्रराज्ये विविधता ध्वंसं याति ।

ग. भारतवर्षे राज्यराष्ट्रम्

वैदिकग्रन्थैर्नेपालसहिता देशा अजनाभ-वर्षमिति भारतवर्षमिति वा नाम्ना सम्बोधिता वर्तन्ते । हिमालयादारभ्य समुद्रं यावत् सिन्धु-गङ्गादिनदीनां वहनक्षेत्रं भारतवर्षमस्ति । साम्प्रतिकं भारतं (India) तु

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

भारतवर्षस्य एकमंशमात्रम् । यद्यपि साम्प्रतिकाः श्रीलङ्का-पाकिस्तान-म्यानमार-बङ्गलादेशाः स्वस्य भारतवर्षान्तर्गतत्वं नहि मन्वते, तथापि ऐतिह्यस्याऽज्ञातताऽवस्थेयम् । ऐतिह्यं ज्ञायते मन्यते चेद्भारतवर्षं ज्ञायते, स्वीक्रियते च । ज्ञायते, मन्यते चेद्विशालोऽस्ति भारतवर्षस्य भूगोलः । नेपाल-भारत-तिब्बत-भूटान-श्रीलङ्का-पाकिस्तान-म्यानमार-थाइल्याण्ड-कबोडियादिदेशा भारतवर्षस्य राज्यानि सन्ति । भारतवर्षान्तो नैकानि राज्यानि निर्मितानि सन्ति । तेषां राज्यानां संस्थानीकरणेन च बहूनि राज्यराष्ट्राणि अस्तित्ववन्ति सन्ति । आम्, वेदोपनिषत्पुराणानि, तदाधारिता सभ्यता, बौद्ध-जैन-बोन-किरातसहिता धर्माश्च अत्रत्याया राष्ट्रियताया मूलम् । शालग्रामः, गण्डकी, मुक्तिनाथः, पशुपतिनाथः, लुम्बिनी, मथुरा, माया, काशी, काञ्ची, अवन्तिका, रामेश्वर इत्यादीनां कारणेन जनमानसेषु य ऐक्यबोधोऽस्ति, तेन भारतवर्षस्य समष्टिभूतोऽन्तर्बोधोऽद्यावधि जीवितः संलक्ष्यते । नेपालेन अस्या ऐक्यबद्धताया नेतृत्वं वहनीयम् । राष्ट्रराज्यस्याऽऽततायिन्या व्यवस्थया अस्मदीया सांस्कृतिकी राष्ट्रियता असाहज्येन सञ्चलतीति सत्यम्, परन्तु राष्ट्रियतेयमद्यापि मृता नास्ति ।

भारतवर्षं वैदिकसभ्यताया उत्तराधिकारि वर्तते । इह बौद्ध-जैन-बोन-वैदिक-किरातसहिता नैका धर्मधारा अजायन्त, प्रवहमानाश्च अभवन् । सन्दर्भेऽस्मिन् विवादस्यौचित्यं नास्ति । मिलित्वा सर्वेषां सहावस्थितिरेव धरातलीययाथार्थ्यानुरूपा बुद्धिमत्ता । राष्ट्रराज्यस्योन्मादेन एकस्यैव मार्गस्य जनाश्च एकस्यैव ग्रन्थस्य, संस्थापकस्य च विषये सङ्घर्षरताः सन्ति । तेषां सङ्घर्षेण विश्वमेव असुरक्षितं सञ्जातमस्ति । हण्टिङ्गनवर्येण सभ्यतानां सङ्घर्ष इत्यभिधानेन एतदेव सङ्केतितम् । "**वसुधैव कुटुम्बकम्**" मन्यमानस्य वैदिकस्य हिन्दुधर्मस्य हेतुना विश्वमसुरक्षितं नास्ति ।

राज्यराष्ट्रस्य पुनर्जागरणस्य नेतृत्वं नेपालेन वहनीयम् । अस्माभिर्वेद-बुद्ध-मुन्धुम-तीर्थङ्करादीनां वचनाधारो गृहीतोऽस्ति । कार्ल-मार्क्सानुयायिभिः साम्यवादिभिश्च राज्यराष्ट्रावधारणाङ्गीक्रियते परन्तु तेषां पार्श्वे 'मानवो भव (**मनुर्भव**)' इत्याख्या वैदिक्या मान्यताया दृढं मूलकीलं नास्ति,

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

'विश्वमेव कुटुम्बमि'त्याख्यं शास्त्रं नास्ति, 'असत्यात् सत्यं प्रति, मृत्योरमरतां प्रति नये'त्येवंविधो वैदिकोपदेशः, आशायाः सञ्चारश्च नास्ति, '**भवतु सर्वमङ्गलमि**'ति बुद्धोपदेशो नास्ति, वैदिकानां मुनीनां जैनतीर्थङ्कराणामहिंसा च नास्ति। एवञ्च तत्पार्श्वे दधिचेः कल्याणकर आत्मोत्सर्गो नास्ति। बुद्ध-कपिल-कणाद-जैमिनि-महावीर-शङ्कराचार्याणां दृष्टिः तेषां पार्श्वे नास्ति। एतत्सर्वमस्मत्पार्श्वे वर्तते।

घ. असफलानि राष्ट्रराज्यानि

वैदिकदृष्ट्या विचारिते सति आधुनिकी राष्ट्रराज्यावधारणा एका क्रूरा राज्यव्यवस्था वर्तते। परम्परावादः, उदारवादः, साम्यवादः, समाजवादः, फासिवाद इत्यादयो वादा वस्तुतो राज्यसत्तावाप्तये रचितः चक्रवातोऽस्ति। राष्ट्रपतिना विल्सनवर्येण उचितमेव कथितं यद्– मया एव शासितानां राज्यानां विषये नैकशो वर्षेभ्यो व्याख्यानं प्रस्तूयमानमेव वर्तते, तथापि मया राष्ट्रराज्यं किमस्तीति विषयेऽवबुद्धं नास्ति। उग्रवामपथिता, उग्रदक्षिणपथिता, असहिष्णुता च राष्ट्रराज्यस्य दुर्गुणाः सन्ति। हिंसात्मकता तु एतादृशीनां राज्यव्यवस्थानां प्रतिफलम्।

राष्ट्राणां सन्दर्भे मेजिनी-बेन्थमवर्ययोर्विचार उदारवादी वर्तते। राष्ट्रे प्रत्येकं नागरिकेण व्यक्तिगतस्वतन्त्रताया उपभोगाय अवसरः प्राप्तव्यः, प्रकृतिप्रदत्ता अधिकाराः सुरक्षणीयाः, विधेः शासनेन भाव्यमिति विचारा बेन्थमवर्येणाऽग्रेसारिताः सन्ति। तदनुसारेण एकस्मिन् राष्ट्रेऽनेके धर्माः, राज्यानि, बहुजातीयानां जनानां नागरिकत्वेन निवासाश्च भवितुं शक्नुवन्ति। स लिखति– यदि मदीयया देशभक्त्या विश्वबन्धुत्वचिन्तनं दुर्बलायते चेद् अहं देशभक्तत्वं नेच्छामि। अयमेव विचारो मुनिभिः सहस्रशो वर्षेभ्यः पूर्वं '**वसुधैव कुटुम्बकम्**' इत्येवंरूपेणाऽभिहित आसीत्। एवमेव अटो-विवरवर्यो ब्रूते– तद् राष्ट्रं राष्ट्रं न भवति, यत्र प्रजाभिः सामाजिकः, राजनीतिकः, आर्थिकश्चाधिकारो नाधिगम्यते।

"सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः" इत्युदात्तचेतनाया-मृषिभिरयमेवाऽधिकारः प्रत्यायोजितोऽस्ति। आचार्येण चाणक्येनापि 'प्रत्येकं

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

प्रजाया गृहे चुल्लिनिरीक्षणकार्यं राज्ञा स्वेनैव सम्पादनीयमिति तथैव प्रोक्तं नासीत् । राष्ट्रराज्यं हिटलराख्यं क्रूरं शासकं जनयितुं शक्नोति परं राज्यराष्ट्रे तु नाजिवादस्य फासिवादस्य उग्रवामपथस्य च कृते किमपि स्थानं न भवति । वस्तुतो राज्यराष्ट्रं सङ्कीर्णतां नाशयति, उदारताञ्च प्रवर्धयति ।

ङ. राज्यराष्ट्रं मनुर्भव च

उदात्तचेतना हि वैदिकचिन्तनस्य वैशिष्ट्यम् । वेदे मानवतावादोऽस्ति । **"मनुर्भव जनया दैव्यं जनम्"** हे मानव ! त्वं दिव्यया शक्त्या सम्पन्नोऽसि, तस्मान्मानवो भव इत्यर्थः । राष्ट्रं पान्थिकम्, साम्प्रदायिकम्, विभेदकारि च भावयितुमाग्रहशीलस्य दृष्ट्या तुलनां वैदिकमान्यतया सह करवाम । यदा तु केचित् कुरान-ग्रन्थस्य, बाइबल-ग्रन्थस्य वाऽऽधारेण राष्ट्रं कल्पन्ते, तदा असमावेशिन्याः, असहिष्णोः, बहिष्करणवादिन्याश्च दृष्टीनां प्रभुत्वं भवति । वेदास्तु केवलं मानवताया पक्षेऽभिदधति । वेदा मानवं यवनरूपेण, इसाइरूपेण, यहुदिरूपेण, हिन्दुरूपेण वा विखण्डनं न कुर्वन्ति । वैदिकराष्ट्रस्य सार एव मनुर्भवेति । इदमुदारं वर्तते ।

व्यक्तिगतैः स्वार्थैः सह तुलनायां राष्ट्रियता तेभ्यो महनीयतरा भवतीति वेदे[109] स्पष्टतयाऽभिहितं वर्तते । स्वार्थपरायणा जना राष्ट्रं निर्मातुं नैव प्रभवन्ति । **"परिराष्ट्राय धत्त नः"** अस्मदीयं धनसम्पद् राष्ट्रहिताय धारयत इत्यर्थः । एतादृशीं भावनां विना राष्ट्रनिर्माणं न भवति । अतो वर्तमानानि राष्ट्राणि केवलं बृहत्-कबिल-राज्यम्, न तु राष्ट्राणि । कबिलराज्येषु सङ्कीर्णः स्वार्थो भवति परन्तु नहि स राष्ट्रे । राष्ट्रे प्रजानां कृते समुन्नतिरूप एक एव स्वार्थो भवति ।

राष्ट्रस्य सवितृत्वेन नेतृत्वेन छल-कपटरहितेन भाव्यम् । वैदिक-मान्यतानुसारेण देवा इव निर्दुष्टा जना राष्ट्रस्य नेतृत्वं कुर्वन्ति । देवो भूत्वा देवं यजेत् । अद्यतनानि राज्यानि साफल्यरहितानि सन्ति । यतो हि, प्रशासका देवतुल्या निर्दुष्टा न वर्तन्ते ।

---

109 अथर्ववेदः १४/२४/१

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

च. सदाचारो राष्ट्रञ्च

राज्यराष्ट्रस्य समुन्नयनाधारः सदाचारः । प्रश्नः समुत्पद्यते– किं वर्तमाना राज्यव्यवस्था सदाचारवत्यो वर्तन्ते ? अस्मदीयमुत्तरं भविष्यति– 'न वर्तन्ते ।' वैदिकराष्ट्रस्याऽवधारणा "**वसुधैव कुटुम्बकम्**" अस्ति । अर्थहीनाया युरोपमहादेशीयाया अवधारणाया अनुसारिण्यो राज्यव्यवस्थाः परस्परं जाति-वर्ग-सम्प्रदाय-राज्यसीमरेखाणां विषयेषु कलहं कुर्वन्ति । समुन्नतं राष्ट्रन्तु ते वाञ्छन्ति परन्तु लोभ-च्छल-व्यक्ति-जाति-भूगोलाधारेण सङ्कीर्णं विखण्डनं कुर्वन्ति । कतिपये तु परिचयमूलाया राजनीतेर्नाम्ना पुनश्च कबिलमानसिकतां स्वीकुर्वन्तः सन्ति । साम्यवादस्य, समाजवादस्य, उदारवादस्य, लोकल्याणस्य, समावेशितायाश्च विषयेषु उद्घोषन्तु श्रावयन्ति परन्तु तेषां परिचयमूलाया राजनीतेरन्तर्ये घृणावादो वर्तते । दुष्टसाधनैर्निर्दुष्टां शोभनां व्यवस्थां स्थापयितुं न पार्यते । घृणा वैभिन्न्य-पार्थक्यवादिनीनां व्यवस्थानां मूलमेव लोभच्छल-कपटाधारितं वर्तते । अतः संसारो दह्यमानोऽस्ति ।

छ. राष्ट्रे परिवारः

वैदिकमान्यताया अनुसारेण राष्ट्रस्य मूलं '**मनुर्भव**' इत्युपदेशे निहितं वर्तते । अतो मान्यतेयं सदाचारेण कल्याणेन युक्ता, सर्वतोमुखिनी, विरोधाभासरहिता च वर्तते । एतादृशः सदाचारो गोवत्सयोर्मध्यस्थस्य प्राकृतिकस्य प्रेम्णो धारणया सम्भवतीति वैदिकं सूक्तं शिक्षयति ।[११०] मानवीये प्रेम्णि छलम्, कपटः, स्वार्थश्च भवितुं शक्नुवन्ति परन्तु पशूनां पारस्परिकं प्रेम निःस्वार्थं भवतीति बोधनेन उपर्युक्तस्य दृष्टान्तस्य महत्त्वमधिकतरं समुद्घाटितं भवति ।

वैदिको मन्त्रः कथयति– राष्ट्रप्रेम्ण आधारशिला परिवारं प्रति दायित्वं भवतु । यः स्वकीये परिवारे न स्निह्यति, तस्य राष्ट्रियं प्रेम अपूर्णं भवति । केवलं प्रेमिणो निःस्वार्था भवन्ति । प्रेमभावरहिता जना हितकरीं सर्वतोमुखिनीं राष्ट्रियतां निर्मातुं न शक्नुवन्ति । राज्यराष्ट्रस्य सर्वन्यूनो निकायः परिवारोऽस्ति ।

---

[११०] अथर्ववेदस्य सामञ्जस्यसूक्तम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

सदाचारी परिवार एव राज्यराष्ट्रस्याऽऽधारभूतं रूपं वर्तते ।

CC-0.In Public Domain. Digitization by eGangotri

राज्यराष्ट्रस्याऽऽरम्भबिन्दुः परिवारः । दुराचारिणां परिवारेषु वर्धितैर्नागरिकैर्दुराचार एवावबुद्धो ज्ञातश्च भवति । छलकपटाभ्याम्, क्रोधेन, लोभेन, द्युतक्रीडया च युक्ते सदाचारहीने अधार्मिके परिवारे वर्धितेषु जनेषु उपर्युक्ताः कुसंस्काराः प्राकृतिका भवन्ति । आधुनिकेन मनोविज्ञानेनाऽपि तथ्यमेतत् स्वीकृतं प्रमाणितञ्च वर्तते ।

वेदो ब्रवीति– सदाचारः परिवारस्य अभिन्नमङ्गं भवतु । प्रेममये परिवारे वर्धिता जनाः प्राकृतिकरूपेणैव स्नेहिनो भवन्ति । दयावति वर्धितस्य जनस्य मनोवाक्कर्मसु ऐक्यं भवति । सत्यवादिनि परिवारे वर्धितो जनोऽसत्यं भाषितुं न शक्नोति । सत्यम्, अहिंसा, ब्रह्मचर्यम्, अक्रोधः, करुणा च सच्चारित्र्यम् । कम्युनिष्टदलीयैः, समाजवादिभिः, पुञ्जवादिभी राज्यैः पारिवारिकस्य सदाचारस्य महत्त्वं मन्यते किम् ? इह अस्मदीयमुत्तरं भवति– नहि । फलतो राष्ट्रे दुराचारप्रकोपः प्रवर्धितोऽस्ति । या शिक्षा सदाचारं न मत्वा केवलं लोभ-तृष्णा-सत्यादीनां दुर्गुणानां बौद्धिकमुपयोगमेव व्यक्तिगतं गुणं मनुते, तादृश्याः शिक्षाया मूले समुत्थिते राष्ट्रे दुर्गुणानामाधिक्यन्तु अवश्यं भवति ।

वस्तुतः प्रत्येकं परिवारेण स्वसन्ततिः समानचिन्तनाय, मिलित्वा धनार्जनाय, हितकार्ये धनप्रयोगाय सहमत्यै, निर्णये विवेकोपयोगाय च अभ्यासार्थं शिक्षणीया । एतदेव वैदिकमाह्वानं वर्तते ।[।।।] इत एव राज्यराष्ट्रस्य कल्याणकरं निर्माणं प्रारभ्यते । न किञ्चन निर्माणमग्रतो भवति, अपि तु मूलतो भवति । पुञ्जवादिनः, कम्युनिष्टदलस्य, समाजवादिनश्च इत्येतैर्नामभिः सम्बोध्या आधुनिक्यो राजनीतिक्यो व्यवस्थाः सहसा उपरिष्टात् समापातिताः सन्ति । अत एव विरोधाभासपूर्णा वर्तन्ते । राज्यराष्ट्रस्य मूले निर्मिते सांस्कृतिके नेपालराष्ट्रे आयातितानां राजनीतिकव्यवस्थानां बलाद्योजनस्य परिणामोऽस्माभिर्भुज्यमानो वर्तते । केवलं केचन जनाः सफला वर्तन्ते परन्तु राष्ट्रं खलु असाफल्यं प्रति गतिशीलं संलक्ष्यते ।

।।। अथर्ववेदः ६/८४/२

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

विवकेपूर्णः सदाचार एव राज्यराष्ट्रस्य मूलकीलम् ।
विवेकाऽप्रयोगः, बुद्धिविलासे कालक्षपणञ्च वर्तमानानां राज्यव्यवस्थानां दुर्गुणाः । बुद्धेरसङ्गतप्रयोगेण वितण्डा समुत्पन्नास्ति । राष्ट्रस्य नेतृत्ववाहकाः शासका एतादृशीं वितण्डामपाकर्तुमिच्छन्ति परन्तु नहि प्रभवन्ति । कुसंस्कारे वर्धिता नेतारः संस्कारयुक्तं राज्यं कथं निर्मीयत इति बोद्धुमेव न शक्नुवन्ति । ते सुसंस्कृतं राष्ट्रं निर्मातुं नहि क्षमन्ते । नो चेद् ऋग्वेदे विवेकस्य सुसंस्कृतप्रयोगाय तथैव कथं प्रेरयेत् ? सुसंस्कृतस्य परिवारस्य रचनां विना सुसंस्कृतस्य राज्यस्य राष्ट्रस्य वा निर्माणमसम्भवमिति वेदेन सहस्रशो वर्षेभ्यः पूर्वमेव समुद्घोषितमासीत् । यावद्वयं स्वविवेकं सदाचारपक्षे प्राण[112] साक्षिणं विधाय नोपस्थापयामः, तावद् राज्यराष्ट्रस्य कल्याणकरं सर्जनं न भवति । यावद्वयं चतुर्दिक्षु प्रसृतैर्देवैः सह सदाचारस्य प्रतिज्ञां न कुर्मः, तावदस्माभिर्विरोधाभासे हि जीवनीयम् ।

ज. राज्यराष्ट्रस्य नेतृत्वम्

परिवारः, समाजः ? ग्रामः, जनपदः, राज्यम् (राष्ट्रम्) एतेषां सर्वेषां नेतृत्ववान् नेतास्ति । एतादृशस्य नेतुर्वैदिके काले गणपतिः, प्रजापतिः, राजन्यः, सम्राडित्यादिरूपैः सम्बोधनं कृतमस्ति । सम्प्रति नेतृत्वस्य स्वरूपं परिवर्तितमस्ति । कालक्रमेण विकृतिङ्गतो नेतृशब्दो नेपालेऽद्यत्वे छलिनः, धूर्तस्य, कुटिलस्य, विखण्डकस्य, वाचालस्य च रूपेणाऽऽधिक्येन प्रयुज्यते । नेतृशब्दः सदर्थयुक्तो नास्ते सम्प्रति । वैदिकं नेतृत्वन्तु अद्यतनाद् विकृतनेतृत्वात् पृथगासीत् । वैदिकस्य नेतृत्वस्याधार ऋतं वर्तते चेत् कपुतन्त्रस्य नेतृत्वस्याऽऽधारः स्वार्थः, लोभश्च ।

ऋग्वेदस्य प्रथमे मन्त्रेऽग्निर्हि पुरोहितो नेता वाऽभिहितोऽस्ति– **अग्निमीडे पुरोहितम्** । नेत्रा अग्निरिव समदर्शिना, तेजस्विना, सर्वस्वीकार्येण च भाव्यमिति भावः । अग्निः स्वकीय-परकीयेत्याकारकं विभेदं न कुरुते । भौतिकस्य विश्वस्य नेता सूर्योऽस्ति । अग्निः सूर्यस्य प्रतिनिधित्वं निर्वहति । भौतिकस्य

112 ऋग्वेदः ३/५१/२

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

शरीरस्य नेता प्राणोऽस्ति। आध्यात्मिकस्य शरीरस्य नेता आत्मास्ति। आत्मनां नेतृ ब्रह्मास्ति। संसारस्य राज्यस्य नेता राजा कथितोऽवर्तत। कश्चन नेता अग्रणीत्युच्यते, कश्चन च स्वामी। पुरोहितः, ऋत्विक्, होता, ब्रह्मा च यज्ञस्य नेतारः। सूर्यः, चन्द्रः, पृथ्वी, पन्थाः, पावकः, इन्द्रः, वरुणः, उषा, बृहस्पतिरित्यादयः सर्वे नेतारः खलु।

CC-0.In Public Domain. Digitization by eGangotri

अमुष्य जगतोऽग्रणी नेता वा ईश्वर इति वेदवचनम्।[113] स एव अग्निः, आदित्यः, वायुः, चन्द्रमाः, शुक्रः, ब्रह्मा, आपः, प्रजापतिश्च। अग्निरूपेण भौतिकेऽस्मिन् संसारे तन्नेतृत्वमस्ति। वैदिकं नेतृत्वं सकलमपि समादरणीयं देवसमानमस्ति। ब्रह्मा, विष्णुः, महेश्वरः, लक्ष्मीः, दुर्गा, सरस्वती, इन्द्र इत्यादयः सर्वेऽपि वैदिकनेतृत्वस्य प्रकृष्टा दृष्टान्ता वर्तन्ते। एषामादरं सम्मानं स्मरणञ्च अद्यत्वेऽपि प्राचीनकाले इव विधीयते। एषां महन्नेतृत्वेनेमे प्रातःस्मरणीयाः समपद्यन्त। अयमेव वैदिकनेतृत्वस्य महिमा।

राजनेता भवितुं वेदेन[114] एवंविधा गुणा निर्दिष्टाः सन्ति–

१. यत्रा नियुद्भिः सचसे शिवाभिः

नेतृत्वस्य इच्छावतो जनस्य व्यवहारो सर्वप्रथमं सद्गुणान्वितं परिवर्तनमावश्यकम्। सदाचारयुक्ता जीवनशैली खलु एतदर्थः। सर्वेषां कल्याणकरो व्यवहारः, निःस्वार्था चेतना, कल्याणभावना वा शिवार्थः। मनोवाक्कर्मभिर्नेत्रा कल्याणकारिणा भाव्यम्।

२. दिवि मूर्धानन्दधिषे

नेतरि सकलशास्त्रज्ञानमपेक्षितम्। ज्ञानस्य तात्पर्यमस्ति– आधिभौतिकम्, आधिदैविकम्, आध्यात्मिकञ्चेति त्रिविधविषयकं ज्ञानम्। कल्याणकारिणो राज्यस्य कृतेऽपेक्षितानां समेषां विषयाणां व्यावहारिको बोध आवश्यको भवति।

३. स्वर्षाञ्जिह्वामग्ने चकृषे हव्यवाहम्

नेतृवचः सुमधुरं भवतु। तद्वचोऽग्निरिव तेजस्वि, यज्ञधूम इव सुगन्धि,

113 यजुर्वेदः ३२/१

114 यजुर्वेदः १५/२३

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0 In Public Domain. Digitization by eGangotri

ऋतमिव च सत्यं भवतु । अहिंसापूर्णस्य नेतृत्वस्य वाञ्छा भवतु । वाण्यां न केवलं माधुर्यमपि तु सत्यता च भवतु । स सर्वेषां रक्षकोऽस्तु । मन-वाणी-कर्मसु ऐक्यं भवतु । मनोगते विचारे, अभिव्यक्तिरूपायां वाण्याम्, क्रियमाणे कर्मणि च समानता वैदिकनेतृत्वेऽनिवार्या खलु । यदि विचारयन्ति किञ्चन, वाण्या प्रकटीकुर्वन्ति किञ्चन अन्यदेव, पुनराचरन्ति किञ्चिदितरमेव चेत्तादृशा नेतारो दुरात्मानो वर्तन्ते । वैदिकमान्यतानुरूपं नेतृत्वन्तु महात्मनां भवति ।

वैदिकनिर्देशानुसारेण[115] नेत्रा सामान्यजनेन, राजनेत्रा, व्यापारिभिः सह च समानव्यवहारवता भाव्यम् । नेता साधारणात् साधारणतरञ्च जनं नहि अनाद्रियते । राज्ञा प्रजया सह समानं न्याय्यं करोति । विदुषां परामर्शं स स्वीकुरुते । न्यायपूर्णं समाजं स्थापयितुं सञ्चालयितुञ्च स शास्त्रादर्शमालम्बते । वैदिकनिर्देशानुकूलस्य नेतृत्वस्य प्रमुखं लक्ष्यं खलु प्रजानां रक्षणम्, तेषां कृते समुन्नयनञ्च । मनोवाक्कर्मणामैकरूप्यहेतुना वैदिकनेतुर्जीवनशैली अनुकरणीया स्मरणीया च भवति । स्वकर्तव्याद्विमुखस्य नेतुर्विद्वत्सभया पदच्युतिः कर्तुं शक्यते । धर्मविमुखं वेनमृषयो न केवलमस्वीकृतवन्तः, अपि तु तस्मै मृत्युदण्डश्च प्रददुः । राज्यराष्ट्रस्य मूलकीलं बौद्ध-वैदिकादिसंस्कृतयः सन्ति । अतः सदाचारि नेतृत्वं समुत्पाद्य राष्ट्रस्य कृते नेतृत्वप्रदानस्य सत्सङ्कल्पो मूलकीलस्य ('जरोकिलो' इत्यस्य) आन्दोलनस्य दायित्वं वर्तते । वयं करिष्यामः । नेतृत्वविकासमहायज्ञेऽस्मिन् मनोवाक्कर्मभिः साहाय्यार्थं सादरं निमन्त्रयाम । धृतिम्, क्षमाम्, दमम्, अस्तेयम्, शौचम्, इन्द्रियनिग्रहम्, धियम्, विद्याम्, सत्यम्, अक्रोधञ्च धृतवतो नेतृत्वस्य समुद्भावनेन विश्वबन्धुत्वभावस्य स्थापनाय सहयोगिनो भविष्यामः । नेतृत्वमिदं बुद्धस्य पञ्चशीलस्य, महावीरस्य पञ्चव्रतस्य च अवलम्बकं नेतृत्वमपि कथयितुं शक्यते । बौद्ध-जैन-बोन-वैदिक-किरातानां दर्शनेषु नेतृत्वस्य चरित्रविषये स्वाभाविकं तादात्म्यं वर्तते ।

✡ भवतु सर्वमङ्गलम् ✡

---

115 ऋग्वेदः १०/३८/४

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

परिशिष्टम् २

नवीनराज्यस्य कृते सङ्घर्षरतानां सूची

विश्वस्मिन् विश्वे जातीयतायाः, प्रजातीयतायाः, क्षेत्रीयतायाः, भाषिकतायाः, भौगोलिकतायाश्चेत्यादिगतस्य परिचयस्याऽऽधारेण राज्यनिर्माणाय कार्यक्रमं कुर्वाणा नैके राजनीतिकदलीयाः, दलहिताय प्रयतमानाः समूहाश्च वर्तन्ते। पृथग् राज्यस्थापनाय कैश्चिद्वर्गैः शान्तिमनुष्ठाय राजनीतिको गतिविधिः सञ्चाल्यमानोऽस्ति चेत् कैश्चित्तु तदर्थमायुधानि च प्रयुक्तानि सन्दृश्यन्ते। ते हि राजनीतिकर्मिणः, हठबलसमूहः, तैः प्रस्तावितानि राज्यानि, तदर्थं मूलानि कारकतत्त्वानि च इह प्रस्तुतानि सन्ति–

युरोप-महादेशः

देशः	प्रस्तावितं राज्यम्	मुख्यं कारकम्	राजनीतिकं दलम्/हठबलसमूहः
अजरबैजान	अर्मेनिया	अर्मेनिया	आर्साख राज्य सरकार
बेल्जियम	पूर्वी बेल्जियम	जर्मन-भाषा	पार्टी फर फ्रिडम एण्ड प्रोग्रेस क्रिश्चियन सोसियल पार्टी
	फ्लाण्डर्स	फ्लेमिश-भाषा	लिबर्टेर डाईरेक्ट डेमोक्रटिश्च भ्लाम्स बेलांग फ्लेमिश सोसियालिस्ट मुभमेन्ट
	वाल्लोन गणतन्त्र	फ्रेन्च-भाषा	वाल्लोन यॉली
बोस्निया एण्ड हर्जगोभिना	रिपब्लिका स्प्रेस्का	सर्ब	एलायन्स अफ इण्डिपेण्डेण्ट सोसियल डेमोक्राट्स सर्बियन डेमोक्राटिक पार्टी सर्बियन रेडिकल पार्टी
साईप्रस	उत्तरी साईप्रस	टुर्किस साईप्रिओट	उत्तरी साईप्रस सरकार
चेक गणतन्त्र	मोराभिया	मोराभिया समुदाय	मोराभेने
डेनमार्क	बोर्नोहोल्म	बोर्नोहोल्म्स्क	बोर्नोहोल्म्स सेल्फ गभर्नमेन्ट पार्टी
	रिपब्लिक अफ द	फारो	रिपब्लिकन पार्टी प्रोग्रेस पार्टी

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0 In Public Domain. Digitization by eGangotri

	फारो आईलाण्ड		पिपुल्स पार्टी सेल्फ गभर्नमेन्ट पार्टी
फिनल्याण्ड	ओल्याण्ड	ओल्याण्ड स्वीड्स	फ्युचर अफ ओल्याण्ड
फ्रान्स	अल्सेस	अल्सेसियन	एल्सास जुरेस्ट उन्सेर ल्याण्ड
	बास्क कन्ट्री	बास्क	अबेर्टजालेन बाटासुना युसको अल्कार्टासुना बास्क न्यासनालिस्ट पार्टी
	ब्रिट्टानी	ब्रिटोन	रिभाईबल पार्टी ब्रिटोन पार्टी एमगान पार्टी
	कोर्सिका	कोर्सिकान	फ्री कोर्सिका पार्टी फर कोर्सिका पार्टी
	ओक्सिटानिया	ओक्सिटन्स	ओक्सिटन्स न्यासनालिस्ट पार्टी आरान टुगेदर पार्टी
जर्जिया	अब्खाजिया	अब्खाज	अब्खाजिया सरकार
	दक्षिण ओस्सेटिया	ओस्सेटियन्स	दक्षिण ओस्सेटिया सरकार
जर्मनी	स्वतन्त्र बभारिया राज्य	बाभारियन	बाभारिया पार्टी
	लुसाटिया	सोर्व	लुसाटिया अलायन्स
इटाली	फ्रुईल	फ्रूइलिएन	रेस पब्लिका फुर्लान, पाट्रिए फुर्लान, फ्रूइलिएन फ्रन्ट
	लोम्बार्डि गणतन्त्र	क्षेत्रीयता	प्रो लोम्बार्डि इण्डिपेण्डेन्स, लेगा लोम्बार्डा
	पदानिया	पदानियन	लेगा पदना, पदानियन युनियन, अल्पाइन पदानियन युनियन
	सार्डियन गणतन्त्र	सार्डियन	सार्डीनियन एक्सन पार्टी, सार्डीनियन नेसन, इण्डिपेण्डेन्स रिपब्लिक अफ सार्डीनिया,
	सिसिल	सिसिलियन	फ्री सिसिलियन्स
	दक्षिण टिरोल	क्षेत्रीयता	दि फ्रीहेइटिलिचेन, साउथ टिरोलियन फ्रिडम, सिटिजेन्स युनियन फर साउथ टिरोल
	भेनिस गणतन्त्र	भेनेतियन	पार्टी अफ भेनेतियन्स, भेनेतियन इण्डिपेण्डेन्स, वी

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

			आर भेनेतो, लिगा भेनेता रिपब्लिका, भेनेतियन पिपुल्स युनिटी
कोसोभो	उत्तरी कोसोभो	कोसोभोका सर्व	कम्युनिटी म्युनिसिपालिटिज विदइन कोसोभो असेम्ब्ली अफ द कम्युनिटी अफ म्युनिसिपालिटिज, सर्व लिस्ट
लिथुआनिया	सामोगिटिया	सामोगिटियन्स	सामोगिटियन पार्टी
मोल्डोभा	ट्रान्सनिस्ट्रिया	क्षेत्रीयता	ट्रान्सनिस्ट्रिया सरकार
	गागाउज गणतन्त्र	गागाउज	गागाउजियन पिपल एसेम्ब्ली
नेदरल्याण्ड्स	फ्रीसिया	फ्रीसियन	फ्रीसियन न्यासनल पार्टी, डे फ्रिसेन
पोल्याण्ड	सिलेसिया	सिलेसियन	सिलेसियन अटोनोमि मुभमेन्ट
	कसुबिया	कासुबियन	कासुबियन युनिटी
रोमेनिया	जेकेली ल्याण्ड	जेकेली	डेमोक्राटिक युनियन अफ हंगेरियन इन रोमेनिया हंगेरियन सिभिक पार्टी हंगेरियन पिपल्स पार्टी अफ ट्रान्ससिल्भानिया
रसिया	इडेल युराल	भोल्गा	युराल डेमोक्राटिक फाउन्डेसन
	बास्कोर्तोस्तान	बास्किर	बास्कोर्ट पब्लिक अर्गनाईजेसन,
	चुभासिया	चुभास	चुभासिया न्यासनल मुभमेन्ट
	तातारस्तान	तातार	अल ततार पब्लिक सेन्टर बहिर्गमित ततार सरकार
	इच्केरिया चेचेन गणतन्त्र	चेचेन	चेचेन सेपाराटिस्ट
	सिर्कास्सिया	सिर्कास्सान	सिर्कास्सन युथ इनिसियटिभ, सिर्कास्सा न्यासनालिज्म
	ताबारस्तान	ताबासरन	ताबासरन रिपब्लिकन फ्रन्ट
सर्बिया	भ्योभ्योडिना	भ्योभ्योडिनाका हंगेरियन	अलायन्स फर भ्योभ्योडिना हंगेरियन,
	साण्ड्जाक	सर्वियाका बोस्नियन	पार्टी अफ डेमोक्राटिक एक्सन अफ साण्ड्जाक इस्लामिक कम्युनिटी इन सर्विया
	कोसोभो	कोसोभोका	कोसोभो सरकार

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

	मेटोहिया	अल्बानियन	
	भ्यालेन्सिया	क्याटालान	भ्यालेन्सिया न्यासेनालिस्ट ब्लक भ्यालेन्सियन पिपुल्स इनिसियटिभ पपुलर युनिटि क्याण्डिडेसी भ्यालेन्सियन लेफ्ट
स्पेन	आरान भ्याली	क्याटालन वा अक्सिटानिया	कन्भर्जेन्सिया डेमोक्राटिका अरानेसा युनिटाट दे आरान पार्टिट रेनोभडोर दे अर्टिएस गरोस पार्टिट अक्सिटानिया
	लेयोनिज क्षेत्र	लियोनिज	युनियन देल पुयब्लो
	नाभारे	नाभारन	गेरोआ बाइ बिल्डु बास्क न्यासनालिस्ट एक्सन
	बालेअरिक	क्याटालन	पार्टिट सोसोयालिस्टा दे मल्लोर्का(एन्तेसा नसिओनालिस्ता मेस पर मेनोर्का मेर पर मल्लोर्का
	बास्क कन्ट्री	बास्क	बास्क न्यासनालिस्ट पार्टी बास्क न्यासनालिस्ट एक्सन
	क्यानारी गणतन्त्र	क्यानारियन्स	अल्टरनेटिभ नसियोनालिस्ट क्यानारियो, अल्टरनेटिभ पपुलर क्यानारिया,
	कास्टिले	कास्टिल्लेन्स	कास्टिल्लेन लेफ्ट
स्पेन	क्याटालोनिया	क्याटालन्स	सोसियल डेमोक्रटिक पार्टी, जुन्ट्स पर क्याटालुन्या
	गलिसिया	गलिसियन्स	गलिसियन न्यासनालिस्ट ब्लक, अनोभा न्यासानालिस्ट ब्रदरहुड, सेण्ट्रिस्ट न्यासनालिस्ट पार्टी
	आरागोन	आरागोनिज	एस्तौ अरागोनिज, पुयालोन दे कुचास
	अस्तुरियास	अस्तुरियन	युनिडा नसियोनालिस्ट

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

			अस्तुरियाना, युनिडा ब्लोक पोर अस्तुरिएस कोम्प्रोमिसु पोर अस्तुरिएस अण्डेचा अस्तुर
स्वीजरल्याण्ड	जुरा क्षेत्र	फ्रेन्च भाषी	जुरास्सियन अटोनोमिस्ट मुभमेन्ट
स्वीडेन	स्क्यानिया	स्केनियन	
युक्रेन	लुहान्स्क पिपुल्स रिपब्लिक	लुहान्स्कका रसियन	फ्री डोनबास, न्यु रसिया पार्टी
	डोनेत्सेक पिपुल्स रिपब्लिक	डोनेत्सेकका रसियन	पिपुल्स सोभियत अफ द डोनेत्सेक पिपुल्स रिपब्लिक
युनाईटेड किङ्डम	कोर्नवाल	कोर्निस	मेब्योन केर्नो
	ईंग्ल्याण्ड	इङ्ग्लिश	इङ्ग्लिश डेमोक्राट्स
	मर्सिया	मर्सियन	एक्टिङ्ग विटान अफ मर्सिया
	नर्दन आयरल्याण्ड	आइरिस	सोसियल डेमोक्राटिक एण्ड लेबोर पार्टी, सिन फेईन, फियन्ना फेयल
	स्कटल्याण्ड	स्कट्स	स्कटिस न्यासनल पार्टी स्कटिस ग्रीन पार्टी स्कटिस सोसियालिस्ट पार्टी
	वेल्स	वेल्स	ल्याईड साइम्रु साइम्रु सोभेरेन वेल्स न्यासनालिस्ट पार्टी
	वेस्सेक्स	वेस्सेक्स	वेस्सेक्स रिजियोनालिस्ट
	योर्कसायर	क्षेत्रीयता	योर्कसायर पार्टी

एसिया-महादेशः

देशः	प्रस्तावितं राज्यम्	मुख्यं कारकम्	राजनीतिकं दलम्/हठबलसमूहः
अस्ट्रेलिया	तोर्रेस स्ट्रेट	मेलानेसियन	टोरेस स्ट्रेट आइल्याण्ड काउन्सिल
	नोफोर्क आइल्याण्ड	नोफोर्क आइल्याण्डर	नोफोर्क आईल्याण्ड टेण्ट एम्बासी
	तस्मानिया	क्षेत्रीयता	फर्स्ट पार्टी अफ तस्मानिया
बङ्गलादेश	बंगभुमी	बङ्गाली हिन्दु	बंग सेना
	चित्तगाउँ	जुम्मा	पर्बतो छोट्टोग्राम जोनसोंघती सोमिति
	त्रिपुरा	त्रिपुरी	अल त्रिपुरा टाईगर फोर्स

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

चीन	तिब्बत	तिब्बतीयन	फ्री तिब्बत मुभमेन्ट,
	ताईवान गणतंन्त्र	क्षेत्रीयता	डेमोक्राटिक प्रोग्रेसिभ पार्टी
	इस्ट तुर्किस्तान	उईघुर	इस्ट तुर्किस्तान इण्डिपेण्डेन्स मुभमेन्ट
	इन्नर मंगोलिया	चिनियाँ मंगोल	इन्नर मंगोलिया इण्डिपेण्डेन्स मुभमेन्ट
	हंगकंग	क्षेत्रीयता	हंगकंग इण्डिपेण्डेन्स मुभमेन्ट
	मकाओ	क्षेत्रीयता	मकाओ इण्डिपेण्डेन्स मुभमेन्ट
	मन्चुरिया	क्षेत्रीयता	मंचुको टेम्प्रोरी गभर्नमेन्ट
इण्डिया	आस्साम	आस्सामी	युनाईटेड लिबरेसन फ्रन्ट अफ आस्साम
	बोडोल्याण्ड	बोडो	न्यासनल डेमोक्राटिक फ्रन्ट अफ बोडोल्याण्ड
	कश्मिर	कश्मिरी	जम्मु कश्मिर लिबरेसन फ्रन्ट
	कामतापुर	कामतापुरी	कामता लिबरेसन अर्गनाईजेसन
	मणिपुर	मेइति	युएनएलएफ, पीएलए, काङ्ग्लेपाक कम्युनिष्ट पार्टी
	नागालिम	नागा	न्यासनल सोसियालिस्ट काउन्सिल अफ नागालिम
	खालिस्तान	शिख	बब्बर खाल्सा इन्टरन्यासनल
	तामिल ड्रभिड नाडु	ड्रभिड	तामिल नाडु लिबरेसन आर्मी
	त्रिपुरा	त्रिपुरी	इण्डिजिनस न्यासनालिस्ट पार्टी अफ त्रिपुरा
